द्वादशः पटलः ।

अथाभिधास्यामि समुक्तकर्मसु
प्रसक्ततत्साधनलक्षणादिकम् ।
अवश्यमत्रौपयिकं परामृश-
न्ननीरिताः कर्मकलाश्च काश्चन ।।१ ।।

विमर्शिनी

एवमेकादशसंख्यैः पटलैः सप्रायश्चित्तानि सजीर्णोद्धाराणि प्रतिष्ठाकर्माण्यभिधाय द्वादशेन पटलेन सर्वपटलेष्वपि यत्किञ्चिदनुन्मीलितं कर्म विविच्याभिदधानः अत एवास्य पटलस्य कर्मशेषाख्या च भवतीति मन्यमानः तत्सङ्गतिं योजयन् पटलमारभते-अथेति । अथ कर्मणां कथनानन्तरं समुक्तकर्मसु सम्यगुक्तेष्वपि कर्मसु प्रसक्ततत्साधन-लक्षणादिकं प्रकर्षेण सक्तानामनुबद्धानां तत्साधनानां लक्षणविनियोगादिकं परामृशन् अत्र साधनादौ यद्यदवश्यमौपयिकम् उपयोगि तत्तदहमभिधास्यामि वक्ष्यामि । अनीरिता अनुक्ताः काश्चन कर्मकलाश्चाभिधास्यामीति संबन्धः ।।१ ।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

अथशब्देन सम्बन्धं द्योतयन् पटलान्तरमारभते-अथाभिधास्यामीति। प्रतिष्ठाद्यखिलकर्मसमुक्त्यनन्तरं समुक्तकर्मसु प्रसक्तं तत्कर्मसाधनलक्षणादिकं अभिधास्यामीत्यर्थः। निधिकलशपालिकाकुण्डादीनि साधनानि। आदिशब्दस्तद्विन्यासप्रकारहोमद्रव्यपरिमाणाद्युपसङ्ग्रहार्थः। अत्र समुक्त(कर्म)स्वेव अवश्यमौपयिकं परामृशान्नित्यतिप्रसंङ्गपरिहारार्थमुक्तम्। अनीरिताः कर्मकलाश्च काश्चनेति दीक्षाद्यभिप्रयते। नन्वथ किन्तत्र तत्र नोक्तमेतदिति चेत् क्रियाक्रमावधारण-प्रतिबन्धत्वाल्लक्षणादीनां क्रियाक्रमेह्यवधार्यमाणे यद्यन्तरा चिरं तत्साधनं लक्ष्येत तर्हि बिलम्बनात् क्रियाक्रमप्रतिसन्[१]धानं न स्यादित्यभिप्रायः।।१।।

साक्षे शङ्कुमिनाङ्गुलं समतले कृत्वा पृथक्कालज-
च्छायाग्रारचितत्रिबिन्दुपरिवृत्त्योत्पाद्य मत्स्यद्वयम्।
तत्सौषुम्नसिरोत्थसूत्रयुगयोगाच्छङ्कुनाड्यन्तिमं
सूत्रं न्यस्य सुसाधयेद् यमधनेशाशे ततश्चेतरे।।२।।

विमर्शिनी

तत्र प्रथमं 'क्षमां क्षमीकृत्य दिशश्च सम्यग् ज्ञात्वे'त्यत्र प्रसक्तं दिग्विभागज्ञानविधानमाह-साक्ष इति। साक्षे दिग्विभागापरिज्ञाते प्रदेशे समतले समीकृततले इनाङ्गुलं द्वादशाङ्गुलं शङ्कुं शङ्क्वाख्यं काष्ठविशेषं कृत्वा स्थापयित्वा पृथक्कालजच्छायाग्रारचितत्रिबिन्दुपरिवृत्त्या पृथक् पृथक् कालवशाज्जातेषु त्रिषु बिन्दुष्वितरेतरान्तरालमानेन परिवृत्त्या वृत्तीकारेण मत्स्यद्वयं रेखाद्वयसंपुटितं मत्स्याकारं संस्थानविशेषम् उत्पाद्य जनयित्वा, तत्सौषुम्नसिरोत्थसूत्रयुगयोगात् तयोर्मत्स्ययोः सौषुम्नसिरे मध्यनाड्यौ ताभ्यामुत्थिताभ्यां सूत्राभ्यां युगं युग्मं यत् तस्य योगो दक्षिणे उत्तरे वा भवेत्। तस्माद् योगात् शङ्कुनाड्यन्तिमं शङ्कोर्मध्यनाडीपर्यन्तं सूत्रं न्यस्य प्रक्षिप्य तेन सूत्रेण यमधनेशाशे दक्षिणां दिशमुत्तरां दिशं च सुसाधयेत् सुतरां स्थिरीकुर्यात्। ततश्च तस्मादेव सूत्रात् इतरे च वक्ष्यमाणरीत्या पूर्वपश्चिमाशे च सुसाधयेत्। अयं भावः-दिग्विभागं ज्ञातुं समीहिते भूप्रदेशे आदित्यातपे च प्रसरति सति समीकृते स्थले समान्तरालं वृत्तत्रयं

१. 'बन्ध' क पाठः।

Shripuram Publications
www.shripuram.org

कृत्वा तन्मध्ये स्वलक्षणयुतं शङ्कुं समं निधाय यदा यदा तस्य छायाग्रं पृथक् पृथग् वृत्तं स्पृशति, तदा तदा तत्र तत्र वृत्ते शङ्कुं कुर्यात्। तद्बिन्दुत्रयं मिथोऽन्तरालमानेन वृत्तत्रयं कुर्यात्। तदा मध्यमवृत्ते द्वौ मत्स्यौ भवतः। तन्मत्स्ययोर्मध्यगते द्वे सूत्रे प्रसार्य दीर्घीकुर्वाणे यस्मिन् प्रदेशे तयोः संयोगो भवति, तत्राङ्कं कृत्वा तस्मादङ्कात् शङ्कुमध्यसूत्रान्तं सूत्रं प्रसारयेत्। तथा सति दक्षिणोत्तरदिग्विभागो भवतीति। तथाच गुरुदेव आह। तत्रायं शङ्कुलक्षणश्लोकः-

"भ्रमविरचितवृत्तस्तुल्यमूलाग्रभागो
द्विरददशनजन्मा सारदारूद्भवो वा।
सममृजुरवलम्बादव्रणः षट्कवृत्तः
समतल इह शस्तः शङ्कुरर्काङ्गुलोच्चः।।"

इति।

"निरक्षदेशे लङ्कादौ स्यादयं दिग्विनिर्णयः।
इत्याहुः केचिदित्यस्मात् साक्षदेशस्य कथ्यते।।
विशेषः साक्षदेशानामस्त्येवार्कापसर्पणात्।"

इति च।

"छायात्रयाग्रोद्भववृत्तमत्स्यस्पृक्सूत्रयोर्यत्र युतिः प्रदेशे।
याम्योत्तरा शङ्कुदिशा ककुप् स्यात् क्रमेण सौम्योत्तरगोलयोः स्यात्।।"

इति शङ्कुस्थापनश्लोकः। तस्यायमभिप्रायः - जलसमीकृते स्थले प्रोक्तप्रमाणं शङ्कुं विन्यस्य पूर्वाह्णे वापराह्णे वा छायाग्रेष्वभिनिविष्टेषु त्रयो बिन्दवः कार्याः। तत एकं बिन्दुं मध्ये कृत्वा इष्टप्रमाणेन वृत्तमालिखेत्। तावतैव द्वितीयं बिन्दुमवलम्ब्य दितीयं वृत्तं, तद्वत् तृतीयं बिन्दुं मध्ये कृत्वा तृतीयं वृत्तं चालिखेत्। ततस्तावत्प्रमाणमेव वृत्तं तथाच लिखेत्, यथाच मध्यबिन्दुवृत्तं पार्श्वद्वयस्य खण्डमुत्पादयति। तथा कृते मत्स्यद्वयमुत्पद्यते। तयोश्च यस्यां दिशि महदन्तरं, ते मुखे भवतः। तयोश्च यस्यां दिशि सन्निकर्षः, ते पुच्छे भवतः। मुखयोः सूक्ष्मकीलकौ विन्यस्य तयोः सूत्रे बद्ध्वा पुच्छमध्यगे निस्सार्य स्वगत्यैकैकं नयेत्। तयोः सूत्रयोः मुखपुच्छगत्यनुसारेण यत्र

www.shripuram.org
Shripuram Publications
www.shripuram.org

सन्निपातः, सा दिक् स्थिरा भवति। एवं शङ्कुमूलयुति बिन्दुगामि सूत्रं प्रसार्य रेखां कुर्यात्। सा दक्षिणोत्तरा भवति। तत एकैकं बिन्दुं मध्ये कृत्वा वृत्तत्रयेण मत्स्यमुत्पादयेत्। तस्य मुखपुच्छावगाहि सूत्रं पूर्वपरा दिग् भवति। एवं साक्षदेशे दिक्साधनत्वमुक्तमिति।।२।।

विवरणम्

तत्र प्रथमं प्रथमपटले प्रस्तुतदिग्विभागकथनाय शङ्कुस्थापनं ब्रूते-साक्षे शङ्कुमिति। तत्रायं प्रकारः। साधनीयं प्रदेशं समतलं कृत्वा तन्मध्ये द्वादशाङ्गुलप्रमाणं शङ्कुं स्थापयित्वा पूर्वाह्णेऽपराह्णे वा तस्य छायाग्रे कालभेदवशाद्बिन्दुत्रयं कृत्वा परस्परप्रमाणेन पृथक् पृथक् परिवर्तिते सति मध्यमे वृत्ते द्वौ मत्स्यौ भवतः। तन्मत्स्ययोः सूत्रद्वये प्रसारिते सति उत्तरे दक्षिणे वा यत्र तत्सूत्रयोर्योगो भवति तत्र बिन्दुं निधाय शङ्कुमध्यस्थबिन्दौ तद्बिन्दौ चैकमेव सूत्रं प्रसार्य यमधनेशाशे सुसाधयेत्। तत इतरे च इति।।२।।

स्तम्भोच्चस्य षडंशविस्तृततदष्टांशाधिकोच्चो घटः
पद्मोऽष्टांशसमुच्छ्रयोच्छ्रयनवांशोनप्रथोऽष्टच्छदः।
अष्टांशायततद्द्विपांशरहितव्यासायतार्धोच्छ्रयः
कूर्मो नागयवाग्रतद्द्विगुणमूला योगनालप्रथा।।३।।

विमर्शिनी

निधिकलशादीनां प्रमाणमाह-स्तम्भोच्चस्येति। स्तम्भोच्चस्य प्रासादस्तम्भायामस्य षडंशविस्तृततदष्टांशाधिकोच्चः स्तम्भायामस्य षडंशेन विस्तारयुक्तः विस्तारादष्टांशाधिकायामयुक्तश्च घटो निधिकलशः स्यात्। तदूर्ध्वगतः पद्मः शिलापद्मः, स तु अष्टांशसमुच्छ्रयोच्छ्रयनवांशोनप्रथः स्तम्भोच्चस्याष्टांशेनोन्नतियुक्तः उन्नतेर्नवांशहीनप्रथया विस्तारेण च युक्तः, अष्टच्छदः अष्टभिः पत्रैश्च युक्तः स्यात्। तदूर्ध्वस्थः कूर्मः शिलाकूर्मः अष्टांशायततद्द्विपांशरहितव्यासायतार्धोच्छ्रयः स्तम्भोच्चस्य अष्टांशेन दैर्घ्ययुक्तः, तस्यायतस्य अष्टांशेन रहितविस्तारः, आयतस्य अर्धांशेनोन्नतियुक्तश्च स्यात्। योगनालप्रथा कूर्मोर्ध्वभागस्थितस्य योगनालस्य प्रथा विस्तारः नागयवाग्रतद्द्विगुणमूला अष्टयवाग्रा एकाङ्गुलपरिमिताग्रविस्तारा तद्द्विगुणमूला तस्याग्रस्य द्विगुणेन द्व्यङ्गुलमानेन विस्तृतमूला

Shripuram Publications
www.shripuram.org

च स्यात्। तथा चाहुः-

"स्तम्भायामषडंशे स्यादेकांशो घटविस्तरः।
विस्ताराष्टमभागे स्यान्नवांशं चोच्छ्रयं भवेत्।।
मूलविस्तारमष्टांशो वेदांशः कण्ठविस्तरः।
वक्त्रान्तरेण भूतांशं कलशस्याकृतिर्भवेत्।।"

इति।

"स्तम्भोच्चे वसुभागे स्यादेकांशं पाद्ममुच्छ्रयम्।
पद्मोत्सेधे नवांशे स्यादष्टभागं तु विस्तरम्।।
उत्सेधं विभजितं कृत्वा षड्भागं तु विधीयते।
एकांशं पद्मपट्टं स्यादधः पद्मांशक[1]त्रयम्।।
ऊर्ध्वं पद्मद्वियंशं तु अष्टपत्रादिशोभितम्।।"

इति।

"योगनालोऽङ्गुलव्यासो द्व्यङ्गुलं मूलविस्तरम्।"

इति।।३।।

विवरणम्

ततो निधिकलशादीनां प्रमाणमाह-स्तम्भोच्चस्येत्यादिना। घटो निधिकलशः। तस्य विस्तारस्तम्भदैर्घ्यषड्भागेन कार्यः। तस्य उन्नतिर्विस्ताराष्टांशाधिका कार्या। मुखोदरादिकमुपपत्त्या योज्यम्। पद्म इति कूर्मास्पदं पद्मं गृह्यते। स्तम्भोच्चस्येत्यनुवर्तनीयम्। स्त(म्भो ? म्भा)ष्टांशेन पद्मस्योच्छ्रयः। उच्छ्रयान्नवांशोनो विस्तारः, तदवयवक्लृप्तिश्च प्रतिमापद्मनयेन साधनीया। कूर्ममानमाह-अष्टांशेति। स्तम्भाष्टांशेन कूर्मस्यायामः। आयामादष्टांशहीनो विस्तारः आयामार्धेन च तस्योन्नतिः। योगनालस्याग्रविस्तारोऽष्टयवेन मूलभागे तद्द्विगुणेन।।३।।

अष्टाशामिहिरैस्त्रिधायततदर्धव्यासपादोच्छ्रिता
यद्वार्काहियुगैर्मितातातिविततत्युत्सेधवत्योऽङ्गुलैः।

---

१. 'क' ङ पाठः।

Shripuram Publications
www.shripuram.org

मार्त्तिक्यः पुटपाकलोहितरुचः शैल्योऽथवाष्टेष्टकाः
कर्तव्याश्चतुरूनिताश्चतुरुपेता वा गृहौचित्यतः।।४।।

विमर्शिनी

इष्टकानां प्रमाणमाह-अष्टति। अष्टाशामिहिरैः अष्टभिर्वा दशभिर्वा द्वादशभिर्वाङ्गुलैः त्रिधा त्रिप्रकारेण आयततदर्धव्यासपादोच्छ्रिताः आयताः तदर्धव्यासाः तत्पादोच्छ्रयाश्च, यद्वा अथवा अर्काहियुगैः द्वादशाष्टचतुर्भिरङ्गुलैः क्रमेण मिताततिवितत्युत्सेधवत्यः एतैर्मानैः परिमितेनायामेन विस्तारेणोच्छ्रयेण च युक्ताः, मार्त्तिक्यः मृत्तिकाभिर्निर्मिताः, पुटपाकलोहितरुचः पुटस्यान्तर्भागस्य पाकवशाल्लोहितवर्णाः, अथवा शैल्यः शिलानिर्मिताः अष्टेष्टकाः कर्तव्याः। गृहौचित्यतः प्रासादवशात् चतुरूनिताः चतस्रो वा चतुरुपेताः द्वादश वा। तथाच गुरुदेवः-

"अङ्गुलैः संख्यया दीर्घा जगतीपङ्क्त्यनुष्टुभाम्[१]।
क्रमात् तदर्धविस्तारा विस्तारार्धसमुच्छ्रयाः।।
उत्तमादिविमानानां निर्दिष्टाः प्रथमेष्टकाः।।"

इति। पाशुपते च-

"आयामतस्तालमात्रास्तारतोऽष्टाङ्गुलाः क्रमात्।
अष्टौ सङ्कल्पयेदेवमुत्सेधाश्चतुरङ्गुलाः।।"

इति।

"चतस्रोऽष्टौ द्वादश वा प्रादक्षिण्येन विन्यसेत्।।"

इति च।।४।।

विवरणम्

प्रथमेष्टकामानमाह-अष्टाशामिहिरैरिति।।४।।

स्तम्भायामद्वादशांशोपपन्न-
व्यासं व्यासार्धोच्छ्रयं गर्भपात्रम्।
तुर्यश्रं तच्छुद्धशुल्बप्रक्लृप्तं

---

१. 'भः' ङ पाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

स्वोत्सेधाङ्घ्र्यूनोच्छ्रयोर्ध्वच्छदाढ्यम्॥५॥

विमर्शिनी

गर्भपात्रप्रमाणमाह-स्तम्भायामेति। स्तम्भायामद्वादशांशोपपन्नव्यासं स्तम्भायामस्य द्वादशांशेन युक्तविस्तारं, व्यासार्धोच्छ्रयं विस्तारादर्धमात्रोच्छ्रयं च, स्वोत्सेधाङ्घ्र्यूनोच्छ्रयोर्ध्वच्छदाढ्यं स्वस्योच्चस्य पादहीनोच्चेनोर्ध्वच्छदेन च युक्तं, शुद्धशुल्बप्रक्लृप्तं निर्मलेन ताम्रेण निर्मितं, तुर्यश्रं चतुरश्रं तत् इष्टकागर्तमध्ये स्थाप्यं गर्भपात्रं स्यात्। क्रियासारे वैष्णवे-

"चतुरश्रं तदर्धोच्चं शोधयेत् तद् यथाविधि।
सुगुप्तं तद् यथा भित्तौ भित्तिमानेन वा भवेत्॥
भित्तिस्तम्भचतुर्भागत्रिभागैकं तु तद् विदुः॥"
इति॥५॥

विवरणम्

गर्भपात्रप्रमाणमाह-स्तम्भायामेति॥५॥

नागैर्भित्तिततिं विभज्य चतुरो बाह्ये विहायांशका-
नन्तस्त्रीनखिलेषु गोभिरजिते षड् द्वौ च षाण्मातुरे।
भूतैस्त्रीनपि चैककं वितनुयाद् गर्भं परांशे स्थितं
विप्रस्योपरि पादुकस्य भुवि राज्ञोऽधः क्रमादन्ययोः॥६॥

विमर्शिनी

गर्भन्यासस्थानमाह-नागैरिति। नागैः अष्टाभिः भित्तिततिम् आरूढभित्तेर्विस्तारं विभज्य बाह्ये चतुरः अन्तस्त्रीनप्यंशकान् विहाय त्यक्त्वा परांशे इतरांशे बाह्यादारभ्य पञ्चमांशे अन्तरारभ्य चतुर्थांशे च स्थितं गर्भं वितनुयात्। एवम् अखिलेषु देवेषु। अजिते गोभिः नवभिर्भित्तिततिं विभज्य बाह्ये षड् अन्तः द्वौ च विहाय, षाण्मातुरे भूतैः पञ्चभिर्विभज्य बाह्ये त्रीन् अन्तरेककं च विहाय परांशे स्थितं गर्भं वितनुयात्। तत् तु गर्भं विप्रस्य विप्रो यजमानश्चेत् तस्य पादुकस्योपरिभागे, राज्ञः क्षत्रियस्य भुवि

www.shripuram.org
Shripuram Publications
www.shripuram.org

भूसामान्यस्थले, अन्ययोः वैश्यशूद्रयोः क्रमादधोऽधश्च स्थितं गर्भं वितनुयात्। पाशुपते-

"आरुढभित्तिविस्तारमष्टधा विभजेत् पुनः।
बाह्येऽत्र चतुरो भागानन्तर्भागत्रयं त्यजेत्।।
तन्मध्ये स्थापयेद् गर्भं गर्ते प्रासादमानतः।।"

इति। मञ्जर्यां च-

"तद्भित्तिविस्तारमथाष्टभागं कृत्वाथ बाह्ये चतुरोऽत्र भागान्।
त्रिभागमभ्यन्तरतो विहाय तत्रान्तरे गर्भमथो न्यसेच्च।।"

इति। विष्णुसंहितायां-

"द्वारस्य दक्षिणे भागे तृतीयांशे द्विशेषिते।
गोमूत्रेणाप्लुते न्यस्येद् द्वारमूलस्य पार्श्वतः।।" इति।

स्कन्दसंहितायां-

"भित्तिं तु पञ्चधा भङ्क्त्वा त्रीणि बाह्ये परित्यजेत्।
अन्तरेकं तु तन्मध्ये"

इति।

"पादुकोपरि विप्राणां नृपतेस्तत् समं भवेत्।
अधस्ताद् वैश्यशूद्राणाम्"

इति च।।६।।

विवरणम्

गर्भविन्यासस्थानमाह-नागैर्भित्तिततिमिति। अखिलेष्विति। सर्वेषां साधारण-मेतदित्यर्थः। गोभिरजिते षड् द्वाविति। गोभिर्विभज्य षड् बाह्येंऽशकानन्तर्द्वौ च विहायेति सर्वमनुषञ्[1]जनीयम्। भूतैस्त्रीनपि चैककमित्यत्रापि तद्वद्व्योज्यम्। [2]परांशस्थितं गर्भं वितनुयादिति सर्वशेषः। परस्मिन्नवशेषितेंऽश इत्यर्थः।।६।।

कृत्वा गर्भगृहं कुलाद्रिकृतिकोष्ठाढ्यं समन्तात् पदे
ब्राह्मे पञ्चदशांशकान् विरचयेत् सौम्याग्रसूत्रैः समम्।

१. 'ज्च' २. 'ध' क. पाठः। २ 'ध' क. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

तत्पृष्ठस्थितदैवमानुषपिशाचावारकेषु क्रमाद्
विश्वोमेशनवांशकानपि ततः स्वं स्वं पदं कल्पयेत्।।७।।

विमर्शिनी

एवं प्रथमपटले प्रस्तुतान् कर्मशेषानभिधाय द्वितीयपटले प्रस्तुतान् वदन् प्रतिष्ठास्थाननियममाह-कृत्वा गर्भगृहमिति। गर्भगृहं समन्तात् सप्तसप्तविभागेन कुलाद्रिकृतिकोष्ठाढ्यम् एकोनपञ्चाशत्कोष्ठयुतं कृत्वा ब्राह्मे मध्यमे पदे सौम्याग्रसूत्रैः दक्षिणोत्तरायतैः सूत्रैः समं पञ्चदशांशकान् विरचयेत्। तत्पृष्ठस्थितदैवमानुषपिशाचावारकेषु तस्य ब्रह्मपदस्य पृष्ठ एव स्थितेषु त्रिषु दैविकमानुषपैशाचाख्येषु आवरणपदेषु क्रमाद् विश्वोमेशनवांशकान् त्रयोदशैकाद(शे?श)नवभागानपि सौम्याग्रसूत्रैः समं कृत्वा ततः स्वं स्वं पदं स्थानं कल्पयेत्।।७।।

विवरणम्

प्रतिष्ठास्थानमाह-कृत्वा गर्भगृहमिति। गर्भगृहे प्रागग्राण्युदगग्राणि चाष्टाष्टसूत्राण्यास्फाल्य सप्तवर्गपदोपेतं सम्पादयेत्। तत्र मध्यमं पदं ब्राह्मसंज्ञम्। ततोऽनन्तरा परितः पङ्क्तिर्दैविकाख्या। ततोऽपि[1] परितो मानुषाख्या। ततः पैशाचाख्या। तत्र ब्राह्मे पदे पञ्चदशांशकान् विरचयेत्। मध्यगतं पदं दक्षिणोत्तरसूत्रैस्त्रयोदशभिः पञ्चदशभागान् विदध्यादित्यर्थः। सौम्याग्रसूत्रैरिति सर्वत्र सम्बध्यते। *तद्बाह्यस्थितेति। प्राग्द्वारे प्रासादे पश्चिमतः पश्चिमद्वारे तु पूर्वत इत्यर्थः। आवारकान्यावरणानि। पङ्क्तय इति यावत्। विश्वे त्रयोदश, उमेशा।।७।।

ब्राह्मेंऽशेन्तरनन्तरे महति चाल्पे चेशलिङ्गे हरौ
तार्तीये द्रुहिणांशमध्यपदतस्तुर्ये गुहेशाच्युते।
षष्ठे सुम्भजिति प्रतिष्ठितिपदं शाङ्गींश्वरे वाष्टमे
प्रोक्तं शस्तरि षोडशे गणपतौ विंशे तथैकोत्तरे।।८।।

विमर्शिनी

तत्र महति पञ्चकरादिदीर्घे ईशलिङ्गे स्थाप्ये सति ब्राह्मे अंशे अन्तः ब्रह्मांशस्य मध्यभाग एव प्रतिष्ठितिपदं प्रतिष्ठायाः स्थानं प्रोक्तं स्यात्। अल्पे एककरादिके

---

१. 'विपरीतो' क पाठः। *तत्पृष्ठेत्यस्य स्थाने तद्बाह्येति विवरणरीत्या पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

ईशलिङ्गे तस्यानन्तरे अनन्तरपृष्ठपदमध्ये प्रोक्तम्। हरौ द्रुहिणांशमध्यपदतः ब्रह्मांशस्य मध्यपदमारभ्य गणने तार्तीये। गुहेशाच्युते स्कन्दे शङ्करनारायणे च तुर्ये चतुर्थे। सुम्भजिति षष्ठे पदे। शाङ्गीश्वरे अष्टमे वा। पूर्वं चतुर्थे प्रोक्तत्वाद् विकल्पः। शास्तरि द्रुहिणांशमध्यपदतः षोडशे दैविकाद्यपदादष्टमे। तथा गणपतौ द्रुहिणांशमध्यपदत एकोत्तरे विंशे दैविकान्त्यपदे प्रतिष्ठितिपदं प्रोक्तम्।।८।।

विवरणम्

महत्यल्पे चेशलिङ्गे ब्राह्मेऽन्तः अनन्तरे प्रतिष्ठितिपदे प्रोक्तमिति सर्वत्र सम्बन्धनीयम्। अन्तरिति मध्ये पञ्चदशसु भागेषु। अष्टमे भागे। अनन्तरे ततो बहिर्भागे। द्वितीय इत्यर्थ।।८।।

कृत्वोदङ्मुखमत्र सूत्रमथ मध्याद् द्वारविस्तारत-
स्तूत्कृत्याढ्यशतांशकं प्रतिगमय्योदीचि चैन्द्राग्रगम्।
सर्वेष्वीशहरीशयोः पुनरिदं वार्चांशतो वाखिले
दिश्यैश्यां गमयेद् यवं यवयुगं वार्चोद्भवं सन्धितः।।९।।

विमर्शिनी

एवं पृष्ठतो नीत्वात्र सीम्नि उदङ्मुखं दक्षिणोत्तराग्रं सूत्रं कृत्वा तदनन्तरं सर्वेषु देवेषु मध्यात् एतत्सूत्रस्य मध्यात् द्वारविस्तारतः द्वारस्य विस्ताराद् उत्कृत्याढ्यशतांशकम् उत्कृतिः षड्विंशतिः तदधिकशतांशं कृत्वा तदेकांशप्रमाणेनोदीचि च प्रतिगमय्य ऐन्द्राग्रगं प्राक्प्रत्यगग्रं सूत्रं च कृत्वा इदम् उक्तमेतदुदग्गमनमीशहरीशयोः पुनरर्चांशतो वा कृत्वा अखिले सर्वदेवेषु सन्धितः तयोः सूत्रयोः सन्धेरर्चोद्भवं यवं यवयुगं वा प्रतिमाङ्गुलादष्टांशं चतुर्थांशं वा ऐश्यां दिशि च गमयेत्। अत्र विष्णुसंहितायां-

"सप्तसप्तविभागेन गर्भागारे विभाजिते।
ब्रह्मदेवमनुष्याणां पिशाचानां पदानि च।।
मध्यादारभ्य यत्नेन क्रमाज्ज्ञेयानि सर्वतः।
ब्राह्मं पञ्चदशांशं स्याद् दैवे भागास्त्रयोदश।।

Shripuram Publications
www.shripuram.org

एकादशनवांशाश्च शिष्टयोः प्रविभागतः।
गमनं त्रिविधं प्रोक्तं पृष्ठसौम्येशभेदतः।।
कल्पनीयं यथान्यायं द्रव्यसंस्थानयोगतः।
स्थितासीनशयानानां स्थानानि परिकल्पयेत्।।
ब्रह्मांशे मध्यमं त्यक्त्वा द्वितीयं चापि पृष्ठतः।
स्थितैकवीरबिम्बस्य तृतीयं स्थानमिष्यते।।
त्रिभक्ते द्वारविस्तारे त्रिसप्तांशेषु मध्यमे।
मध्यार्धेनोत्तरं सूत्रं गमनार्थं तु कल्पयेत्।।
पश्चिमोत्तरसंयोगे कर्णसूत्रं प्रकल्प्य तु।
बिम्बाङ्गुलीयवेनैशे गमयेद् द्वियवेन वा।।"

इति। तथा मञ्जर्यां च-

"पञ्चाशत्पदमेकहीनमभितः कृत्वा च गर्भालये
ब्राह्मं दैविकमानुषौ च परितः पैशाचमन्त्यावृति।
ब्राह्मं पञ्चदशांशकं बहिरतो द्वे द्वे विहीनं क्रमा-
देवं पश्चिमदिक्स्थितं च गमनं वक्ष्ये च सौम्याश्रितम्।।
एकविंशतिविभागविभक्तं द्वारमत्र विनिधाय च मध्यम्।
अग्निभक्तमभिकल्प्य च तेषां सोमसंस्थितपदद्वयमध्ये।।
एकोनपञ्चदशकानि पदानि लिङ्ग-
विष्कम्भमाननिहितानि विधाय सम्यक्।
तन्मध्यसंस्थमथ पञ्चकृतिप्रभिन्न[1]-
भागान्[2] प्रगल्प्य चतुरो य(माङ्गा?मगां)स्त्यजेद् वा।।
लिङ्गस्य पञ्चकृतिभिः परिणाहतोऽर्ध-[3]
भागैर्विभज्य यमदिक्स्थगतं त्यजेद् वा।
एकोनपञ्चदशभिः प्रविभज्य युक्तै-

१. 'न्नं'। २. 'त्' घ. ङ. च. ३. 'र्ध्व' ङ पाठः।

Shripuram Publications
www.shripuram.org

भागैश्च पीठमथ मध्यगतं त्यजेद् वा।।

एवञ्च नीत्वा गमनं च सूत्रसङ्गात् ततोऽत्रापि यवद्वयं च।
नीत्वा प्रतिष्ठां विदधीत चैशे भागे प्रवक्ष्याम्यथ पश्चिमेऽपि।।
मध्ये महालिङ्गमथाल्पलिङ्गं नारायणः शङ्करकेशवौ च।
तत्रैव षड्वक्त्रनिवासभूमिः स्याद् वासुदेवो भगिनी च पश्चात्।।
सुखासनं सप्तपदे विदध्यादतोऽष्टमे वा हरवासुदेवौ।
ततः परस्मिन् मणिलिङ्गधाम व्यासस्तथैकादशरुद्रभूमिः।।
सूर्यस्तथाग्निर्भिषजौ वसूनां गणश्च[1] शस्ता प्रहराणि भूयः।
अष्टादशे मातृनिवासभूमिस्ततः परस्मादथवायुधानि।।
स्याद् वाहनं सूकरवामनौ च लक्ष्मीश्च तत्रैव वसुन्धरा च।
अनन्तमूर्तिप्रहराणि पञ्च पश्चादनन्तासनवाहनानि।।
विद्येश्वराश्चाथ गणेश्वराश्च मार्ताण्डचन्द्रौ मुनयः प्रदिष्टाः।
पैशाचभागे तु ततोऽनवेक्ष्य प्रायः प्रतिष्ठात्र यतो न शस्ता।।"

इति। क्रियासारे शङ्करनारायणे उत्तरगमनविधौ-

"बिम्बमध्यमवृत्तस्य चतुर्विंशतिभागतः।
नीत्वोत्तरे यवं तस्मादीशे नीत्वा यथाविधि।।"

इति।।९।।

विवरणम्

पृष्ठगमनमुक्त्वोदग्गमनमाह-कृत्वेति। अत्रो[2]दङ्मुखं सूत्रं कृत्वेत्यन्वयः। यत्र भागे प्रतिष्ठापदमङ्कितं तत्र तस्मिन्नङ्क उदगग्रमप[3]रमपरमृजु सूत्रं सूत्रयेदित्यर्थः। द्वारस्य विस्तारमानं षड्विंशत्यधिकशतांशितं कृत्वा तदेकांशमात्रं तस्मादङ्कादुत्तरतो गमयित्वा तत्र प्रागग्रं सूत्रमापातयेत्। *अथाखिले दिश्यैश्याङ्गमयेदिति प्रागुदग्गमनमुच्यते।।९।।

---

१. 'णा' घ. च. पाठ २. 'त' च पाठः। ३. 'परं' परिमुज्य सुत्रं क पाठः। * 'तो वाखिले' इत्यस्य स्थाने 'तोऽथाखिले' इति विवरणद्वतः पाठः।

Shripuram Publications www.shripuram.org

ब्राह्मे कौतुकमामरे न्यसतु मूलार्चां स्थितामासिता-
मीषन्मानुषसंयुते समनृदेवांशे शयानामपि।
गर्भे षोडशवर्गभेदिनि पदैर्ब्राह्मं चतुर्वर्गकै-
स्त्रिद्व्येकोन्मितपङ्क्तिभिः सुरनृपैशाचान् प्रकुर्वीत वा।।१०।।

विमर्शिनी

बहुबेरे स्थाननियममाह-ब्राह्म इति। ब्राह्मेंऽशे कौतुकं कर्मार्चां न्यसतु। आमरे दैविकमध्ये स्थितां तिष्ठन्तीं मूलार्चां च, ईषन्मानुषसंयुते किञ्चिन्मानुषांशयुक्ते दैविके आसितामुपविष्टां च, समनृदेवांशे दैविकं मानुषं च सममाश्रिते स्थाने शयानामपि मूलार्चां न्यसतु। ब्रह्मादिपदकल्पनायां विकल्पमाह-गर्भ इति। गर्भे गर्भगृहे षोडशवर्गभेदिनि आयामविस्ताराभ्यां षोडश पुटे सति मध्ये चतुर्वर्गैः षोडशभिः पदैः ब्राह्मं स्थानं प्रकुर्वीत। त्रिद्व्येकोन्मितपङ्क्तिभिः ब्रह्मस्थानाद् बहिः पुटत्रयेण पुटद्वयेन पुटैकेन च क्रमात् सुरनृपैशाचान् दैविकमानुषपैशाचानावरणभागान् प्रकुर्वीत वा। तथा विष्णुसंहितायां-

"किञ्चिन्मानुषमाश्रित्य कुर्यादासनकर्म च।
दैवमानुषभागाभ्यां कुर्याच्च शयनं बुधः।।
अर्चनापीठिका ब्राह्मे स्थापना दैविके यदा।
मानुषेऽस्य परीवाराः पैशाचे त्वायुधानि च।।"

इति। तत्र किञ्चिन्मानुषमाश्रित्येत्येतस्यायमर्थः - नालं चतुर्धा विभज्यांशत्रये दैविके एकं मानुष इति। तत्र बहुवीरदैविके स्थापना स्थिता प्रतिमा विहिता इति च।।१०।।

विवरणम्

एवं तावदेकबेरविषयं प्रतिष्ठास्थानमुक्त्वा बहुबेरविषयमाह-ब्राह्मे कौतुकमिति। तत्र गर्भगृहस्य विभजने भेदमाह - गर्भे षोडशवर्गेति।।१०।।

ब्राह्मे षोडशमंशकं स्वपुरतो मध्याद् दलाढ्यैककं
वामे चाप्यपहाय वह्निभुवि बिम्बं स्थापयेत् स्थास्नुकम्।

Shripuram Publications
www.shripuram.org

एवं मानुषमध्यतोऽथ गमयित्वा पृष्ठतो वामत-
श्चांशे स्थापयतु स्वमूलमनुबिम्बं बाहुबेरे विधौ।।११।।

विमर्शिनी

षोडशमंशकमित्यस्यायमभिप्रायः-षोडशांशीकृतस्य ब्रह्मभागस्य मध्यसूत्रात् पृष्ठगतं पदं त्र्यंशीकृत्य तमेकमंशं वा अर्धसहितं द्व्यंशं वा पृष्ठतो गमयेत्। तन्मानं तदर्धं वा वामतश्च नयेदिति। वह्निभुवि बाहुबेरे विधौ ब्राह्मे उक्तैकोनपञ्चाशत्कोष्ठैः कल्पितम[1]ध्ये पदे षोडशमंशकं ब्रह्मभागस्य षोडशांशं मध्यात् स्वपुरतः अपहायातिक्रम्य दलाढ्यैककम् अर्धाधिकैकभागं वामे भागे चाप्यपहाय स्थास्नुकं निश्चलं यागबिम्बं वा स्थापयेत्। अथ मानुषमध्यतश्च एवमुक्तप्रकारेण पृष्ठतो वामतश्च गमयित्या परस्मिन् अंशे स्वमूलमनुबिम्बं स्थापयतु। तथाच स्कन्दसद्भावे-

"पदान्येकोनपञ्चाशत् कल्पयित्वा विचक्षण!।
पदमेकं भवेद् ब्राह्मम्"

इत्यादि। पुनः-

"ब्राह्मं षोडशधा कृत्वा भागं सूत्रेण साधकः।
तत्त्र्यंशं वा तदर्धं वा मध्यात् प्रागुत्तरक्रमात्।।
प्राङ्मुखे तु भवेदेवं पश्चिमे दक्षिणात् परम्।
तन्मध्ये स्थापयेद् बिम्बं तैजसं शैलजं तु वा।।
मणिजं रत्नजं वापि इतरत्र कदाचन।
मृन्मयं दारुजं चापि मानुषेऽप्येवमेव तु।।
एकवीरासनं ब्राह्मे पश्चिमार्धे तु कल्पयेत्।
एतदेवार्चनापीठं बहुबेरासने भवेत्।।
बहुवीरासनं तद्वन्मानुषार्धे तु पश्चिमे।"

इति। स्कन्दसंहितायां च-

"ब्राह्मं षोडशधा भङ्क्त्वा भागमेकं पुनस्त्रिधा।

---

१. 'ध्यप' ङ. पाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

तद्भागगमनं प्राच्यां तदर्धं तत् तथोत्तरे।।

प्राङ्मुखे तु भवेदेवं पश्चिमे दक्षिणात् परम्।।"

इत्यादि। नन्दिप्रोक्ते स्कान्दे[1] च-

"ब्राह्मं षोडशधा भङ्क्त्वा नवमं विभजेत् त्रिधा

स्थितैकवीरबिम्बस्य तृतीयं स्थानमिष्यते।।

तन्मानेन तदर्धेन सौम्ये चैशे यमेऽसुरे।।"

इति।।११।।

विवरणम्

तत्रापि कौमारे भेदमाह-ब्राह्मे षोडशमिति।।११।।

बहुबेरविधानमूलबिम्बं सुसमं द्वारसमुच्छ्रयेण कार्यम्।

चरणांशविवृद्धमर्धवृद्धं चरणोनद्विगुणं द्विसंगुणं च।।१२।।

विमर्शिनी

तत्रैव वह्निभुवि बहुबेर[2]प्रतिमाप्रमाणमाह-बहुबेरेति बहुबेरविधानमूलबिम्बं द्वारसमुच्छ्रयेण द्वारोन्नत्या सुसमं कार्यम्। चरणांशविवृद्धतच्चतुर्थांशयुक्तं द्वारोत्सेधं च, अर्धवृद्धम् अर्धेन सहितं द्वारोत्सेधं च, चरणोनद्विगुणं त्रिभागेन सहितं द्वारोत्सेधं, द्विसंगुणं द्विवृद्धं द्वारोत्सेधं च। तथा स्कन्दसंहितायाम्-

"एकवीरे भवेदेवं बहुवीरे त्वथोच्यते।

अध्यर्धां पादहीनं वा द्विगुणं चोत्तमत्रयम्।।

पादाधिकं पादमानं मध्यमं कन्यसं क्रमात्।

दारुमृन्मयजान् नित्यं द्वारमानेन मानयेत्।।"

इति।।१२।।

विवरणम्

बहुबेरविधौ मूलबिम्बप्रमाणमाह-बहुबेरविधानेति।।१२।।

---

१. 'स्क' ख. ङ. पाठः। २. 'परिमा' ख पाठः।

Shripuram Publications
www.shripuram.org

पात्राणि वापविहितानि पृथग् द्विषड् वा
स्युः पालिकाश्च घटिकाश्च शरावकाश्च।

तत्त्वाष्टिभानुभिरिह प्रमिताङ्गुलैस्त-
दुत्सेधक्लृप्तिरथवाष्टिचतुर्दशार्कैः।।१३।।

विमर्शिनी

तृतीयपटले प्रस्तुतान् कर्मशेषानाह-पात्राणीति। वापविहितानि बीजवापार्थं विहितानि पात्राणि पृथक् प्रत्येकं द्विषट् द्वादश वा स्युः। 'तेषु विनिदध्यात् पालिकाः षोडशे'त्युक्तेन ग्रन्थेनायं विकल्पः। तानि क्रमेणाह-पालिकाश्च घटिकाश्च शरावकाश्चेति। संज्ञासंस्थानभेदाभ्यां योगात् त्रिविधानि तानीत्यर्थः। तत्त्वाष्टिभानुभिः चतुर्विंशतिषोडश-द्वादशभिरङ्गुलैस्तदुत्सेधक्लृप्तिः तेषां पात्राणामुत्सेधस्थितिः। अथवा अष्टिचतुर्दशार्कैः क्रमेण षोडशचतुर्दशद्वादशभिर्वा तदुत्सेधक्लृप्तिः स्यात्।।१३।।

विवरणम्

अथ पालिकालक्षणे वक्तव्ये घटिकालक्षणमपि[१] वक्तुं पात्रविकल्पं तावदाह-पात्राणीति। पृथक् द्विषड्वा[२] स्युः। प्रत्येकं द्वादश वा स्युः। केवलपालिकापक्षस्य बुद्धिस्थत्वात्तेन[३] सहायं विकल्पो द्रष्टव्यः।।१३।।

तत्त्वांशकोनमुदितोच्छ्रयमत्र कृत्वा
षोढा द्वयेन वदने क्रमशः परांशैः।

तत्पीठदण्डगलसन्धिगलेषु कुर्याद्
दैर्घ्यं पुरोविरहितेन च पीठसन्धौ।।१४।।

अङ्घ्र्यूनमंशमधिपीठमिहाधिदण्डं
चैके समुच्छ्रयमुशन्त्यपरेऽर्धवृद्धम्।

पीठेऽङ्घ्रिहीनमपरत्र च शिष्टयुक्त्या
सन्धिं गलांशगतमास्यबिलं च कार्यम्।।१५।।

---

१. 'कादीन' च. पाठः। २. 'त्रि' क. पाठः। ३. 'त्वेन' क. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

अथ श्लोकत्रयेण पालिकालक्षणमाह-तत्त्वांशकोनमिति। अत्र एषु पात्रेषु मध्ये। मङ्गलपालिकाया इति जातावेकवचनम्। मङ्गलभूतानां पालिकानाम् उदितोच्छ्रयम् उक्तसमुत्सेधं तत्त्वांशकोनं चतुर्विंशांशोनं कृत्वा शेषं षोढा कृत्वा द्वयेन द्व्यंशेन वदने दैर्घ्यं कुर्यात्। परांशैः परैश्चतुर्भिरंशैः क्रमशः तत्पीठदण्डगलसन्धिगलेषु तासां पालिकानां पीठे दण्डे गलसन्धौ गले च दैर्घ्यं कुर्यात्, पुरोविरहितेन पूर्वं त्यक्तेन चतुर्विंशांशेन पीठसन्धौ च।।१४।।

एके बुधाः इह उक्ते दैर्घ्ये अधिपीठं पीठे अधिदण्डं दण्डे चोक्तषडंशाद् अङ्घ्र्यूनमंशं समुच्छ्रयं दैर्घ्यं कार्यमुशन्ति इच्छन्ति। अपरे बुधाः पीठे अर्धवृद्धम् अर्धेनाधिकम्, अपरत्र दण्डे अङ्घ्रिहीनम् उक्तादंशाद् अङ्घ्रिहीनं च समुच्छ्रयमुशन्ति। शिष्टयुक्त्या शिष्टयोगेन सन्धिं पीठसन्धिं गलसन्धिं चेच्छन्ति। गलांशगतं गलांशेऽप्यधिगतम् आस्यबिलं मुखविवरं च कार्यम्। गलांशपर्यन्तमास्यबिलं च कार्यमिति वार्थः।।१५।।

विवरणम्

पालिकावयवक्लृप्तिमाह– §एकाङ्गुलोनमिति। तत्त्वाष्ठीत्येवं द्विधोक्तं पालिकाया उत्सेधमेकाङ्गुलोनं मनसा संकल्प्य तत्समं षोढा विभजेत्। तत्र द्वाभ्यां भागाभ्यां पालिकाया वदनं पुनरेकैकेन पीठादिचतुष्टयं कुर्यात्। पुरोविरहितेन एकाङ्गुलेनमिति परित्यक्तेन पीठसन्धिः। पीठदण्डयोस्सन्धिरिति यावत्। एकेऽपर इत्याचार्यवशाद् विकल्पं ब्रुवंस्तत्वाष्टिप्रमाणयोरन्यतरस्याचार्यवशाद् भिन्नस्य पञ्चविंशत्यङ्गुलोत्सेधस्यैवाय-मवयवक्लृप्तिविकल्प इति दर्शयति। इह पञ्चविंशत्यङ्गुलायां पालिकायां पीठे दण्डे च दर्शितोत्सेधं निजचतुर्भागरहितं एकैकं कथयन्ति। पीठे स्वार्थप्रमाणेनाधिकं स्वप्रमाणं दण्डे पूर्ववन्नि[1]जचतुर्भागहीनमेवापरे वदन्ति। नन्विह पक्षद्वयेऽवशिष्यमाणस्य[2] द्व्यङ्गुल-स्याङ्गुलस्य च कोपयोग इत्यत्राह-*इष्टयुक्त्येति। गलसन्धिवर्जं सर्वेष्ववयवेषु कल्पितेषु यावच्छिष्यते पञ्चाङ्गुलं त्र्यङ्गुलं वा तेन गलसन्धिरित्यर्थः। गलांशगतमास्यविलमिति गलस्यांशं गतं प्राप्तमेव। न तत्र प्रविष्टम्। यद्वा गलस्यांशे गतं तत्रापि प्रविष्टमिति वार्थः।।१४, १५।।

---

१. 'न्नियमच'। २. 'स्याङ्गुलस्य च' क. पाठः। §"तत्त्वांशकोनमित्यस्य स्थाने एकाङ्गुलोन'मिति।" *'शिष्टयुक्त्या' इत्यस्य स्थाने 'इष्टयुक्त्या' इति विवरणपाठः।

www.shripuram.org

दण्डे स्वदैर्घ्यसुसमं द्विगुणं स्वदैर्घ्याद्
व्यासं परेषु वियुगांशमधः शिरोधेः।
तत्पीठिकाविततिखण्डमितं च पीठ-
सन्धौ प्रकल्पयतु मङ्गलपालिकायाः॥१६॥

विमर्शिनी

दण्डे स्वदैर्घ्यसुसमं स्वदैर्घ्येण तुल्यं व्यासं प्रकल्पयतु। परेष्ववयवेषु स्वदैर्घ्यात् स्वस्वदैर्घ्याद् द्विगुणं, शिरोधेः (अधः) गलस्याधोभागे वियुगांशं गलाद् विगतचतुर्थांशं, पीठसन्धौ तत्पीठिकाविततिखण्डमितं तस्याः पीठिकायाः विस्तृ[1]तेरर्धमितं च प्रकल्पयतु॥१६॥

विवरणम्

परेषु वदनगलत्सन्धिपीठेषु। स्वदैर्घ्याद् द्विगुणं व्यासमित्यन्वयः। वियुगांशमधःशिरोधेरिति। गलादर्वाचीनानामवयवानां स्वस्वविस्तारं प्राप्तं चतुर्थांशेन विरहयेदित्यर्थः। अङ्घ्र्यूनमंशमित्यस्मिन् पक्षे तु विशेषः। युगशब्दो द्विवचनश्चतुष्टयवचनो वा ग्राह्यः। शिरोधेरध इति गलसन्धिमात्रमेव गृह्यते[2]। तेन ततोऽप्यर्वाचीनानां पीठतत्सन्धिदण्डानां यथोक्त एव व्यासो न तु चतुर्थभागहीनोऽर्धही[3]नो वा भवति॥१६॥

ऊर्ध्वार्धक्लृप्तपृथुबुध्नघटोत्तराङ्गे
दिक्षूर्ध्वतश्च घटिका घटितेषुवक्त्रैः।
वर्णाङ्गुलप्रततिभिः सगलैरधोर्धे
तत्पालिकावदुदिताङ्घ्रिसन्धिदण्डा॥१७॥

विमर्शिनी

घटिकालक्षणमाह-ऊर्ध्वार्धेति। ऊर्ध्वार्धक्लृप्तपृथुबुध्नघटोत्तराङ्गे ऊर्ध्वार्धेन क्लृप्तो महदन्तर्भागयुतो घटो यथा भवति तथाभूतोर्ध्वप्रदेशे चतुर्षु दिक्षूर्ध्वतश्च वर्णाङ्गुलप्रततिभिः चतुरङ्गुलविस्तारैः सगलैः गलसहितैः इषुवक्त्रैः पञ्चभिर्मुखैः घटिता बद्धा घटिका स्यात्। अधोर्धे तत्पालिकावद[4]ङ्घ्रिससन्धिदण्डा अङ्घ्रिः पीठं पीठसन्धिसहितो दण्डश्च

---

१. 'तै' क पाठः। २. 'ते। न' च. पाठः। ३. 'र्ध्व' च. पाठः। ४. 'द् उक्तपालिकादङ्घ्रि' घ. च. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

पालिकावदुदितेत्यर्थः ।।१७।।

विवरणम्

अथ घटिकां लक्षयति-ऊर्ध्वार्धेति । घटिकोत्सेधमानं द्विधा कृत्वा तत्रोपरिभागेन पृथु बुध्नं विस्तीर्णपृष्ठोद्देशं घटं विरचयेत् । तं घटाकारं द्विधा समं मनसा विभज्य तत्रोत्तरे भागे चतुर्दिक्षूपरि च पञ्चमुखानि घटवदनसदृशाणि कुर्यात् । तेषां चतुरङ्गुलो विस्तारः । ....त्येकं गलं च यथाशोभं कार्यम् । तत्पालिकावदिति । अष्ट्यङ्गुलघटिकास्तत्वाङ्गुलपालिकाबद्विरचनं चतुर्दशाङ्गुलाया अष्ट्यङ्गुलपालिकावदेकधा विरचनमित्यर्थः ।।१७।।

अब्ध्यङ्गुलात् समधिके सति पालिकायाः
पीठोच्छ्रये तु घटिकाघटिताङ्घ्रिदण्डौ ।

त्रिद्व्यङ्गुलोच्छ्रयनिजोच्चसमप्रतानौ
स्यातामिनाङ्गुलमितः सकलोच्छ्रयो[१] वा ।।१८।।

विमर्शिनी

पालिकायाः पीठोच्छ्रयो अब्ध्यङ्गुलात् चतुरङ्गुलात् समधिके सति तत्र तु घटिकाघटिताङ्घ्रिदण्डौ घटिकायां योजितौ पीठदण्डौ त्रिद्व्यङ्गुलोच्छ्रयनिजोच्चसमप्रतानौ क्रमात् त्रिद्व्यङ्गुलाभ्यामुच्चौ निजोच्चसमविस्तारौ च स्याताम् । घटिकायाः सकलोच्छ्रयः इनाङ्गुलमितः द्वादशाङ्गुलप्रमितो वा स्यात् ।।१८।।

विवरणम्

तत्र कञ्चिद्विशेषमाह-अब्ध्यङ्गुलादिति । यदा स्वपालिकापीठं चतुरङ्गुलादधिकमुन्नतं स्यात् तदा घटिकायाः पीठं त्र्यङ्गुलं, दण्डो द्व्यङ्गुलः । तयोर्विस्तारस्तून्नतितुल्यः । तत्र च घटिकायाः कृत्स्न उत्सेधो द्वादशाङ्गुल एव । न तु चतुर्दशाङ्गुल इत्यर्थः ।।१८।।

व्यासेन दैर्घ्यसुसमं दहनांशहीनं
वास्ये ततो हुतवहांशततं च पीठे ।

१. 'यश्च ।। ख पाठः ।

Shripuram Publications
www.shripuram.org

कुर्याच्छरावमपकन्धरपालिकाव-
दूर्ध्वार्धमस्य घटिकावदथाधरार्धम्[1] ।।१९।।

विमर्शिनी

शरावलक्षणमाह-व्यासनेति। शरावम् आस्ये मुखे व्यासेन विस्तरेण दैर्घ्यसुसमं दहनांशहीनां त्र्यंशहीनं वा कुर्यात्। पीठे ततो मुखविस्तारात् हुतवहांशततं त्र्यंशविस्तारं च। अस्य शरावस्योर्ध्वार्धम् अपकन्धरपालिकावत् अपगतगलपालिकावत्, अथास्याधरार्धं घटिकावच्च कुर्यात्।।१९।।

विवरणम्

शरावलक्षणमाह- व्यासेनेति। मुखे व्यासेन दैर्ध्यसुसमं द्वादशाङ्गुलमिति यावत्। दहनांशहीनं त्र्यंशहीनं नवाङ्गुलं वेति यावत्। ततो हुतवहांशततं पीठ इति। द्वादशाङ्गुले मुखव्यासे त्र्यंशततं तृतीयांशततं वा। नवाङ्गुले तु तृतीयांशततमेवेत्यभिप्रायः। अस्योर्ध्वार्धमपकन्धरपालिकावदति। गलमुखव्यासार्धततं बिलतलमित्यर्थः। अस्यापरार्धं घदिकावदिति। पीठसन्धिगलसहितमित्यर्थः। घटिकात्र द्वादशाङ्गुलैव[2] गृह्यते।।१९।।

पीठाग्रकार्श्यपरिशोषितमूलकार्श्य-
वृत्तिक्रियादिरचना सकलेषु कार्या।
स्युस्तानि लोहरचितान्यथ मार्त्तिकानि
पात्राणि विष्णुविधिधूर्जटिदैवतानि।।२०।।

विमर्शिनी

सकलेषु पालिकाघटिकाशरावेषु पीठाग्रकार्श्यपरिशोषितमूलकार्श्यवृत्तिक्रियादिरचना पीठे क्रमेणाग्रकृशता परिशेषितेषु दण्डादिषु मूलस्य कृशता च वृत्तिकरणं रेखाविशेषादीनां रचना च कार्या। तानि पात्राणि लोहरचितानि लोहानामन्यतमेन रचितानि, अथवा मार्त्तिकानि मृदा निर्मितानि स्युः। विष्णुविधिधूर्जटिदैवतानि पालिकादयः क्रमेण विष्णुब्रह्मरुद्रदेव[3]त्यानि च स्युः।।२०।।

विवरणम्

परिशेषितमूलकार्श्येति। वदनाद्यवयवानां निजनिजमूलप्रदेशे तनुत्वं कार्यम्।

---

१. 'प' ख. घ. पाठः। २. 'ल एव' क. पाठः। ३. 'दै' इति व्याख्याकोशपाठः।

Shripuram Publications
www.shripuram.org

आदिशब्देन हनून्नतिमुखविकासादयो मुक्तादामाद्यलङ्कारश्च विवक्षिताः। विष्णुविधि-धूर्जटिदैवतानिति त्रिपा[१]त्रपूजनार्थमेतदुक्तम्।।२०।।

क्षेत्रे षट्कृतिकोष्ठके पदचतुष्केऽन्तर्गते पालिका
न्यस्येद् द्वादश दिग्विद्वकेष्वपि बहिः कोणत्रिकोष्ठेष्वथ।
अग्न्या[२]द्यं घटिकाः परेष्वपि शरावान् पालिकादीत्रयं
प्राक्प्रत्यङ्मुखवीथिकाविनिमयाद् वा वह्निकोष्ठादितः।।२१।।

विमर्शिनी

बीजवापकाले तेषां स्थापने नियममाह-क्षेत्र इति। षट्कृतिकोष्ठके आयामतो विस्तार(त)श्च षट्पुटवशात् षट्त्रिंश[३]त्पदे क्षेत्रे अन्तर्गते पदचतुष्के चतस्रः, बहिर्दिग्द्वि(दे?)केषु द्वादश शरावांश्च(?)। अथवा पालिकादित्रयं पालिकाघटिकाशरावान् प्राक्प्रत्यङ्मुखवीथिकाविनिमयात् प्राङ्मुखानां प्रत्यङ्मुखानां षण्णां पङ्क्तीनां व्यत्यासेन वह्निकोष्ठादितः बह्निकोष्ठमारभ्य दक्षिणवीथ्यां, पश्चिमत आरभ्य तदुत्तरवीथ्यां च द्वादश पालिकाः न्यस्येत्। तदुत्तरतः पूर्वादारभ्य पश्चिमत आरभ्य च वीथिद्वये घटिकाश्च, तथैव च तदुत्तरतो वीथिद्वये शरावांश्च न्यस्येत्।।२१।।

विवरणम्

अथैषामुचितं क्षेत्रं विन्यासप्रकारञ्चाह-क्षेत्र इति। मध्यगतचतुष्पदे तत एकपुटान्तरितेषु चतुर्दिग्गतद्विकेषु च द्वादश पालिकाः स्थापनीयाः चतुष्कोणगतत्रिकेषु घटिकाः। अन्तरालावशिष्यमाणपुटेषु शरावाश्चेत्यर्थः।।२१।।

तोरणानि युगहस्तमितानि क्ष्मोर्ध्वमर्धविवृतानि भवन्ति।
केतवः सुरगृहोत्तरदीर्घाः स्वोक्तवर्णसुविचित्रपताकाः।।२२।।

विमर्शिनी

चतुर्थपटलगतान् सर्मशेषान् वदन् तोरणादीनां प्रमाणमाह-तोरणानीति। तोरणानि क्ष्मोर्ध्वं भूमेरुपरि युगहस्तमितानि चतुर्हस्तप्रमितानि अर्धविवृतानि आयामादर्धेन द्विकरेण विस्तृतानि च भवन्ति। केतवः ध्वजाः सुरगृहोत्तरदीर्घाः प्रासादोत्तरदैर्घ्यसमानदीर्घाः स्वोक्तवर्णसुविचित्र-पताकाः स्वस्वदिक्षूक्तेन वर्णेनारुण्यादिना सुतरां विचित्राभिः पताकाभिश्च युक्ताः।

---

१. 'त्रपक्षे पात्रपू' क. च. पाठः। २. 'द्या' घ. पाठः। ३. 'शतुषट्पदे' ख. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

"अरुणोऽग्निनिभः कृष्णश्चैतः[1] पीतस्तथा सितः[2]।
श्वेतोऽन्यो बहुवर्णश्च कुमुदादिध्वजाः क्रमात्।।"

इत्यादयः स्वागमेषूक्ता[3] वर्णाः।।२२।।

प्रागग्रं सूत्रमुर्व्यामृजुतरमभिकल्प्यास्य मूलाग्रगाभ्यां
सूत्राभ्यां मत्स्ययुग्मं यमशशिहरितोः कल्पयित्वात्र सूत्रम्।
कृत्वा दिक्ष्वङ्कयित्वा सममिह विहितैस्सूत्रकैः[4] कोणमत्स्यान्
कृत्वास्फाल्यैषु सूत्रं रचयतु चतुरश्रं पुरः क्षेत्रक्लृप्तौ।।२३।।

विमर्शिनि

पञ्चमपटलगतान् कर्मशेषान् वदन् कुण्डमण्डलादीनां निर्माणार्थं चतुरश्रसाधन-क्लृप्तिमाह-प्रागग्रमिति। क्षेत्रक्लृप्तौ क्षेत्रकल्पनायां पुरः पूर्वम् उर्व्यां भूमौ ऋजुतरं यथा भवति तथा प्रागग्रं प्रत्यक्प्रागायतं सूत्रम् अभिकल्प्य आस्फाल्य अस्य सूत्रस्य मूलाग्रगाभ्यां मूलादग्राच्च गताभ्यां परस्परं समाभ्यां सूत्राभ्यां वृत्तीकरणेन यमशशिहरितोः दक्षिणोत्तरदिशोः मत्स्ययुग्मं कल्पयित्वा अत्र मत्स्यमध्ये दक्षिणोत्तरं सूत्रं कृत्वा चतसृषु दिक्षु समप्रमाणम् अङ्कयित्वा चिह्नं कृत्वा इह अङ्के विहितैः निक्षिप्तैर्मध्यपर्यन्तैः सूत्रैः कोणमत्स्यान् चतुर्षु कोणेषु मत्स्यान् कृत्वा एषु मत्स्येषु सूत्राण्यास्फाल्य चतुरश्रं कल्पयतु चतुष्पदोपेतं चतुरश्रं कुर्यात्[5]।।२३।।

विवरणम्

सम्प्रति कुण्डमण्डलसाधारणं चतुरश्रं क्षेत्रमुत्पादयितुमाह-प्रागग्रं सूत्रमिति। प्रथमं पश्चिमे सूत्रमूलं प्राक् च सूत्राग्रं विन्यस्यास्फालयेत्। पुनस्तन्मध्यात् सम्परिमाणेन सूत्रेण प्राक् पश्चाच्च अङ्कौ कृत्वा पश्चिमाङ्के सूत्रं निधाय तदग्रं पूर्वाङ्कपर्यन्तमायतं कृत्वा तेन सूत्रेण मध्याद्दक्षिणत उत्तरतश्च अङ्कौ कुर्यात्। एवं पूर्वाङ्कादपि तयोरङ्कयोरङ्कौ[6] कुर्यात्। तदा दक्षिणत उत्तरतश्च मत्स्यौ भवतः। तयोर्मत्स्ययोः सूत्रं विन्यस्यास्फालयेत्। तद्दक्षिणोत्तरसूत्रं भवति। पुनर्मध्याच्चतुर्दिक्षु क्षेत्रसीमारूपेण समसूत्रैरङ्कयित्वा तेभ्योङ्केभ्यस्तैरेव सूत्रैः प्रत्येकं क्षेत्रकोणेष्वङ्कयेत्। पुनस्तेषु मत्स्येषु सूत्राणि कुर्यात्। तानि चत्वारि दिक्सूत्राणि भवन्ति। तच्चतुरश्रं क्षेत्रमित्थं सम्पन्नं भवति।।२३।।

---

१. 'श्वे' घ. 'श्वे' घ. पाठः। २. 'चि' ङ. पाठः। ३. 'स्वसुक्ता' ख. पाठः। ४. 'नि' क. पाठः। ५. 'त्। क्षेत्र कुर्यात्।। त' घ. ङ. च. पाठः। ६. 'ङ्कौ कु' क. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

दोर्मात्रं परिसूत्र्य तत्र चतुरश्रं क्षेत्रमर्काङ्गुलं
खात्वा तद्द्विगुणं तु वावटतटे तन्मेखलाः कल्पयेत्।
मार्ताण्डाहियुगाङ्गुलोच्छ्रयमिताः[१] श्रुत्यङ्गुलव्यासिनी-
स्तिस्रोऽन्तः क्रमतो निजावटनिभाद्याब्ध्यश्ररूपे परे।।२४।।

विमर्शिनी

तत्र समान्यतः प्राप्तं चतुरश्ररूपं कुण्डमाह-दोर्मात्रमिति। अत्र कुण्डस्रुक्स्रुवमण्डला-दिकरणे पूर्वोक्तपालिकादिकरणे च मात्राङ्गुलं प्रमाणं स्यात्। तथाच रत्नावल्याम्-"अङ्गुलप्रमाणं त्रिविधं मानाङ्गुलं मात्राङ्गुलं देहलब्धाङ्गुलमिति। वातायनपथं गत्वा ये रविरश्मयो भान्ति, तत्र सूक्ष्मं विसर्पन्तो रेणवः। ताभिरष्टाभिः केशम्। एवं लिक्षं यूकं यवमिति क्रमशोऽष्टगुणैर्वृद्धं मानाङ्गुलं भवेत्। यजमानस्याचार्यस्य वा मध्यमाङ्गुलिमध्यपर्वायामो मात्राङ्गुलं स्मृतम्। प्रतिमायामं ताल[२]गणितं दशधा विभज्य एकं भागं द्वादशधा कृत्वा एकं देहलब्धाङ्गुलम्। तत्र प्रासादमण्डपादीन् मानाङ्गुलेन गणयेत्। यागोपकरणानि मात्राङ्गुलेन। देहलब्धप्रमाणेन प्रतिमामिति" इति। अत्र कुण्डादीनां यागोपकरणत्वादत्र मात्राङ्गुलं प्रशस्तम्। तच्चतुर्विंशत्यङ्गुलमिह दोर्मात्रं विवक्षितम्। दोर्मात्रं करमितं चतुरश्रं क्षेत्रं परिसूत्र्य परितः सूत्रपातै। सन्पाद्य अर्काङ्गुलं द्वादशाङ्गुलं तद्द्विगुणं तु वा निम्नतायुक्तं खात्वा अवटतटे गर्तप्रान्ते एकामङ्गुलिं त्यक्त्वा वान्यथा वा तिस्रः तन्मेखलाः, तस्यावटस्य मेखलारूपाः संस्थानविशेषाः, कल्पयेत्। तास्त्व[३]न्तःक्रमतः अन्तरारभ्य क्रमेण मार्ताण्डाहियुगाङ्गुलोच्छ्रयमिताः द्वादशाष्ट-चतुस्संख्यैरङ्गुलैर्मितोत्सेधयुक्ताः श्रुत्यङ्गुलव्यासिनीः चतुरङ्गुलविस्तारयुक्ताः। तास्वाद्या अन्तर्गता निजावटनिभा चतुरश्रभगाकारधनुर्वक्रादिकुण्डेषु यादृशोऽवटः तादृशी भवेत्। परे मध्यमा बाह्या च अब्ध्यश्ररूपे चतुरश्रसंस्थाने च भवेताम्।।२४।।

विवरणम्

सर्वकुण्डप्रकृतिभूतमाचार्यकुण्डं लक्षयति-दोर्मात्रमिति। प्रथमं तावत् हस्तपरिमितं चतुरश्रं क्षेत्रं सूत्रयित्वा तत्र द्वादशाङ्गुलं हस्तमात्रमेव वावटं खात्वा तस्यावटस्य तटे अन्तरारभ्य क्रमतस्तिस्रस्तन्मेखलाः कुर्यात्। तत्रान्तर्मेखलाया द्वादशाङ्गुलोन्नतिः। मध्यमाया अष्टाङ्गुला। बाह्यायाश्चतुरङ्गुला। विस्ता[४]रस्तु तिसृणामपि चतुरङ्गुल एव भवति।

---

१. 'यु' इति मूलकोशपाठः। २. 'गु' ३. 'स्व' ङ पाठः। ४. 'र इति ति'।

Shripuram Publications
www.shripuram.org

निजावटनिभा यासामाद्या अब्ध्यश्ररूपे यासामितरे इति च स समासः। सर्वकुण्डापेक्षञ्चैतत्। अन्तर्मेखला तावच्चतुरश्रकुण्डे चतुरश्ररूपा। वृत्ते वृत्ता। त्र्यश्रे त्र्यश्रात्मिका। मध्यमा बाह्यापि सर्वत्र चतुरश्रैवेत्यर्थः।।२४।।

योनिं पश्चिममेखलोपरि मितामर्काङ्गुलैरुच्छ्रया-
यत्योः सार्धयुगाङ्गुलैरपि तदूनैस्तैश्च विस्तारतः।
आम्नायाङ्गुलनालकां ससुषिरां स्वाख्यानयोग्याकृतिं
कुर्यात् कुण्डनतां स्वमूलपरिवृत्त्यग्रप्रक्लृप्त्यादिना।।२५।।

विमर्शिनी

कुण्डानां योनिलक्षणमाह-योनिमिति। पश्चिममेखलोपरि पश्चिमदिग्भवानां मेखलानामुपरि उच्छ्रयायत्योः उत्सेधे दैर्घ्ये च अर्काङ्गुलैः द्वादशाङ्गुलैर्मितां, विस्तारतः सार्धयुगाङ्गुलैः अर्धसहितयुगाङ्गुलैः। अर्काङ्गुलार्धं षडङ्गुलं, युगाङ्गुलं चतुरङ्गुलं, तैः दशाङ्गुलैरित्यर्थः। तदूनैः तस्मात् क्रमेणोनैः तैः सार्धयुगाङ्गुलैः। तत्राप्यर्धशब्देन षडङ्गुलमुच्यते। युगशब्देन चतुरङ्गुलं द्व्यङ्गुशं च। मध्ये दशाङ्गुलैः पुनः क्रमात् षडङ्गुलैश्चतुरङ्गुलैरग्रे द्व्यङ्गुलाभ्यां च मितां योनिं कुर्यात्। तथाच मञ्जर्यां-

"तालायता जलपतेर्दिशि संस्थिता स्यादश्वत्थपत्रसदृशा क्रमशोऽथ निम्ना।
नाभिर्दशाङ्गुलषडङ्गुलतः क्रमेण विस्तारतश्च चतुरङ्गुलगोलकाग्रा।।"

इति। अथवा उच्छ्रयायत्योः सार्धयुगाङ्गुलैरर्काङ्गुलैर्मिताम्। तत्पक्षे सार्धयुगाङ्गुलैरित्यस्यार्धसहितयुगाङ्गुलैस्त्र्यङ्गुलैरित्यर्थो भवति। ततः त्र्यङ्गुलसहितद्वादशाङ्गुलैः पञ्चदशाङ्गुलैरित्यर्थः। तत्र विस्तारतस्तदूनैः। अत्र तच्छब्देन युगाङ्गुलमेव गृह्यते। युग्माङ्गुलोनैः तैः दशाङ्गुलैरित्यर्थः। तैरिति द्वादशाङ्गुलैरिति चार्थः। तथाच प्रपञ्चसारे-

"उत्सेधायामकाभ्यां प्रकृतिविकृतिसंज्ञाङ्गुलाष्टाङ्गुला स्याद्
विस्तृत्या द्वादशार्धाङ्गुलमितनमिताग्रा प्रविष्टेव कुण्डे।"

इति। तथाच आम्नायाङ्गुलनालकां चतुरङ्गुलमितनालयुक्तां, ससुषिराम् अधोभागे परिस्तरणादिसिद्ध्यर्थं सुषिरेण युक्तां, स्वमूलपरिवृत्त्यग्रप्रक्लृप्त्यादिना स्वस्या योनेर्मूलप्रदेशस्य परिवर्तनेनाग्रक्लृप्त्यादिसंस्थानविशेषेण च स्वाख्यानयोग्याकृतिं स्वस्या

Shripuram Publications
www.shripuram.org

योनेराख्यानस्य नाम्नः सदृशाकारयुक्तां, कुण्डनतां कुण्डे क्रमेणानतां च योनिं कुर्यात्।।२५।।

विवरणम्

पश्चिममेखलोपरि योनिं कुर्यात् इति सम्बन्धः। उच्छ्रयायत्योरर्काङ्गुलैस्सार्धयुगाङ्गुलैरपि मितां उत्सेधे आयामे च केवलैर्द्वादशाङ्गुलैः परिमितां द्व्यङ्गुलाधिकैर्द्वादशाङ्गुलैः एकाङ्गुलाधिकैस्तैर्वा परिमितामित्यर्थः। युगस्यार्धमर्धयुगम्। युगशब्देन चतुस्संख्या द्विसंख्या वा लक्ष्यते। तदूनैस्तैश्च विस्तारतो मितां, तच्छब्देनार्धयुगं गृह्यते। अर्धं युगं येषान्तान्यर्धयुगानि चतुरङ्गुलानीति यावत्। तदूनैरर्धाङ्गुलैरष्टाङ्गुलैरित्यर्थः[१]। अर्धं युगस्यार्धयुगं द्व्यङ्गुलं तदूनैर्दशाङ्गुलैरिति यावत्। तैश्चेति। केवलैरर्काङ्गुलैरपीति[२][३] योज्यम्। इति त्रिधा योनेर्विस्तारायामावभिहितौ। ससुषिरामिति। मेखलासन्धौ परिस्तरणार्थं सुषिरं कार्यमित्यर्थः। स्वमूलपरिवृत्त्यग्र(प्र)क्लृप्त्यादिना स्वाख्यानयोग्याकृतिमिति सम्बन्धः। भागद्वयेऽपि त्रिदिक्स्पृक्सूत्रं कृत्वा तेनार्वाचीनदेशं भ्रमयेद्, इयं योनेर्मूलपरिवृत्तिः। अग्रप्रक्लृप्तिरग्रप्रदेशस्य[४] कुण्डे नतिः क्रमतनुता चेति।।२५।।

क्षेत्रेऽत्राब्धिपुटे प्रतीच्यपुटयोः कर्णार्धसूत्रं निजं
संस्थाप्याप्पतिसन्धितः सुपरिवर्त्यार्कीन्दुसन्ध्यन्तिमम्।
ताभ्यां सूत्रयुगं प्रसार्य हरिदिग्बाह्याहितेष्वंशत[५]-
श्चिह्नेऽन्योन्यमिदं सुयोज्य शिखिकुण्डं योनिरूपं खनेत्[६]।।२६।।

विमर्शिनी

योनिरूपकुण्डलक्षणमाह-क्षेत्र इति। अत्र चतुरश्ररूपे अब्धिपुटे चतुष्पदे क्षेत्रे प्रतीच्यपुटयोः पश्चिमदिग्गतयोः पदयोर्निजं कर्णार्धसूत्रं तयोरेव निजं निजं कर्णार्धं सूत्रं मध्ये संस्थाप्य अप्पतिसन्धितः पश्चिमसन्धेरारभ्य आर्कीन्दुसन्ध्यन्तिमम् आर्किर्यमः इन्दुः सोमः तयोः सन्ध्यन्तिमं दक्षिणपदपध्ये स्थापितं सूत्रं वारुणासन्धेरारभ्य याम्यसन्ध्यन्तिमम्, उत्तरपदे स्थापितं सूत्रं वारुणसन्धेरारभ्य सौम्यसन्ध्यन्तिमं च परिवर्त्य ताभ्याम् (अर्के?आर्की)न्दुसन्धिभ्यां सूत्रयुगं प्रसार्य हरिदिग्बाह्याहितेष्वंशतः इन्द्रदिक्सूत्रबाह्ये स्वदैर्घ्यपञ्चांशेन कृते चिह्ने इदं सूत्रद्वयम् (अन्योन्यं) सुयोज्य योनिरूपं योन्याकारं शिखिकुण्डं खनेत्।।२६।।

---

१. 'रर्का' घ। २. 'र्घा', ३. 'लैरिति', ४. 'ग्रक्लृ' च पाठः। ५. 'ह्यस्थि', ६. 'हु' क. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

अथ योनिकुण्डमाह-क्षेत्रेति। चतुरश्रं प्रागायतोदगायतसूत्रयुतं क्षेत्रं विधाय नैर्ऋतखण्डे स्वकर्णार्धसूत्रस्य मूलं निधायाग्रेण स्वाग्निकोणादारभ्य स्ववायुकोणान्तं भ्रमयेत्। वायव्यखण्डे च तथा निर्ऋतिकोणादारभ्य शिवक्रोणान्तं भ्रमयेत्। तौ योनेर्मूलदेशौ भवतः। ततः पूर्वापरसूत्रस्य पञ्चमांशेन बहिः प्राग्दिश्यङ्कयित्वा वृत्तरेखाग्रयोस्तस्मिन्नङ्के च सूत्रे निधायास्फालयेत्। तद्योनेरग्रं भवति।।२६।।

क्षेत्रं विभज्य नवधोदगवाक् च भागौ
त्यक्त्वाचलांशकमितं परिवर्त्य सूत्रम्।
प्रागादिकाप्यककुबन्तमुदग्भुजां च
तावत् प्रसार्य रचयेच्छशिखण्डकुण्डम्।।२७।।

विमर्शिनी

अर्धचन्द्राकारकुण्डलक्षणमाह — क्षेत्रमिति। दक्षिणोत्तरदैर्घ्यं क्षेत्रं नवधा विभज्योदगवाक् च भागौ उत्तरगतं दक्षिणगतं च भागं त्यक्त्वा अचलांशकमितं सप्तांशकमितं सूत्रं प्रागादिकाप्यककुबन्तं प्रागादिपश्चिमदिग्भागान्तं परिवर्त्य उदग्भुजां चोदग्गतं भुजासूत्रं च तावत् प्रसार्य शशिखण्डकुण्डं रचयेत्।।२७।।

विवरणम्

अर्धवृत्तकुण्डमाह-क्षेत्रमिति पूर्ववत् चतुरश्रं क्षेत्रं कृत्वा दक्षिणोत्तरसूत्रं नवधा समं विभज्य तत्र दक्षिणोत्तरौ भागौ विहाय[1] परिशिष्टसूत्रपरिमितं सूत्रं गृहीत्वा तन्मूलं परिशिष्टसूत्रस्योदगग्रे निधायाग्रेण प्रागारभ्य पश्चिमपर्यन्तं प्रादक्षिण्येन भ्रामयेत्। तदर्धं वृत्तस्य भवति। पुनस्तदुभयाग्रस्पृक् पूर्वापरसूत्रमास्फालयेत्। तदर्धचन्द्रं भवति।।२७।।

षष्ठांशकं यमहिमांशुदिशोः प्रतीच्य-
सूत्रे सुयोज्य हरिदिग्बहिरङ्कयित्वा।
तेनैव तेषु सुविधाय च सूत्रपातं
कुर्यात् त्रिकोणपरिमण्डितवह्निकुण्डम्।।२८।।

---

१. 'घा'

Shripuram Publications
www.shripuram.org

विमर्शिनी

त्रिकोणकुण्डलक्षणमाह-षष्ठांशकमिति। चतुरश्रे चतुष्पदे क्षेत्रे प्रतीच्यसूत्रे पश्चिमसूत्रे यमहिमांशुदिशोः दक्षिणोत्तरदिशोः षष्ठांशकं क्षेत्रस्य षड्भागं सुयोज्याङ्कयित्वा हरिदिग्बहिः इन्द्रदिग्बाह्ये च तेनैव षड्भागेनाङ्कयित्वा तेषु चाङ्केषु सूत्रपातं सुविधाय त्रिकोणपरिमण्डितवह्निकुण्डं त्रिभिः कोणैरलङ्कृतं वह्निकुण्डं कुर्यात्।।२८।।

विवरणम्

त्रिकोणमाह-षष्ठांश(क)मिति। तेनैव हरिदिग्बहिरङ्कयित्वेत्यन्वयः[१]। पश्चिमदिक्सूत्रे स्वषष्ठभागं दक्षिणोत्तरदिशोर्योजयेत्। तमेव भागं पूर्वापरसूत्राग्रे च योजयेत्। तेन मानेन तत्र तत्राङ्कं कुर्यादित्यर्थः[२]। अथ तेष्वङ्केषु त्रिषु त्रीणि सूत्राणि पातयेत्।।२८।।

कर्णार्धसूत्रस्य भुजार्धतोऽतिरिक्तांशकार्धं बहिरर्पयित्वा।
मध्यस्थसूत्रं परिवर्त्य कुण्डं कुर्वीत चण्डद्युतिमण्डलाभम्।।२९।।

विमर्शिनी

वृत्तकुण्डलक्षणमाह-कर्णार्धेति। चतुरश्रे चतुष्पदे क्षेत्रे कर्णार्धसूत्रस्य कर्णसूत्रार्धस्य भुजार्धतः भुजासूत्रस्यार्धाद् अतिरिक्तः अधिको योंऽशः तस्यार्धं दिक्सूत्राद् बहिरर्पयित्वा योजयित्वा मध्यस्थसूत्रं क्षेत्रस्य मध्यसन्धिस्थं सूत्रं परिवर्त्य चण्डद्युतिमण्डलाभम् आदित्यमण्डलाकारं वृत्तकुण्डं कुर्वीत।।२९।।

विवरणम्

वृत्तकुण्डं दर्शयति-कर्णार्धसूत्रस्येति। दक्षिणदिक्सूत्रं भुजाभिधीयते। पश्चिमदिक्सूत्रं कोटिः। तदुभयाग्रस्पृक् कोणसूत्रं कर्णः। कर्णार्धपरिमितं सूत्रं भुजायां समं निदध्यात्। तत्र भुजार्धतो यावदतिरिच्यते तदर्धमात्रसूत्रेण पूर्वापरसूत्रस्य दक्षिणोत्तरसूत्रस्य च मूलाग्रेषु चतुरोऽङ्कान् विधाय तदङ्कस्पृग्वृत्तं निदध्यात्।।२९।।

अङ्कौ प्रकल्प्य हरिपञ्चमदिक्पदिक्स्थौ
षष्ठांशतो बहिरतो निजमध्यतश्च।

---

१. 'त्वेति भावः। प'। २. 'र्थः। ते'।

Shripuram Publications
www.shripuram.org

द्वौ द्वौ झषौ पर[1]दिशोरपि मत्स्यचिह्न-
षट्सूत्रकैर्विरचयेद् रसकोणकुण्डम्।।३०।।

विमर्शिनी

षट्कोणकुण्डलक्षणमाह-अङ्काविति। चतुरश्रे चतुष्पदे क्षेत्रे क्षेत्रस्य षष्ठांशतः हरिपञ्चमदिक्पदिक्स्थौ हरिरिन्द्रः तत्पञ्चमो वरुणः अथवा हरिर्यमः तत्पञ्चमः सोमः तयोर्दिक्पयोः दिक्स्थितौ बहिः बाह्यभागे अङ्कौ प्रकल्प्य अतः अस्मात् अङ्कद्वयात् निजमध्यतः क्षेत्र[2]मध्यगत[3]सन्धेश्च सूत्रप्रस[4]रणेन परदिशोः, प्राक्प्रत्यग्भागगतावङ्कौ चेद् दक्षिणोत्तरदिशोः दक्षिणोत्तरदिग्गतावङ्कौ चेत् प्राक्प्रत्यग्दिशोः द्वौ द्वौ झषौ मत्स्यावपि प्रकल्प्य मत्स्यचिह्नषट्सूत्रकैः चतुर्षु मत्स्येषु द्वयोश्चिह्नयोश्च विहितैः षड्भिः सूत्रकैः रसकोणकुण्डं षट्कोणकुण्डं विरचयेत्।।३०।।

विवरणम्

षट्कोणकुण्डक्लृप्तिमाह-अङ्काविति। हरिरिन्द्रः, तस्य पञ्चमो दिक्पो वरुणः। षष्ठांशतः पूर्वापरसूत्रस्यैव षष्ठेन भागेन। अतो निजमध्यतश्चेति। आभ्यामङ्काभ्यां पूर्वापरसूत्रमध्याच्चेत्यर्थः। हरिवरुणदिगपेक्षयायं परशब्दः। यमशशिदिशोरिति यावत्। एतदुक्तं भवति। पूर्वापरसूत्रं निजं षोढा विभज्य तद्भागपरिमितसूत्रेण पूर्वापरसूत्रस्य मूलादग्राच्च बहिरङ्कौ कुर्यात्। पश्चिमाङ्के सूत्रं विन्यस्य मध्याङ्कपर्यन्तं सूत्रं प्रसार्य तेन सूत्राग्रेण दक्षिणत उत्तरतश्च क्षेत्रात् बहिरङ्कौ कृत्वा मध्याङ्के तदेव सूत्रं विन्यस्य तयोरङ्कयोरङ्कयेत्। तौ द्वौ पश्चिममत्स्यौ भवतः। एवमेव प्रागङ्कमध्याङ्काभ्यां क्षेत्रात् बहिरेव दक्षिणत उत्तरतश्च द्वौ पूर्वमत्स्यौ स्याताम्। ततो द्वयो[5]र्द्वयोरङ्कयोः सूत्राणि विधाय षट्सूत्राणि समन्तत आस्फालयेद् इति। एवं सति पश्चिमे कोणे योनिः स्यात्। अथवा हरिशब्दो यमवचनः। ततः पञ्चमो दिक्पश्च सोमः। शेषं तदनुसारेण योज्यम्। तथा हि सति पश्चिमसूत्रे योनिर्लभ्यते।।३०।।

क्षेत्रं प्रकल्प्य फणिभागयुतं समन्तात्
तद्बाहुसूत्रदलतोऽथ परिभ्रमय्य।
आख्यास्यमानविधिनाष्टदलं लिखित्वा
खात्वा प्रकल्पयतु पद्मनिभं च कुण्डम्।।३१।।

---

१. 'रि' क. ग. घ. पाठः। २. 'त्रे' ३. 'तः' ख. घ. च. पाठः। ४. 'रेण प' घ. च. पाठः।
६. 'द्वयोर' क. घ. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनि

पद्माकारकुण्डलक्षणमाह-क्षेत्रमिति। पूर्वोक्तं क्षेत्रं समन्तात् चतुर्दिक्ष्वपि फणिभागयुतं स्वस्याष्टभागसहितं प्रकल्प्याथ तद्बाहुसूत्रदलतः तच्चतुरश्रीकृतक्षेत्रस्य भुजासूत्रस्यार्धेन परिभ्रमय्य वृत्तीकृत्य आख्यास्यमानविधिना मण्डलनिर्माणे वक्ष्यमाणविधानेनाष्टदलं लिखित्वा खात्वा पद्मनिभं कुण्डं च प्रकल्पयतु।।३१।।

विवरणम्

पद्माकारकुण्डलक्षणमाह-क्षेत्रं प्रकल्प्येति। वृत्तकुण्ड इव अष्टमभागेन चतुर्दिक्षु अङ्कान् विधाय तेषु वृत्तान्[१]निष्पाद्य वक्ष्यमाणाष्टदलनिष्पत्तिरीत्याष्टौ दलानि विलिखेदित्यर्थः।।३१।।

क्षेत्रे तत्र समन्ततो दिनकरांशं न्यस्य तुर्यश्रिते
कोणेभ्यो भुजसूत्रकेषु निहितैः स्वैः कर्णसूत्रार्धकैः।
द्वौ द्वौ दिक्षु झषान् प्रकल्प्य मकरेष्वास्फालितैरष्टभिः
सूत्रैरीश्वरदिङ्मुखे विरचयेदष्टाश्रकुण्डं सुधीः।।३२।।

विमर्शिनी

अष्टाश्रकुण्डलक्षणमाह-क्षेत्र इति। चतुरश्रे क्षेत्रे समन्ततः चतुर्दिक्ष्वपि दिनकरांशं स्वस्य द्वादशांशं न्यस्य योजयित्वा तुर्यश्रिते चतुरश्रीकृते सति चतुर्भ्यः कोणेभ्योऽपि भुजसूत्रकेषु कोणानामुभयदिग्गतभुजासूत्रकेषु निहितैः निक्षिप्तैः स्वैः स्वीयैः कर्णसूत्रार्धकैः चतसृषु दिक्षु द्वौ द्वौ एवं समुदायातोऽष्टौ झषान् मत्स्यान् प्रकल्प्य मकरेषु मत्स्ये[२]ष्वास्फालितैरष्टभिः सूत्रैरष्टाश्रकुण्डं विरचयेत्। ईश्वरदिङ्मुखे सुधीरिति पदयोः तत्तद्दिशि तत्तद्योग्यमेव कुण्डं विरचयेदित्यभिप्रायः।।३२।।

विवरणम्

अथाष्टकोणकुण्डप्रक्रियामाचष्टे-क्षेत्रे तत्रेति। चकुरश्रं क्षेत्रं कृत्वा तस्य बहिः समन्तात् स्वद्वादशांशं प्रक्षिप्य दिक्सूत्रैरपरं चतुरश्रं विधाय तस्य बाह्यचतुरश्रस्य यत् कर्णसूत्रं तदर्धमितं सूत्रं गृहीत्वा तन्मूलमग्निकोणे निधायाग्रेण दक्षिणदिक्सूत्रे पूर्वदिक्सूत्रे च मत्स्यौ कुर्यात्।[३] पुनस्तेनैव सूत्रेण निर्ऋतिकोणादिषु निहितेन यथोक्तरीत्या मत्स्यान्

१. 'तिं' क. पाठः। २. 'ध्ये' ङ. पाठः। ३. 'ताम्।' क. पाठः।

Shripuram Publications
www.shripuram.org

कुर्यात्। एवं प्रतिदिशं द्वौ द्वौ मत्स्यौ जातौ भवतः। पुनस्तेषु मत्स्येष्वष्टौ सूत्राणि कुर्यात्। निजनिजतृतीयमत्स्यसन्निपाते ह्यष्टौ सूत्राणि भवेयुः। तदाष्टकोणं क्षेत्रं सम्पन्नं भवति।।३२।।

दोर्मात्रकुण्डे विधिरेष शेषेषून्नीय तन्वीत समस्तमस्मात्।
कुण्डानि तत्तद्धवनोपपत्त्या द्वित्रादिदोरत्निमितान्यपि स्युः।।३३।।

विमर्शिनी

एव विधिः दोर्मात्रकुण्डे हस्तमिते कुण्डे स्यात्। शेषेषु द्विहस्तादिषु अर्धहस्तादिषु अस्माद् एकहस्ताद् उन्नीय अतिदिश्य समस्तं गर्तमेखलायोन्यादिकं तन्वीत। तत्तद्धवनोपपत्त्या तत्तद्धोमसंख्यातारतम्येन द्वित्रादिदोरत्निमितानि द्विकरत्रिकरादिमितानि अर्धकरादिमितानि च कुण्डानि स्युः।।।३३।।

कुर्यात् स्रुवं खदिरजं द्विजदारुजं वा
मित्राङ्गुलं शशधराङ्गुलमस्य वक्त्रम्।
अङ्गाग्निनेत्रयवदीर्घवितानिम्न-
गर्तद्वयं यवदलाहितनेमिवीतम्।।३४।।

मूलाग्रशातयवनिम्नबिलार्गलाढ्य-
माश्यानपङ्कगतधेनु[1]पदोप[2]मं च।
मूले यवाष्टकततं यवहीनमग्रे
दण्डं सुवर्तुलमिलायववेष्टनाग्रम्।।३५।।

विमर्शिनी

होमसाधनकुण्डलक्षणमभिधाय पुनः स्रुवादीनां लक्षणमाह-कुर्यादिति। खदिरजं खदिरोद्भवं द्विजदारुजं वा पलाशोद्भवं वा मित्राङ्गुलं द्वादशाङ्गुलं स्रुवं कुर्यात्। अस्य स्रुवस्य वक्त्रं शशधराङ्गुलं एकाङ्गुलं कुर्यात्। अङ्गाग्निनेत्रयवदीर्घविताननिम्नागर्तद्वयं तद्वक्त्रं तु षड्यवदीर्घं त्रियवविस्तारं द्वियवनिम्नं च गर्तद्वयेन युक्तं च यवदलाहितनेमिवीतम् अर्धयवेन कृतया नेम्या परिवृतं च मूलाग्रशातयवनिम्नबिलार्गलाढ्यं

१. 'खुरोप' २. 'मानम्' क. पाठः।

Shripuram Publications
www.shripuram.org

मूलाग्रयोः कार्श्यर्युक्तेन यवमात्राधोगतेन बिलमध्यस्थेन रेखारूपेणार्गलेन युक्तम्, आश्यानपङ्कगतधेनुपदोपमम् ईषदाद्रपङ्कस्थितेन पशोः पदचिह्नेन समानं च। अस्य दण्डं सुवर्तुलं कुर्यात्। तस्य मूले यवाष्टकततम् अङ्गुलमात्रविस्तारयुक्तम्। अग्रे दण्डाग्रे ततो यवहीनं सप्तयवविस्तृतम्। इलायववेष्टनाग्रं दण्डाग्रे एकयवप्रमाणेन वलयाकारेण वेष्टनेन युक्तं च।।३४, ३५।।

विवरणम्

कुण्डलक्षणानन्तरं स्रुवादिलक्षणमाह-कुर्यात् स्रुवमिति। द्वादशाङ्गुलातानमङ्गुलवितानमृजुं काष्ठं विधायाङ्गुलेन मुखं विरचयेत्। तत्र द्वे गर्ते स्याताम्। तयोः षड्यवा आतानं त्रयो वितानः द्वाववगाहः। अर्धयवेन द्वयोस्सह समन्ततो नेमिः। गर्तयोरर्गला च कार्या। सा च मूलाग्रयोः क्रमेण सूक्ष्मा यवमात्रेण निम्ना च भवति।।३४।।

इलायववेष्टनाग्रमित्येकेन यवेन दण्डमुखसन्धौ परिवेष्टनं कुर्यादित्यर्थः।।३५।।

मार्ताण्डाङ्गुलदैर्घ्यतच्छरदशांशव्यासतीव्रा जुहू-
ब्राह्म्यायामशरांशतोऽत्र चतुरश्रं पुष्करं कल्पयेत्।
अद्र्यंशाहितमेखलावृतपदांशाखातगर्तान्वितं
तस्याग्रे गलमर्धविस्तृतितदर्धायामताभ्युज्ज्वलम्।।३६।।

विमर्शिनी

जुहूलक्षणमाह-मार्ताण्डेति। ब्राह्मी पालाशी। मार्ताण्डाङ्गुलदैर्घ्यतच्छरदशांशव्यासतीव्रा द्वादशाङ्गुलदीर्घा दैर्घ्यपञ्चांशविस्तारा दैर्घ्यदशांशघना च जुहूः स्यात्। अत्र जुह्वाम् आयामशरांशतः दीर्घात् पञ्चभागेन चतुरश्रं पुष्करसंज्ञं स्थानं कल्पयेत्। तत्तु अद्र्यंशाहितमेखलावृतपदांशाखातगर्तान्वितं पुष्करस्य सप्तांशेन कृतया मेखलयावृ(ता?तं) चतुर्थांशनिम्नेन गर्तेन चान्वितम्। तस्य पुष्करस्याग्रे अर्धविस्तृतितदर्धायामताभ्युज्ज्वलं पुष्करार्धप्रमाणविस्तारेण तदर्धमानदैर्घ्येण चाभ्युज्ज्वलं दीप्तं गलं च कुर्यात्।।३६।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विवरणम्

पञ्चांशतो विस्तारः। दशांशतो घनम्। ब्राह्मी पलाशद्रुमविकारः। यत्र हविरवदीयते तत्पुष्करं नामाभिधीयते। पदांशश्चतुर्थांश। घनचतुर्थांशेन गर्तनिम्नमित्यर्थः। तस्याग्र इत्यनेन पुष्करभागान्तर्गतमेव गलं न पृथगित्यपि दर्शितम्। स्वविस्तारादर्धेन गलविस्तारः। ततोऽप्यर्धेनायामः। त्रिपादेन चतुर्धा भक्ते त्रिभिर्भागैर्मूलविस्तारः। एकेनाग्रविस्तारः।।३६।।

पञ्चांशायतत्त्रिपादशशिपादव्यासमूलाग्रकं
कुर्याद् व्यासगुणांशखातघृतकुल्योल्लासितं तन्मुखम्।
तच्छिष्टेन सुवृत्तपुष्करदलव्यासाढ्यमूलानलां-
शोनव्यासयुताग्रकं विरचयेद् दण्डं च गोपुच्छवत्।।३७।।

विमर्शिनी

तन्मुखं तु गलोपरि पञ्चांशायतत्त्रिपादशशिपादव्यासमूलाग्रकं स्वदैर्घ्यपञ्चांशेनायतम् आयतत्रिपादविस्तारयुक्तमूलम् एकपादविस्तारयुक्ताग्रं च, तथा व्यासगुणांशखातघृतकुल्योल्लासितं स्वविस्तारत्रिभागखातया घृतकुल्यया चोल्लासितं शोभितं च कुर्यात्। तच्छिष्टेन पुष्करगलमुखेभ्यः शिष्टेन दण्डं च विरचयेत्। तं तु सुवृत्तपुष्करदलव्यासाढ्यमूलानलांशोनव्यासयुताग्रकं शोभनवृत्तं पुष्करार्धविस्तारमूलं ततत्रिभागोनविस्तारयुक्ताग्रं गोपुच्छवद् गोपुच्छसदृशं विरचयेत्।।६७।।

विवरणम्

पुष्करदलव्यासाढ्यं यस्य मूलं पुष्करदलादनलभागोनव्यासयुतं यस्याग्रमिति समासः।।३७।।

हस्तायामयुगांशविस्तृतितदर्धोत्सेधयुक्ता महा-[1]
स्रुक् स्याद् विस्तृतिदीर्घपुष्करगुणांशाखातवृत्तावटा।
बाह्याद्यर्धतदर्धतद्दलवशाच्छेषु चतुर्धा कृते
कुर्यात् तद्रशनात्रयं त्रिभिरथान्तस्थैः क्रमादंशकैः।।३८।।

---

१. 'पदांश' ख पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

महास्रुग्लक्षणमाह-हस्तायामेति। हस्तायामयुगांशविस्तृतितदर्धोत्सेधयुक्ता करमात्रायामा षडङ्गुलविस्तारा त्र्यङ्गुलघना च महास्रुक् स्यात्। सा तु विस्तृतिदीर्घपुष्करगुणांशाखातवृतावटा स्वविस्तारसमदीर्घे चतुरश्ररूपे पुष्करे तत्त्रिभागखातेन वृत्तरूपेणावटेनोपलक्षिता च। शेषे अवटाच्छिष्टे पुष्करे बाह्याद्यर्धतदर्धतद्दलवशात् बहिरारभ्यार्धे तदर्धे तस्याप्यर्धे च चिह्नं कृत्वा चतुर्धा कृते अथान्तस्थैः त्रिभिरंशकैः क्रमात् तद्दशनात्रयं तस्यावटस्य मेखलात्रयं कुर्यात्।।३८।।

विवरणम्

युगांशो हस्तचतुर्थांशः। षडङ्गुल इति यावत्। तदर्धं त्र्यङ्गुलं विस्तृतिपरिमितदीर्घे पुष्करे गुणांशेनाखातं वृत्तमवटं यस्य इति समासः। षडङ्गुलं समचतुरश्रं पुष्करं कल्पयित्वा तन्मध्ये तृतीयांशेन विस्तृतां गर्तं वृत्तरूपं विदध्यादित्यर्थः। अथ शेषे चतुर्धा विभक्ते सति अन्तस्थैः त्रिभिः भागैर्मेखलात्रयं कुर्यात्। विस्तारेण[१] चतुर्धाकरणक्लृप्तिमाह-बाह्याद्यर्धतदर्धतद्दलवशादिति। प्रथमं बहिरर्धं ततोऽन्तर्भागस्यार्धं ततोऽप्यन्तर्भागस्यार्धं इत्येवंक्रमेणेत्यर्थः।।३८।।

बाह्येऽर्धे त्रियवं तदर्धमपरेंऽशे तद्दलं चान्यतः
संशोध्यावटमेखलां सुपरिवृत्तां पीठमब्जोज्ज्वलम्।
दण्डं त्र्यंशततं गलं ससुषिरं पादत्रिभागातति-
व्यासं पादविहीनपुष्करमितं कुर्याज्जुहूवन्मुखम्।।३९।।

कर्षार्धं घृतमोदनं प्रजुहुयाद् ग्रासार्धकं मुष्टिगान्
लाजान् स्वप्रसृतिप्रमान् सपृथुकाञ्छालीन् यवांस्तण्डुलान्।
सक्तून् कर्षमितान् समुद्[२]गतिलसिद्धार्थाह्वयान् पञ्चशो
दूर्वाग्राणि पुनस्त्रिशो दधिपयःक्षौद्रादि शुक्त्युन्मितम्।।४०।।

विमर्शिनी

तत्र बाह्ये अर्धे त्रियवम् अपरे अंशे तदर्धम् एकार्धयवम् अन्यतस्तदन्तस्तु तद्दलं पादोनयवं च संशोध्य संतक्ष्य अवटमेखलाम् अवटपरिवृतां मेखलां सुपरिवृत्तां

---

१. 'ण क्लृ' घ. पाठः। २. 'द्गयवसि' ख पाठः।

Shripuram Publications
www.shripuram.org

शोभनवृत्तोपेतां कुर्यात्। इतरे चतुरश्रे चेत्यर्थाद् भवति। पीठं मेखलाभ्योऽवशिष्टं स्थानमब्जोज्ज्वलं पद्मेन शोभितं च कुर्यात्। दण्डं त्र्यंशततं द्व्यङ्गुलविस्तृतं च दण्डं कुर्यात्। गलं पुष्करादुपरि गतं कण्ठं पादत्रिभागाततिव्यासं पादेन सार्धैकाङ्गुलायामेन त्रिभागेनाङ्गुलद्वयविस्तारेण[1] च युक्तं ससुषिरं घृतमार्गसुषिरयुक्तं च कुर्यात्। मुखं तदूर्ध्वभागं तु पादविहीनपुष्करमितं सार्धचतुरङ्गुलमितं जुहूवद् घृतकुल्यादिसमन्वितं च कुर्यात्।।३९।।

होमद्रव्याणां प्रमाणमाह-कर्षार्धमिति। घृतं कर्षार्धम्। कर्षः पलाच्चतुर्भागः तदर्धं प्रजुहुयात्। ओदनमन्नं ग्रासार्धं ग्रासस्यार्धं, लाजान् मुष्टिगान्, पृथुकान् शालीन् तण्डुलान् यवांश्च स्वप्रसृतिप्रमान् स्वकरप्रसृतिमितान्, अङ्गुल्यग्रैरुद्घृता प्रसृतिः, सक्तून् कर्षमितान्, मुद्गतिलसिद्धार्थान् पञ्चशः, दूर्वाग्राणि त्रिशः, दधिपयःक्षौद्रादिद्रवद्रव्यं शुक्त्युन्मितं, पुष्पफललड्डुकापूपादीन्येकैकशश्च जुहुयात्।।४०।।

विवरणम्

तेषां निम्नमाह-बाह्यार्ध इति। संशोधनं त्यागः। पीठं बाह्यतमो भागः। पादत्रिभागाततिव्यासमिति गलविशेषणम्। चतुर्थांशेन गलायामः। तृतीयांशेन तद्विस्तारश्च। पादहीनपुष्करमितं कुर्याज्जुहूवन्मुखमिति। पुष्करमानचतुर्थांशहीनं मुखातानं मानं भवति। जुहूवदिति त्रिपादशशिपादव्यासमूलाग्रत्वं व्यासगुणांशखातघृतकुल्यावत्वं चोक्तम्। ओदनं हविः।।३९, ४०।।

एकद्विसागरकरप्रमितानि तानि
स्युर्भद्रकप्रकृतिकान्यथ मण्डलानि।
चक्राम्बुजं द्विकरमप्यवरं वरिष्ठं
तद् वेददोःप्रभृतिपन्नगहस्तनिष्ठम्।।४१।।

विमर्शिनी

मण्डलानां लक्षणमाह-एकेति। अथ तानि अधिवासपटले प्रस्तुतानि भद्रकप्रकृतिकानि भद्रकमूलानि मण्डलानि एकद्विसागरकरप्रमितानि एकद्विचतुष्करमितानि अधममध्यमोत्तमक्रमेण स्युः। चक्राम्बुजमपि द्विकरम्। अवरम् अधमम्। वेददोःप्रभृतिपन्नगहस्तनिष्ठं चतुष्करादि अष्टहस्तावसानं तत् चक्राब्जं क्रमोत्कर्षेण वरिष्ठम् उत्तमं स्यात्।।४१।।

---

१. 'त्र' ङ. पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

इदानीं मण्डलानि लिलक्षयिषुः तेषां प्रमाणं प्रकृतिविकृतिभावञ्चाह-एकेति। मण्डपविस्तारापेक्षया मण्डलपरिमाणविकल्पः। भद्रकं प्रकृतिरितरेषां भवति तत्रैव दलव्युत्पादनादिसौकर्यात्। अवरमिति। एकहस्तं तु नेष्यते इत्यर्थः।।४१।।

विकृतिकृतिपुटे षट्त्रिंशतान्तःस्थकोष्ठै-
र्नलिनमवनिपङ्क्त्या पीठिका वीथिकाथ।
पुटयुगपरिक्लृप्ता द्वारशोभोपशोभा-
श्रियुतपुटयुगल्या मुद्रिता भद्रके स्यात्।।४२।।

विमर्शिनी

विकृतिकृतिपुटे विकृतयः षोडश तासां विकृतीनां कृतिर्वर्गः आयामतो विस्तारतश्च षोडशपुटे क्षेत्रे इत्यर्थः। अत्रायं भावः - 'प्रागग्रं सूत्रमुर्व्यामि'ति श्लोकोक्तप्रकारेण चतुरश्रं चतुष्पदं स्वेष्टमानमितं क्षेत्रं कृत्वा तेषु चतुर्षु कोणकोष्ठेषु कोणसूत्राप्यू-भयथाप्यास्फाल्य तन्मध्ये प्रागग्रमुदगग्रं च सूत्रमास्फाल्य चतुष्पुटं कृत्वा तत्कोणकोष्ठेष्वपि तथा कोणसूत्राण्यास्फाल्य तथा तन्मध्ये च दिक्सूत्राण्यास्फाल्य एवंक्रमेण षोडशपुटानि प्रत्यक्प्रागायतानि दक्षिणोत्तरायतानि च यथा भवन्ति तथा कृत इति। तत्र भद्रके षट्त्रिंशतान्तःस्थकोष्ठैः अन्तर्गतैः षट्त्रिंशत्कोष्ठैः नलिनं पद्मक्षेत्रं स्यात्। अवनिपङ्क्त्या पद्मस्य परितो गतयैकपङ्क्त्या पीठिका च। अथ पुटयुगपरिक्लृप्ता तत्पीठ[१]बाह्यगतेन पुटद्वयेन परितः क्लृप्ता वीथिका च तथा तद्बाह्ये द्वारशोभोपशोभाश्रियुतपुटयुगल्या द्वारशोभोपशोभाश्रिभिः युतया पुटद्वय्या मुद्रिता च वीथिका स्यात्।।४२।।

विवरणम्

विकृतिकृतिपुटे षोडशवर्गपुटोपेते प्रागग्रैरुदग्रैश्च सप्तदशभिः सूत्रैस्सम्पादितक्षेत्र इति यावत्। षट्त्रिंशतान्तस्थकोष्ठैः पूर्वपरदक्षिणोत्तरसूत्रसन्धेः समं ततस्त्रिभिः त्रिभिः पुटैरित्यर्थः। ततो बहिरेकया परितः पङ्क्त्या पद्मस्य पीठिका, ततो द्वाभ्यां पङ्क्तिभ्यां एका परितो वीथिः। मुद्रितेति वीथिविशेषणत्वेनोक्तम्। वीथेरपि परितो बहिरवशिष्ट-पङ्क्तिद्वयेन द्वारादिकमित्यर्थः। तत्र चतुर्दिक्षु द्वाराणि। प्रतिद्वारं अभितः शोभे, शोभानां

१. 'ठाद्वाह्य'।

Shripuram Publications
www.shripuram.org

पार्श्वत उपशोभाः ततः कोणमिति विवेकः।।४२।।

अब्जक्षेत्रे यवांशं बहिरिह परितोऽपास्य वृत्तीकृतेऽर्धे
मित्रांशेऽग्रार्थमन्तः सुसममथ चतुर्धा विभक्ते दलार्थम्।
सन्ध्यर्थं केसरार्थं भ्रमयतु परितः कर्णिकार्थं च सूत्रं
दिक्कोणाभ्यन्तरेऽष्टौ[1] क्षिपतु च परितस्तत्र सूत्राणि तिर्यक्।।४३।।

विमर्शिनी

अब्जक्षेत्रे मध्यगते पद्मक्षेत्रे बहिर्यवांशं यवमात्रमंशं परितोऽपास्य त्यक्त्वा वृत्तीकृते इहार्धे मित्रांशे द्वादशांशे च अग्रार्थं दलाग्रार्थम्, अन्तः तदन्तर्भागे चतुर्धा सुसमं विभक्ते सति बाह्यादारभ्य परितो दलार्थं सन्ध्यर्थं[2] दलसन्ध्यर्थं, केसरार्थं[3] केसरसीमार्थं, कर्णिकार्थं च सूत्रं भ्रमयतु[4] वृत्तीकरोतु। तत्र दिक्कोणाभ्यन्तरे[5] दिक्षु कोणाभ्यन्तरालेष्वपि अष्टौ तिर्यक् सूत्राणि च परितः क्षिपतु।।४३।।

विवरणम्

इह यवांशं परितोऽपास्य वृत्तीकृते अब्जक्षेत्रे अर्धे अग्रार्थं मित्रांशे अथान्तर्दलार्थं सन्ध्यर्थं केसरार्थं कर्णिकार्थं च सुसमं चतुर्धा विभक्ते परितः सूत्रं भ्रमयत्वित्यन्वयः। मित्रांशे इत्यत्रापि मित्रांशेऽपि विभक्त इति सम्बन्धः। व्यधिकरणे च सप्तम्यौ। विभक्त इत्येतत्त्वर्ध इत्यस्य विशेषणम्। एतदुक्तं भवति। पद्मक्षेत्रे परितो यवमात्रं वर्जयित्वा वृत्तं कुर्यात्। ततः प्राचीनसूत्रार्धे चतुरोऽङ्कानालिखेत्। प्रथमं द्वादशांशेन अग्रेऽङ्कं कृत्वा ततश्शिष्टचतुर्भागेन त्रयोऽङ्काः कार्याः। तत्र अग्रतो भागो दलाग्रार्थः। तत्पश्चिमो दलार्थः। तत्पश्चिमो दलसन्ध्यर्थः। ततः केसरार्थो भागः। मध्यगतः कर्णिकार्थः। अथ मध्यात्तेष्वङ्केषु सूत्राग्रं निधाय चत्वारि वृत्तानि समन्ततो निष्पादयेदिति। दिक्कोणाभ्यन्तरेष्विति। यद्यपि पूर्वापरं दक्षिणोत्तरं कर्णसूत्रे च प्रागेवाभूतां तथापि वृत्तीकरणादिना विनाशात् पुनरपि तान्यभिव्यक्त्यर्थमास्फालनीयानि। तानि च दलमध्यसूत्राणि तेषामन्तरालेषु चाष्टौ सूत्राणि सम्पादनीयानि। तानि च दलसीमासूत्राणि भवन्ति।।४३।।

---

१. 'ष्ट' इति, मूलकोशपाठः २. 'र्थं के' ३. 'र्थं क' ४. 'तु। त' ख. घ. च. पाठः। ५. 'रेषु' घ. पाठः।

Shripuram Publications
www.shripuram.org

अग्रादिसन्धिचरमं दलमध्यसंस्थं
सूत्रं सुवर्त्य परिलिख्य दलं तदग्रम्।
तत्सूत्रसम्मुखतयान्तिमवृत्तसंस्थं
तन्मात्रासूत्रमभिवर्त्य लिखेद् द्विपार्श्वे।।४४।।

विमर्शिनी

पुनर्दलमध्यसंस्थं दलानां मध्यगतसूत्रस्थितं सूत्रम् अग्रादिसन्धिचरम् दलाग्रगतवृत्तादारभ्य दलसन्ध्यन्तं सुवर्त्य दलं परिलिख्य तदग्रं दलाग्रं तु तत्सूत्रसम्मुखतया दलसूत्राभिमुख्येन[१] अन्तिमवृत्तसंस्थम् अन्तिमवृत्तस्थितं तन्मात्रसूत्रं द्वादशांशतः क्षिप्त्वान्त्यवृत्तविस्तारमात्रं सूत्रं द्विपार्श्वे तस्याग्रस्य पार्श्वद्वयेऽभिवर्त्य लिखेत्।।४४।।

विवरणम्

दलनिष्पादनार्थमाह-अग्रादीति। दलानां मध्यसूत्रेष्ववाचीनवृत्तसन्धौ सूत्रं निधाय पराचीनवृत्तसन्धिपर्यन्तं प्रसार्य तेन दलाग्रतः प्रवृत्तं दलद्वयसन्धिपर्यन्तं दलसीमासूत्रपर्यन्तं वृत्तं विरचयेत्। तदा दलान्यर्धवृत्तात्मकानि भवन्ति। दलाग्रार्थमाह-तदग्रमिति। तदग्रं लिखेदिति सम्बन्धः। दलाग्रभागे यत् पराचीनं वृत्तं तद्धीहान्तिमं वृत्तं, तत्र सूत्रं[२] निधायायार्वाचीनसूत्रपर्यन्तमुन्नीय तेन दलमध्यसूत्रपराचीनवृत्तसन्धिनिहिताग्रेण पराचीनवृत्तस्थेनार्वाचीनवृत्तपर्यन्तमेकपार्श्वे भ्रमयित्वा पुनरपरपार्श्वेऽप्येवं भ्रामयेत्[३]। तदेकदलाग्रं सम्पद्यते। एवं सर्वदलाग्राणि विरचयेदित्यर्थः।।४४।।

दिशि करयुगकोष्ठैर्द्वारमन्तर्बहिष्ठै-
स्त्रिशशिपदविपर्यस्तैश्च शोभोपशोभे।

त्रिभुवनपदक्लृप्तं कोणमम्भोजपीठं
श्रुतिदहनपदोद्यद्‌गात्रपादान्वितं च।।४५।।

विमर्शिनी

पुनर्वीथ्या बहिर्द्वारशोभादिस्थाने[४] अन्तर्बहिष्ठैः अन्तर्गतैः बहिर्गतैश्च क्रमेण

---

१. 'न दिग्गते द्वे कोणगते द्वे अन्तराले चतस्त्र इत्यत्राभिसुख्येन अ' घ. ङ. च. पाठः।
२. 'त्रणीय' ३. 'भ्र' क पाठः। ४. 'ने' दिग्गते द्वे कोणगते द्वे अन्तराले चतस्त्र इत्यत्र अ ख. पाठः।

Shripuram Publications
www.shripuram.org

करयुगकोष्ठैः द्विचतुष्कोष्ठैः द्वारं स्यात्। त्रिशशिपदविपर्यस्तैः शोभोपशोभे अन्तस्त्रिभिर्बहिरेकेन शोभा, तद्व्यत्यासेनोपशोभा। त्रिभुवनपदक्लृप्तम् अन्तर्बहिश्च त्रिभिस्त्रिभिः कोष्ठैः कोणम्। अम्भोजपीठम् अष्टदलबहिर्गतं पीठं श्रुतिदहनपदोद्यद्गात्रपादान्वितं दिक्षु चतुष्पदगात्रान्वितं कोणेषु त्रिपदपादान्वितं च।।४५।।

विवरणम्

अथ द्वारादिक्लृप्तिमाह-दिशीति। अन्तर्बहिष्ठैरिति प्रत्येकं विशेषणम्। अन्तर्द्वे बहिः पङ्क्तौ चत्वारि च पदानि मार्जयन्नेकं पदं कुर्यात्। तद्द्वारमभिधीयते। त्रिशशिभिश्शोभाः विपर्यस्तैश्शशित्रिपदैरुपशोभाः। अन्तर्बहिश्च त्रिभिः त्रिभिः पदैः कोणानि। श्रुतिपदैः पद्मपीठस्य गात्रम्। ईषादण्डः। दहनपदैः केणेषु पादा[1] स्युः।।४५।।

पीता पङ्कजकर्णिका दलततिः श्वेतान्तराल हरि-
द्वर्णं रक्तरुचोऽश्रयः सितपदारक्तेषकं[2] पीठकम्।
वीथी[3] कल्पलतादिचित्रिततराथ द्वारशोभोपशो-
भाश्रि स्यात् सितरक्तपीतशितिवर्णाकीर्णचूर्णोज्ज्वलम्[4]।।४६।।

विमर्शिनी

अथ पङ्कजकर्णिका पद्मस्य कर्णिका पीता पीतवर्णा। दलततिः दलसमूहः श्वेता। अन्तरालं दलान्तरालं हरिद्वर्णं श्यामम्। अष्टदलाद् बहिः पीठस्यान्तर्गताः अश्रयः रक्तरुचः रक्तवर्णाः। पीठकं सितपदारक्तेषकं सितवर्णपादम् आरक्तवर्णगात्रं च। वीथी कल्पलतादिचित्रिततरा कल्पलतादिभिर्वैचित्र्ययुक्ता। द्वारशोभोपशोभाश्रि[5] क्रमेण सितरक्तपीतशितिवर्णाकीर्णचूर्णोज्ज्वलं श्वेतरक्तपीतकृष्णवर्णैः आकीर्णैः क्षिप्तैः चूर्णैः रजोभिः उज्ज्वलं दीप्तं स्यात्।।४६।।

विवरणम्

वर्णान् दर्शयति-पीतेति। दलततिः दलसमूहः दलाष्टकमिति यावत्। अन्तराले दलानामेवान्तरान्तरावकाशः। हरिच्छ्यामाः अश्रयो दलमण्डलपीठान्तरालदेशाः। सितानि पदान्यारक्ता ईषाश्च यस्येति समासः। चूर्णोज्ज्वलेति[6] सर्ववर्णनिर्माणप्रदर्शनार्थमेतत्।।४६।।

---

१. 'वाद्याः स्युः' च. पाठः। २. 'षु' घ. पाठः। ३. 'थिः' ख. पाठः। ४. 'लाः' क. पाठः। ५. 'श्रिः' ङ. पाठः। ६. 'पि' क. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

पीताणुमूलपृथुलारुणमध्यशुभ्र-
बिन्द्वग्रकाः प्रतिदलं युगलात्मकाः स्युः।
तत्केसरा बहिरथ त्रिगुणात्मकाश्च
रेखा लघीयसि; महीयसि भूतरूपाः।।४७।।

विमर्शिनी

तत्केसराः तस्याष्टदलपद्मस्य केसराः पीताणुमूलपृथुलारुणमध्यशुभ्रबिन्द्वग्रकाः पीतवर्णकृशमूलाः अरुणवर्णस्थूलमध्याः सितवर्णबिन्दुयुक्ताग्रकाश्च प्रतिदलं दले दले युगलात्मकाः द्विद्विसंख्याश्च स्युः। अथ लघीयसि अल्पे मण्डले द्वारादीनां बहिः त्रिगुणात्मकाः सत्त्वरजस्तमोरूपाः श्वेतरक्तकृष्णवर्णाः रेखाश्च स्युः। महीयसि महत्तरे मण्डले भूतरूपाः पृथिव्यप्तेजोवाय्वाकाशात्मकाः पीतश्वेतरक्तश्यामकृष्णवर्णा रेखा[१]ः स्युः। तत्र सर्वमण्डलेष्वपि हरिद्रादिरजोभिरेव वर्णाः कल्पनीयाः। तथा च प्रपञ्चसारे-

"हारिद्रं स्याद् रजः पीतं ताण्डुलं च सितं भवेत्।
तथा दोषारजः क्षारसंयुक्तं रक्तमुच्यते।।
कृष्णं दग्धपुलाकोत्थं श्यामं बिल्वदलादिकम्।"

इति।।४७।।

विवरणम्

तत्र पीतमणु च मूलं पृथुलमरुणं च मध्यं शुभ्रो बिन्दुरग्रे केसराणां स्यात्। लघीयसीति। चतुर्हस्तपर्यन्तग्रहणम्। त्रिगुणात्मिकाः सितरक्तासिताः। भूतरूपाः पीतशुभ्रारुणश्यामकृष्णाः।।४७।।

चक्राब्जेऽत्र विकारवर्गपदवत्क्षेत्रेऽन्तरर्धेऽभितो
विथीक्षेत्रशरद्विभागसहिते वृत्तीकृतेऽर्धीकृते।
बाह्यार्धे दहनांशनेमिपरिशिष्टं स्यादरक्षेत्रकं
शेषार्धे श्रुतिभागनाभिपरिशिष्टं चाम्बुजक्षेत्रकम्।।४८।।

विमर्शिनी

अथ चक्राब्जे मण्डले विकारवर्गपदवत्क्षेत्रे पूर्वविधिना षट्पञ्चाशदधिकद्विशत-

१. 'खाश्च स्युः'।

Shripuram Publications
www.shripuram.org

पदसहिते क्षेत्रे अत्रान्तरर्धे अभितश्चतुर्ष्वपि दिक्षु विथीक्षेत्रशरद्विभाग सहिते विथीक्षेत्रं पञ्चांशीकृत्य तद्द्विभागमन्तर्योजिते तत्र[1] वृत्तीकृते च सति, अर्धीकृते तद्वृत्तविस्तारस्यार्धेन[2] वृत्तीकृते च सति, तयोरर्धोर्बाह्यार्धे दहनांशनेमिपरिशिष्टं तृतीयांशं बहिर्नेम्यर्थं त्यक्त्वा तदवशिष्टमरक्षेत्रं स्यात्। शेषार्धेऽन्तरर्धे श्रुतिभागनाभिपरिशिष्टं चतुर्थांशं बहिर्नाभ्यर्थं त्यक्त्वा तदवशिष्टम् अम्बुजक्षेत्रकं च स्यात्।।४८।।

विवरणम्।

इदानीं चक्राब्जे विशेषान् दर्शयति-चक्राब्जेऽत्रेति। अभितः समन्ततः। वीथीक्षेत्रशरद्विभागसहिते द्विपङ्क्तिमयी[3] वीथिरभिहिता। तत्र पञ्चधा विभक्ते त्रिभिरेव भागैरिह वीथिःस्यात्। भागद्वयं त्वन्तरर्धे योजनीयः। दहनांशनेमिपरिशिष्टं स्यादिति। बाह्यार्धं त्रेधा विभज्य बहिस्तृतीयांशं नेमिभागं कल्पयेदित्यर्थः। एवं श्रुतिभागनाभिपरिशिष्टमिति।।४८।।

प्राग्वत् पञ्चविभक्तमम्बुजपदं त्रित्रिद्विभक्तं क्रमात्
कृत्वा नाभ्यरनेमिकं च परिवर्त्याराण्यथास्फालयेत्।
दिक्सूत्रस्पृगरान्तवृत्तनिहितैराकर्णिकान्तायतैः
सूत्रैर्द्वादशधा भ्रमादरपदं षोढा च भङ्क्त्वैकशः।।४९।।

एष्वष्टादशकोष्ठवत्स्वरपदेष्वन्तःस्थषट्कोष्ठगा-
न्यन्तर्वृत्तगतैककोच्छुरितपार्श्वद्वन्द्वतुन्दीनि च।
इत्यष्टाष्टपदैरराण्यपदिशं कुर्यादिह द्वादशा-
थैतावन्ति हरित्पदानि परिशिष्टान्यन्तरालान्यपि।।५०।।

विमर्शिनी

पञ्चविभक्तं पञ्चधा विभक्तम् अम्बुजपदम् अष्टदलपद्मस्थानं प्राग्वत भद्रकोक्तवत् कुर्यात्। नाभ्यरनेमिकं नाभ्यरनेमिस्थानानि क्रमात् त्रित्रिद्विभक्तं नाभ्यरस्थानं च त्रित्रिभक्तं नेमिस्थानं द्विभक्तं च कृत्वा तानि स्थानानि परिवर्त्य वृत्तीकृत्याथराण्यास्फालयेत्। आस्फालनप्रकारमाह-दिक्सूत्रेति। दिक्सूत्रस्पृगरान्तवृत्तनिहितैः दिक्सूत्रस्पृष्टेषु अरपर्यन्त-

१. 'अ' ग. पाठः। २. 'न च वृ' ग. पाठः। ३. 'यी हि वी' क. च. पाठः।

Shripuram Publications
www.shripuram.org

वृत्तेषु निहितैः स्थापितैः आकर्णिकान्तायतैः कर्णिकामध्यपर्यन्तदीर्घैः सूत्रैर्भ्रमात् अरपदम् अरस्थानं द्वादशधा भङ्क्त्वा पुनरेकशः षेढा च भङ्क्त्वा अष्टादशकोष्ठवत्सु एषु अरपदेषु अन्तःस्थषट्कोष्ठगानि अन्तर्गतषट्कोष्ठेषु गतानि अन्तर्वृत्तगतैकको-च्छुरितपार्श्वद्वन्द्वतुन्दीनि मध्य[१]मवृत्तगतैकैकस्योच्छुरणेन वर्धनेन पार्श्वद्वये तुन्दीनि उदरयुक्तानि च इति उक्तेन विधिनाष्टाष्टपदैः उपदिशं दिग्भ्योऽन्यत्र गतानि द्वादश अराणि कुर्यात्। अथेह एतावन्ति द्वादशसंख्यानि हरित्पदानि द्वादशपदानि दिग्गतानि च परिशिष्टानि अरेभ्यः परिशिष्टान्यन्तरालान्यपि कुर्यात्।।४९, ५०।।

विवरणम्

प्राग्वत् पञ्चविभक्तमम्बुजपदमिति। दलाग्रदलतत्सन्धिकेसरकर्णिकार्धमित्यर्थः। परिवर्त्येत्यनेन च सम्बन्धः। नाभ्यन्तरनेमिकं क्रमात् त्रित्रिद्विभक्तमिति। नाभिं त्रिधा विभज्य अरक्षेत्रमपि त्रिधा नेमिक्षेत्रं तु द्विधा समं विभजेदित्यर्थः। अथ दिक्सूत्रस्पृगरान्तवृत्तनिहितैः आकर्णिकान्तायतैस्सूत्रैः भ्रमाद् द्वादशधा अरं एकशः षोढा च भङ्क्त्वाराण्यास्फालयेदित्यन्वयः। दिक्सूत्राण्यत्र पूर्वापरदक्षिणोत्तरसूत्राणि। तत्र प्राचीनसूत्रस्यारपराचीनवृत्तस्य च यस्सन्धिस्तत्र सूत्रं निधाय गर्भाङ्कपर्यन्तं सूत्रं सारयित्वा तेन सूत्राग्रेण तस्मिन्नेव वृत्ते उत्तरतो दक्षिणतश्चाङ्कौ कुर्यात्। [२]तावुत्तरैशानयोः याम्याग्नेययोश्चारयोस्सन्धी भवतः। एवं दक्षिणपश्चिमोत्तरसूत्रवशात् सन्धयः कार्याः। अथ तेषु सन्धिषु स्वषष्ठसन्ध्यन्वये[३]न सूत्राण्यास्फालयेत्। तानि द्वादशारपदानि सम्पद्यन्ते। ततः प्रत्यरं समं पञ्चभिरङ्कैः अर्वाचीनपराचीनवृत्तयोष्षोढा विभज्य पञ्च पञ्च सूत्राणि कुर्यात्।।४९।।

अष्टादशकोष्ठवत्स्वरपदेष्विति। प्रतिपदं प्राग्विरचितवृत्तत्रयभेदेन त्रिस्त्रिर्वि-भागलाभात्। अन्तस्थषट्कोष्ठ[४]गानीति। प्रतिपदं त्रीणि षट्कानि हि सन्ति तत्र प्रतिषट्-कमभितो द्वे द्वे पदे विहायान्तरवशिष्यमाणे द्वे द्वे पदे मार्जयेदित्यर्थः। अन्तर्वृत्तगतैक-कोच्छुरितपार्श्वद्वन्द्वतुन्दीनि चेति। उच्छुरितं मिश्रितं पार्श्वद्वन्द्वं तेन तुन्दीनि स्थविष्ठमध्यप्रदेशानि। मध्यवृत्तेऽभितो ये द्वे द्वे पदे विहीने तयोरान्तरे पदे अरेष्वेव योजयेदित्यर्थः। अष्टाष्टपदैरिति। अर्वाचीनवृत्ते द्वे पदे, मध्यमे चत्वारि, पराचीने च

---

१. ‘ध्युवृ’ ख. घ. च. पाठः। २. ‘ता उत्त’ क पाठः। ३. ‘ये सु’ च. पाठः। ४. ‘का’ क. घ. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

द्वे, सम्भूयाष्टौ पदानीत्यर्थः। अपदिशमिति चतुर्दिक्ष्व[1]न्तराणि न स्युः। अपि त्वरसन्ध्य एवेत्यर्थः। एतावन्तीति द्वादश ककुप्पदानि दशपदानि। पूर्ववृत्ते चत्वारि, मध्यमे द्वे, पराचीने चत्वारि च पदानि, सम्भूय दश स्युरित्यर्थः।।५०।।

अन्तःस्थानरमध्यबध्नदुभयान्तान् द्वादशाथ *प्रथीन्
बाह्यानान्तरमध्यबद्धशिरसः कुर्यात् पुनस्तावतः।
सत्त्वाद्युक्तरुचिस्त्रिनाभिररुणाराल्यन्तरं कृष्णरुक्
पर्यायारुणपीतरुक् प्रथिगणोऽन्यद् भद्रकोद्दिष्टवत्।।५१।।

विमर्शिनी

अथान्तःस्थान् द्वादश प्रथीन् अरमध्यबध्नदुभयान्तान् अराणां मध्येषु सम्बध्यमानोभयाग्रान् कुर्यात्। पुनर्बाह्यानपि आन्तरमध्यबद्धशिरसः अन्तरालानां मध्येषु बद्धशिरसः तावतः द्वादश कुर्यात्। त्रिनाभिः नाभित्रयं सत्त्वाद्युक्तरुचिः सत्त्वरजस्तमसामुक्त-श्वेतरक्तकृष्णव[2]र्णम्। अराली अराणां समूहः। अरुणा रक्तवर्णा। अन्तरम् अन्तरालं कृष्णरुक् कृष्णवर्णम्। प्रथिगणः प्रथीनां गणः पर्यायारुणपीतरुक् पर्यायेण एकैकान्तरेणा-रुणपीतवर्णः। अन्यत् कर्णिकादि वीथीद्वारादि च भद्रकोद्दिष्टवत् भद्रकोक्तप्रकारेण।।५१।।

विवरणम्

द्विधाविभक्ते नेमिक्षेत्रे द्वादशः द्वादश नेमयः कार्याः। तेष्वान्तरनेमीनामर-मध्यसूत्रान्तेषु सीमाः बाह्यानामरसन्धिमध्यसूत्रान्तेषु सीमाः स्युः। बध्नदिति शतृप्रत्ययः सम्बध्यमानवचनः। अन्तरशब्दोऽत्रारसन्धिवचनः। सत्त्वाद्युक्तरुचिः। सिता रक्ता कृष्णा चेत्यर्थः। अराली अराणां गणः। अन्तरमरसन्धिरेव। पर्यायारुणपीतरुगिति। एको नेमिररुणः अपरः पीतः इत्येवं न्यायादित्यर्थः।।५१।।

धृतिकृतिपुटक्षेत्रे मध्ये विधाय विधानतो
विकृतिकृतिसङ्ख्यातैः कोष्ठैः समीरितभद्रकम्।
लिखतु परितः पङ्क्तौ शक्त्यष्टकं रसकोष्ठकै-
र्दिशि विदिशि च स्वोपान्तस्थोपकोष्ठदलाञ्चलम्।।५२।।

---

१. 'क्ष्वरा' क. पाठः। २. 'र्णः' क. पाठः। *'प्रथमे प्रथिरित्येक' इति क्षीरस्वामी।

Shripuram Publications
www.shripuram.org

विमर्शिनी

शक्तिदण्डकभद्रकलक्षणमाह-धृतीति। धृतिकृतिपुटक्षेत्रे धृतिरष्टादश तत्कृतिस्तद्वर्गः तत्संख्यपदे क्षेत्रे मध्ये विकृतिकृतिसंख्यातैः षोडशवर्गसंख्यैः कोष्ठैर्विधानतः समीरितभद्रकम् उक्तं भद्रकं विधाय परितः पङ्क्तौ रसकोष्ठकैः षट्कोष्ठैः दिशि विदिशि च अष्टदिक्षु शक्त्यष्टकं शक्तीनामष्टकं लिखतु। स्वोपान्तस्थोपकोष्ठदलाञ्चलं स्वानां स्वानां षण्णां कोष्ठानां समीपस्थेऽर्धकोष्ठेऽञ्चलमग्रं यथा भवति तथा लिखतु।।५२।।

विवरणम्

शक्तिभद्रकमाह-धृतिकृतिपुटक्षेत्र इति। दिशि विदिशि च रसकोष्ठकैरित्यन्वयः। स्वोपान्तस्थोपकोष्ठदलाञ्चलमिति। षण्णां पदानामनन्तरं यदुभयत्र कोष्ठं तदुपकोष्ठं तच्च शक्तेरुपान्तस्थं भवति तस्य दलेनार्धेनाञ्चलमग्रं यस्येति समासः। एवमष्टपदसम्पाद्या शक्तिः कोणगतं तु पदमुपेक्ष्यत एव। तथा च दिशि शक्तेरष्टौ पदानि विदिशोरुभयत्र चत्वारि चत्वारि कोणयोरेकमेकम्, एवमष्टादशपदानि विनियुक्तान्यवगन्तव्यानि।।५२।।

मध्येशक्ति पदद्वयेन रचयेन्मुष्टिं दिशास्वश्रिषु
त्यक्त्वा कोणगतैककं पदयुजा तत्प्रान्तयुक्स्थास्नुना।
मुष्ट्युद्दिष्टपदान्तपार्श्वयुगदोस्सूत्रेण शक्त्यग्रके
तत्तार्तीयककोष्ठमध्यमिलिताग्रेणालिखेद् द्वे अपि।।५३।।

विमर्शिनी

तत्र शक्तीनां लेखनप्रकारमाह-मध्येशक्तीति। दिशासु मध्येशक्ति शक्तेर्मध्ये पदद्वयेन मुष्टिं शक्तेर्मुष्टिप्रदेशं रचयेत्। अश्रिषु कोणगतैककं पदं त्यक्त्वा तत्प्रान्तयुक्स्थास्नुना तस्य कोणपदस्य समीपस्थितेन पदद्वयेन मुष्टिं रचयेत्। द्वे शक्त्यग्रके शक्तीनां द्वे द्वे अग्रे अपि मुष्ट्युद्दिष्टपदान्तपार्श्वयुगदोस्सूत्रेण मुष्ट्युद्दिष्टपदद्वयान्तस्य पार्श्वयुग्मस्थितेन भुजासूत्रेण तत्तार्तीयककोष्ठमध्यमिलिताग्रेण तस्या मुष्टेरन्तद्वयात् तृतीयकोष्ठमध्ये संयुक्ताग्रेण सूत्रद्वयेनालिखेत्।।५३।।

Shripuram Publications
www.shripuram.org

विवरणम्

दिशासु मध्येशक्ति पदद्वयेन मुष्टिं रचयेदित्यन्वयः। अष्टपदा ह्येका शक्तिः। तस्या मध्ये द्वाभ्यां मध्यसूत्रमभितो गताभ्यां ग्रहणप्रदेशमारचयेत्। अश्रिषु कोणगतैकैकं त्यक्त्वा तत्प्रान्तयुक्स्थास्नुना पदयुजेत्यन्वयः। मुष्टिं रचयेदित्यनुषङ्गः। कोणस्थमेकं पदमुपेक्ष्य तमभितो[1] गताभ्यां पदाभ्यां अर्धशो मुष्टिमारचयेदित्यर्थः। मुष्ट्युद्दिष्टेति। ये मुष्ट्यर्थमुद्दिष्टे पदे तयोरन्तं पार्श्वयुगं मध्यसूत्रानन्तरसूत्रस्य पुटसूत्रयोश्च सन्धी तत्र यद्दोःसूत्रं बाहुरूपेणायतं सूत्रं[2] तच्चोभयं निजतृतीयपदमध्ये मिलिताग्रं भवति तदा द्वे शक्त्यग्रे स्याताम्।।५३।।

विन्यस्यच्छोटिकां मुष्ट्यभिहितपदयुङ्मध्यदिक्सूत्रसंस्थां
सूत्रं तावत्प्रमाणं भ्रमयतु बहिरन्तश्च दोस्सूत्रसंस्थम्।
सूत्र तत्प्रान्तयोस्तद्दलमितमपि संवर्तयेत् कोणसिद्ध्यै
दिश्येवं कोणमुष्टिं विरचयतु तथा सन्धिभुग्नावलग्नम्।।५४।।

विमर्शिनी

मुष्ट्यभिहितपदयुङ्मध्यदिक्सूत्रसंस्थाम् मुष्टेरुक्तपदद्वयमध्यगतदिक्सूत्रस्थितां छोटिकां छोटिकामुद्रां बहिरन्तश्च विन्यस्य तावत्प्रमाणं दोस्सूत्रसंस्थं सूत्रं भ्रमयतु। तत्प्रान्तयोः तस्य समीपयोः कोणसिद्ध्यै तद्दलमितं तदर्धसम्मितमपि संवर्तयेत्। एवं दिशि विरचयतु। तथा कोणमुष्टिं कोणगतां मुष्टिं सन्धिभुग्नावलग्नं सन्धिषु भुग्नं वक्रीभूतमवलग्नं मध्यं यथा भवति तथा विरचयतु।।५४।।

विवरणम्

मुष्टावेवेति कर्तव्यताविशेषं दर्शयति-विन्यस्येति। मुष्टिरूपे ये पदे तयोर्मध्ये यन्मध्यसूत्रमस्ति तत्र छोटिकां विन्यस्याङ्कं कृत्वा[3] तत्प्रमाणं सूत्रं[4] भ्रमयेत्। अथ तस्या मुष्टेर्बहिः पराचीनपुटसूत्रमध्यसूत्रसन्धिलग्नमूलेन तावत् परिमाणेन भ्रमयेत्। एवमन्तरपि द्रष्टव्यम्। तस्या मुष्टेरेवोभयोरन्तरयोरुक्तपरिमाणार्धसम्मितसूत्रेण दोस्सूत्रस्थेन बहिरन्तश्च भ्रमयेत्। ते मुष्टिकोणे भवतः। दिश्येवमित्युक्तोपसंहारः। तथेति छोटिकाविन्यासाद्यतिदेशः।

---

१. 'द' क २. 'ग्रं चोभ' च पाठः। ३. 'त्वा तत्र त' क. पाठः। ४. 'त्रं प्रभ्रम' घ. पाठः।

Shripuram Publications
www.shripuram.org

सन्धिभुग्नावलग्नमिति। सन्धौ भुग्नमवलग्नं मध्यप्रदेशो यथा भवतीति क्रियाविशेषण-मेतत्।।५४।।

शक्त्यग्रान्तरमुष्टिशिष्टपदवर्णं रक्तपीतारुणा-
कृष्णं श्यामलकोणगैककविराजद्देवताविग्रहम्।
शोभे पीतहरिद्रुची विरचयेत् कोणं त्रिशूलोज्ज्वलं
पीतां विथिमथाङ्घ्रिगात्रमसितारक्तं परं पूर्ववत्।।५५।।

विमर्शिनी

तत्पूरणप्रकारमाह-शक्त्यग्रेति। शक्त्यग्रान्तरमुष्टिशिष्टपदवर्णं शक्त्यग्रस्य तदन्तरस्य मुष्टेरवशिष्टपदस्य च वर्णं क्रमात् रक्तपीतारुणाकृष्णं विरचयेत्। श्यामलकोणगैककविराजद्देवताविग्रहं श्यामलेषु कोणगतैकपदेषु शोभमानं देवताया भगवत्या विग्रहं च विरचयेत्। अत्र शोभे शोभेपशोभे पीतहरिद्रुची पीतश्यामवर्णे। कोणं त्रिशूलोज्ज्वलं कोणानि त्रिशूलोनोज्ज्वलानि। विथीं पीताम्। अथ अङ्घ्रिगात्रं पीठस्य पादान् गात्राणि च असितारक्तं कृष्णानि रक्तानि च। परम् उक्तादवशिष्टं पूर्ववत् भद्रकोक्तवत्।।५५।।

विवरणम्

शक्तेरग्रस्यान्तरस्य मुष्टेः शिष्टपदस्य च वर्णमिति समासः। शक्तेरग्रं रक्तं अन्तरं[१] पीतं मुष्टिः पीतः। अन्तरालं कृष्णमित्यर्थः। शोभे इति शोभोपशोभयोर्ग्रहणम्। अङ्घ्रिगात्रं पद्मपीठस्य पादाः। ईषादण्डश्च।।५५।।

कुर्यात् षड्दलमब्धिवर्गपुटकेऽत्रान्तश्चतुष्कस्फुरद्-
वृत्तेषु त्रिषु कर्णिकां च दलसन्धिं[२] षड्दलान्यंशकैः।
सन्ध्यर्धेऽत्र तु केसरांश्च रचयेद् द्वाराणि दिक्षु द्विकैः
कोणान्येकपदैरितीषुजनुषि स्यात् षड्दलं मण्डलम्।।५६।।

विमर्शिनी

अब्धिवर्गपुटके षोडशपदक्षेत्रे षड्दलं मण्डलं कुर्यात्। अत्र अन्तश्चतुष्कंस्फुरद्वृत्तेषु अन्तर्गतचतुष्के स्फुरत्सु त्रिषु वृत्तेषु अंशकैः क्रमात् कर्णिकां दलसन्धिं षड्दलानि च

---

१. 'आ' घ पाठः। २. 'न्धीन्' इति मूलकोशपाठः।

Shripuram Publications
www.shripuram.org

रचयेत्। अंशकैरित्यनेन षड्दलानां विभागोऽप्युक्तः। तत्र दक्षिणोत्तरसूत्रस्पृष्टबहिर्वृत्ते स्थित्वा तस्माद् कर्णिकामध्यमानेन तस्मिन् वृत्ते चतुरोऽङ्कान् कृत्वा तेषु सूत्राण्यास्फाल्य षोढा विभजेदित्यर्थः। अत्र तु अत्रापि सन्ध्यर्धे दलसन्धेरर्धप्रमाणान् केसरांश्च रचयेत्। दिक्षु द्विकैर्द्वाराणि, एकपदै[1]रेकैकपदैः कोणानि च रचयेत्। अत्र पूरणं भद्रकोक्तवदेव। इति इषुजनुषि स्कन्दे षड्दलं मण्डलं स्यात्।।५६।।

विवरणम्

अब्धिवर्गपुटके पञ्चसूत्रास्फालनसिद्धे। सन्ध्यर्धाहितकेसरांश्चेति। दलसन्धिभागं समं द्वैधं कृत्वा वृत्तमालिख्य अन्तर्वृत्ते प्रागुक्तरीत्या केसराः कार्याः। बहिर्वृत्त एव तु दलसन्धयः स्युरित्यर्थः। दिक्षु द्विकैरिति शोभा विरहाद्दीर्घचतुरश्रं द्वारं समचतुरश्रं च कोणं भवति।।५६।।

सम्यक्साधितमण्डपेऽथ जनिमज्ज्वाज्वल्यमानानलो-
द्दीप्ते स्वेप्सितमन्त्रदैवतसमिज्याभ्युज्ज्वलन्मण्डले।
क्वाथोदादिसुसम्भृताञ्चितघटाढ्ये दीक्षणीयं गुरुः
शुद्धं प्राशितगव्यमन्तरुपनीय स्थापयेदग्रतः।।५७।।

पृथ्व्यादिप्रतिसर्गविग्रहविशुद्ध्युत्पत्तिमन्त्रोदय-
न्यासार्चेशकराभिमर्शविधिभिः संशुद्धि[2]बुद्धात्मनि।
तत्राराधितमण्डलाधिगतदेवेक्षात्तपुण्योच्चये-
ऽन्वारब्धेऽथ करोतु तत्त्वहवनं तत्संस्क्रियार्हं सुधीः।।५८।।

विमर्शिनी

इति मण्डलान्यभिधाय तत्प्रसङ्गादाचार्य[3]कसिद्धयेऽवश्यकरणीयं दीक्षाविधिं संक्षेपेणाह। सम्यगिति। अथ सम्यक्साधितमण्डपे यथोक्तप्रकारेण संस्कृते[4] मण्डपे जनिमज्जाज्वल्यमानानलोद्दीप्ते कृताग्निजननत्वात् कृताग्निमुखत्वाच्च प्रदीप्ताग्नौ स्वेप्सितमन्त्रदैवतसमिज्याभ्युज्ज्वलन्मण्डले च स्वस्येप्सितमन्त्रदेवतावाहनपूजनादिना प्रशोभमाने मण्डले क्वाथोदादिसुसम्भृताञ्चितघटाढ्ये कषायपञ्चगव्यादिना सम्पूर्णेन पूजितेन कलशेन च युक्ते अन्तः अन्तर्भागे गुरुः दीक्षणीयं दीक्षायोग्यं, शुद्धम्

१. 'दै' 'को' ख. ङ. च. पाठः। २. 'द्ध' ख. ग. पाठः। ३. 'त्व' ४. 'त' ख. घ. ङ. च. पाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

उभयकुलपरिशुद्धं स्नानादिना च शुद्धं, प्राशितगव्यं दीक्षार्थमुपोषितं प्राशितपञ्चगव्यं शिष्यमुपनीय स्वस्याग्रतः स्थापयेत्।।५७।।

अथ सुधीः दीक्षाविधानतत्त्वज्ञो गुरुः पृथ्व्यादिप्रतिसर्गविग्रहविशुद्ध्युत्पत्तिमन्त्रोदयन्यासार्चेशकराभिमर्शविधिभिः पृथ्वादिप्रतिसर्गेण पृथिव्यादितत्त्वानां संहारेण विग्रहविशुद्ध्या शरीरस्य शोषणदाहनादि[1]विशेषशुद्ध्या उत्पत्त्या तत्त्वसृष्ट्य मन्त्रोदयप्राणायामेन मन्त्रन्यासैरर्चनेन स्वस्येशस्य कराभिमर्शेन विष्णुहस्तादिभिः स्पर्शनेन च एवंविधैर्विधिभिः संशुद्धि[2]बुद्धात्मनि सम्यक्शुद्ध्या प्रबुद्धात्मस्वरूपे आराधितमण्डलाधिगतदेवेक्षात्तपुण्योच्चये आराधितपूर्णपुष्पाञ्जलौ मण्डलेऽधिगतस्य देवस्येक्षणेन परिगृहीतपुण्यसञ्चये तत्र शिष्ये अन्वारब्धे अग्निसमीपे दर्भेण संस्पृश्य दक्षिणत उपविष्टे सति तत्संस्क्रियार्हं तस्य शिष्यस्य संस्काराय योग्यं तत्त्वहवनं करोतु।।५८।।

विवरणम्

एवं बहिरङ्गानि साधनान्यभिधाय अन्तरङ्गानि मन्त्रादिरूपाणि साधनानि वदन् तेषां मन्त्राणां दीक्षापूर्वकमेव श्रोतव्यत्वाद् दीक्षाविधानं संक्षेपेण ब्रूते-सम्यक्साधितमण्डप इति। अत्रायं प्रयोगक्रमः। मण्डपसंस्कारमग्निजननं च कृत्वा तस्मिन् मण्डपे स्वेष्टदेवतायोग्यं मण्डलमालिख्य तत्र पीठं विरचय्य घटं विन्यस्य विधिवत् कषायादिना सम्पूर्य स्वेष्टदेवतां विधिवदावाह्य सम्पूज्य गुरुर्दीक्षायोग्यं शुद्धं प्राशितपञ्चगव्यं शिष्यमाहूयाग्रतः स्थापयेत्। पुनस्तत्त्वसंहारं शोषणादिकं तत्त्वसृष्टिं च लिपिन्यासान्तं विधाय मन्त्रोदयमन्त्रन्यासादिभिः सकलीकृत्य शिष्येण मण्डलगतं देवं पुष्पपूर्णाञ्जलिराराधयित्वा नेत्रबन्धं विमुच्य तं दर्शयित्वा कुण्डसमीपं गत्वा तद्दक्षिणतः संस्थाप्य तत्त्वहोमं यथार्हं कुर्यात्।।५७, ५८।।

हुत्वाज्यं मनुभिः शतं विहितबीजस्थैः पृथिव्यादिभि-
र्मन्त्री तत्र निवृत्तिपूर्वककलात्मान्तैः क्रमात् पञ्चभिः।
अन्त्यं स्वात्मनि पूर्णया परतरे नीत्वा समित्पूर्वकं
हुत्वा निष्कृतयेऽस्त्रतः प्रणवतः शान्त्यै च तावद् हुनेत्।।५९।।

कृत्वा होमसमाप्तिमत्र परिशुद्धे धारणाभिस्ततः
क्षेत्रे क्षेत्रविदं सुयोज्य जनयित्वा तात्त्विकं विग्रहम्।

१. 'दिना वि' ग. ङ. पाठः। २. 'द्ध' इति व्याख्यकोशपाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

साकल्यं परिकल्प्य पूर्णकलशेनासिच्य देवाग्रतः
संश्राव्याणुवरं तदर्हसमयाद्यं च स्वयं शिक्षयेत्[1]।।६०।।

विमर्शिनी

तत्र होमे मन्त्री दीक्षायां प्रसक्तानां मन्त्राणां प्रयोगकुशल आचार्यः विहितबीजस्थैः 'ह्लां ह्वीं ह्वूं ह्वैं ह्वौं' इति[2] बीजानामुपरिगतैः निवृत्तिपूर्वककलात्मान्तैः 'निवृत्तिकलात्मने स्वाहा[3]' 'प्रतिष्ठाकलात्मने स्वाहा' इत्याद्यवसाने युक्तैः पृथिव्यादिभिः पञ्चभिर्मनुभिः क्रमाच्छतं शतमाज्यं हुत्वा अन्त्यं तत्त्वं पूर्णया परतरे स्वात्मनि नीत्वा समित्पूर्वकं चतुर्द्रव्यं[4]कं हुत्वा निष्कृतये प्रायश्चित्तायास्त्रतः शान्त्यै प्रणवतश्च तावत् शतं हुनेत्।।५९।।

पुनर्गुरुः स्वयं होमसमाप्तिं कृत्वा ततो धारणाभिः[5] परिशुद्धेऽत्र क्षेत्रे क्षेत्रविदं जीवात्मानं सुयोज्य तात्त्विकं विग्रहं जनयित्वा साकल्यं परिकल्प्य पूर्णकलशेनासिच्य देवाग्रतोऽणुवरं संश्राव्य तदर्हसमयाद्यं च शिक्षयेत्[6]। संश्राव्येत्यस्यायमभिप्रायः-मन्त्रोपदेशकाले क्वचिच्छुद्धे भूतले अष्टवर्गिणीं मातृकामालिख्य तयैवावाह्य संपूज्य तस्या मातृकाया मन्त्रगतानक्षरानुद्धृत्य क्वचिदालिख्य तद्गतान् दोषान् परिहृत्य सम्पूज्य शिष्यायोपदिशेदिति।।६०।।

विवरणम्

"ह्लां पृथिव्यै निवृत्तिकलात्मने हुं फट् स्वाहा" इत्यादिभिः पञ्चभिर्मन्त्रैः[7] शतं शतं हुत्वा पूर्णाहुतिं च कृत्वा मूलेन चतुर्द्रव्यं च तावद्धुत्वास्त्रमन्त्रेण प्रणवेन च तावद्धुत्वा होमं समापयेत्। पुनरेवं सत्त्वशुद्धिसंपन्नं शिष्यं धारणाभिर्विशोध्य क्षेत्रज्ञं योजयित्वा तत्त्वसृष्ट्यादिभिः साकल्यं कल्पयित्वा यथाविधि तेन कलशेनाभिषिच्य मन्त्रमुपदिश्य समयाद्यं शिक्षयेदिति।।५९, ६०।।

आद्येषुस्वरभान्तबिन्दुरुदितस्ताराभिधो मन्त्रराड्
ब्रह्माद्योऽस्य मुनिः प्रजापतिरथो दैव्यादिगायत्र्यपि।
छन्दः स्यान्मनुदेवता च परमात्मा क्लीबहीनस्वर-
द्वन्द्वान्तर्गततारतोऽङ्गमथवा सत्योनभूरादिभिः।।६१।।

---

१. 'त्।। अथ शि' ख. पाठः। २. 'त्यादिबि' ग. घ. ङ पाठः। ३. 'हा इ' ४. 'व्यं हु' ग. पाठः। ५. 'णादीप' ङ. पाठः। ६. 'त्।। अत्र' ख. घ. ङ. च. पाठः। ७. 'श्चम' क. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

अत्र प्रस्तुतान् मन्त्रानुद्धरन् पूर्वं प्रणवमुद्धरति-आद्येति। आद्येषुस्वरभान्तबिन्दुः आद्योऽक्षरः अकारः, इषुस्वरः पञ्चमस्वर उकारः, भान्तो मकारः, बिन्दुरनुस्वारः, एवं चतुर्भिर्वर्गैरुपेतः ताराभिधो मन्त्रराट्। सर्वेषां मन्त्राणामधिपत्याद् राजशब्दोपचारः कृतः। अस्य तारस्य ब्रह्माद्यः प्रजापतिः ब्रह्मप्रजापतिः मुनिः ऋषित्वे उदितः। अथो दैव्यादिगायत्र्यपि दैवी गायत्री छन्दः स्यात्। परमात्मा मनुदेवता मन्त्रस्य देवता च स्यात्। क्लीबहीनस्वरद्वन्द्वान्तर्गततारतः ऋ ॠ लृ ॡ इति चत्वारः क्लीबाः नपुंसकानि[१], तैर्हीना अवशिष्टा द्वादशस्वराः, तेषां स्वरद्वन्द्वानामन्तर्गतैस्तारैः 'अं ओं आं हृदयाय नमः' इत्याद्यैरङ्गम्। अथवा सत्योनभूरादिभिः सत्यरहितैर्भूरादिभिः षड्भिः 'ओं भूरात्मने हृदयाय नमः' इत्याद्यैरित्यर्थः।।६१।।

विवरणम्

एवं संक्षेपेण दीक्षामभिधाय मूलादिक्रमेण मन्त्रानुद्धरन् प्रथमं सर्वमन्त्रसामान्यं प्रणवमुद्धरति- आद्येषुस्वरेति। आद्योऽकरः, इषुस्वरः पञ्चमस्वर उकारः, भान्तो मकारः, बिन्दुरनुस्वारः, एतैः संश्लिष्टः प्रणवाभिधो मन्त्रराजःष क्लीबहीनस्वरद्वन्द्वान्तर्गततारतोऽङ्गमिति। "अं ओं आं हृदयाय नमः" इत्याद्यङ्गानीत्यर्थः।।६१।।

अथ शिवनारायणयोस्तारनमोन्ते स्वनामनी ङेन्ते
रसवसुवर्णसमेतौ मूलमनू मन्त्रविद्भिरुद्दिष्टौ।।६२।।

विमर्शिनी

मूलमन्त्रानुद्धरति-अथेति। अथ मन्त्रविद्भिः शिवनारायणयोः शिवे विष्णौ च तारनमोन्ते 'ओं नमः' इत्यवसाने ङेन्ते चतुर्थ्येकवचनान्ते स्वनामनी 'शिवाय' 'नारयणाय' इति द्वे रसवसुवर्णसमेतौ षडक्षरयुक्तोऽष्टाक्षरयुक्तश्च मूलमनू उद्दिष्टौ।।६२।।

विवरणम्

ततो मूलमन्त्रानुद्धरति-अथेति। तारनमोन्त इति। तारनमसोरन्ते ङेन्ते स्वनामनी भवतः। शिवनारायणयोरिति निर्देशवशादेव नामविशेषोऽपि दर्शितो द्रष्टव्यः। शिवनारायणे

---

१. 'नि। संश्राव्येत्यस्ययमाभिप्रायः - मन्त्रोपदेशकाले क्वचिच्छुद्धे भुतले अष्टवर्गिणीं मातृकामानिख्य तयैवावाह्य सम्पुज्य तस्या मातृकाया मन्त्रगतानक्षरानुद्धृत्य क्वचिदालिख्य तद्गतान् दोषान् परिहृत्य तत्तन्मत्रेण सम्पुज्य शिष्यायोपदिशोदिति। तेः'। ख.घ.ङ.च. पाठः।

Shripuram Publications www.shripuram.org

दुर्गायां च समानमेतत्।।६२।।

तारोपरि सवसुस्वरलववियदन्तस्थङेन्तनिजनाम।
शिवनारायणमूलं नत्यन्तं मन्त्रिभिः समुद्दिष्टम्।।६३।।

विमर्शिनी

तारोपरि प्रणवोर्ध्वभागे सवसुस्वरलववियदन्तस्थङेन्तनिजनाम वसुस्वरेण ॠकारेण लवेन बिन्दुना च सहितं वियत् हकारः 'ह्रॄं' इत्यर्थः, तदवसाने स्थितं चतुर्थ्येकवचनान्तं निजनाम 'ओं ह्रॄं' इत्यन्ते 'शिवनारायणाय' इति नत्यन्तं नमोन्तमेतद् मन्त्रिभिः शिवनारायणमूलं समुद्दिष्टमुक्तम्। मन्त्रिभिः समुद्दिष्टमित्यनेन अत्र नामान्तरं न युञ्ज्यादित्यभिप्रायः।।६३।।

विवरणम्

वसुस्वर ॠकारः, लवो बिन्दुः, वियदाकाशो हकारः, 'ह्रॄं' इति यावत्। तस्य बीजस्यान्ते स्थितं निजनामेति समासः।।६३।।

तारभुवनाधिनाथान्तस्थं निजनाम ङेनमोन्तमिह।
दुर्गायां सप्तार्णं मूलं दुंबीजि नाम वस्वर्णे।।६४।।

विमर्शिनी

दुर्गायां तारभुवनाधिनाथान्तस्थं 'ओं ह्रीं' इत्यनयोरन्तस्थितं ङेनमोन्तं चतुर्थ्येकवचननमोन्तं निजनाम 'दुर्गायै नमः' इति सप्तार्णं मूलं, वस्वर्णे अष्टार्णे दुंबीजि दुंबीजयुक्तं नाम भवति।।६४।।

विवरणम्

वस्वर्णे नाम दुम्बीजित्यन्वयः। दुर्गामूले अष्टाक्षरे तन्नाम दंबीजसहितं स्यादित्यर्थः।।६४।।

मेदःस्पृग्रसवर्णस्पृक्षोडशभिन्नतच्चतुर्विंशः।
उद्योतितः षडर्णो वेनम इति षण्मुखेऽणुराद्यादिः।।६५।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

षुण्मुखे मेदस्पृग्रसवर्णस्पृक्षोडशभिन्नतच्चतुर्विंशः मेदो वकारः, स्पृग्रसवर्णः स्पर्शानां षष्ठश्चकारः, स्पृक्षोडशेन तकारेण भिन्नः सम्भिन्नो युक्तः, तच्चतुर्विंशो भकारः, स तु उद्योतितः उकारेणालङ्कृतः, वेनमः इति स्वरूपम् इति षडर्णोऽणुः आद्यादिः आदिः प्रणवः स आदौ युक्तश्च भवति।।६५।।

विवरणम्

मेदो वकारः, स्पृग्रसवर्णः स्पर्शषष्ठाक्षरः चकारः, स्पृक्षोडशभिन्न तच्चतुर्विंशः। स्पर्शषोडशसहितं स्पर्शचतुर्विंशाक्षरं उद्योतितः उकारेण सहितः। पूर्वस्यैतद्विशेषणम्। आद्यादिः प्रणवादिः। स्वरार्णोऽणुः सप्ताक्षरो मूलमन्त्रः।।६५।।

स्पर्शतृतीयं गणपे प्रथमेन चतुर्दशेन वाचाढ्यम्।
लवलसितमेकवर्णं मूलमुशन्त्यादिमादितोऽत्रापि।।६६।।

विमर्शिनी

गणपे स्पर्शतृतीयं गकारः, प्रथमेनाकारेण चतुर्दशेन औकारेण वा अचा स्वरेणाढ्यं युक्तं लवलसितं बिन्दुनालङ्कृतं च एकवर्णं मूलम् उशन्ति इच्छन्ति। आचार्या इति शेषः। अत्राप्यादितः आदिं प्रणवं चेच्छन्ति।।६६।।

विवरणम्

अचाढ्यमिति छेदो द्रष्टव्यः। आदिमादितोऽत्रापीति प्रणवसहितत्वमुक्तम्।।६६।।

स्पर्शचतुर्थहुताशनषष्ठस्वरबिन्दुरूपबीजान्ते।
सनतिपराया[1]ष्टार्णं गोप्त्रेर्णं शास्तृमूलमाद्यादि।।६७।।

विमर्शिनी

स्पर्शचतुर्थहुताशनषष्ठस्वरबिन्दुरूपबीजान्ते स्पर्शचतुर्थः घकारःस हुताशनो रेफः, षष्ठस्वर ऊकारः, बिन्दुरनुस्वारः, एतद्रुपबीजस्य 'घ्रूं' इत्यस्यान्ते सनतिपराय 'नमःपराय'सहितं 'गोप्त्रे' इत्यर्णम् अष्टार्णं शास्तृमूलम् आद्यादि प्रणवादि च भवति।।६७।।

---

१. 'य नवार्णं'

Shripuram Publications
www.shripuram.org

विवरणम्

नवार्णं शास्तृमूलमित्यन्वयः।।६७।।

साध्यनारायणो दैवी गायत्री हरिमूलके।
ऋषिच्छन्दोदेवताः स्युः परमात्मापि च क्रमात्।।६८।।

विमर्शिनी

तेषां मूलमन्त्राणामृष्यादिकं कथयति-साध्येत्यादिभिः। हरिमूलके साध्यनारायण ऋषिः, दैवीगायत्री छन्दः, परमात्मापि देवता च क्रमात् स्युः।।६८।।

ऋष्याद्या गिरिशे वामदेवपङ्क्तिसदाशिवाः
[1]ब्रह्मातिजगती स्थाणुहरौ हरिहरः क्रमात्।।६९।।

विमर्शिनी

गिरिशे वामदेवपङ्क्तिसदाशिवाः ऋष्याद्याः। स्थाणुहरौ ब्रह्मा, अतिजगती, हरिहरश्च क्रमाद् ऋष्याद्याः।।६९।।

क्रमान्नारदगायत्रीदुर्गा महिषविद्विषि।
सनत्कुमारगायत्रीसुब्रह्मण्याः षडानने।।७०।।

विमर्शिनी

महिषविद्विषि क्रमान्नारदगायत्रीदुर्गाः स्युः। षडानने सनत्कुमारगायत्रैसुब्रह्मण्याः।।७०।।

गणकाख्यो निचृद्गायत्र्यथो गणपतिः स्वयम्।
विघ्ने रेवन्तगायत्रीशास्तारो भूतनायके।।७१।।

विमर्शिनी

विघ्ने गणकाख्यः गणकः, निचृद्गायत्री, अथो गणपतिः स्वयं च। भूतनायके रेवन्तगायत्रीशास्तारश्च।।७१।।

अङ्गान्यथ हृदयशिरःशिखाश्च कवचं च नेत्रेमस्त्रमिति।

---

१. 'शाङ्गीशे ब्रह्मजगतीशिवनारायणाः स्मृताः ।।' ख. पाठः।

www.shripuram.org

प्रायोऽखिलेषु षट् स्युः, सोदरपृष्ठानि तानि हरिमूले ।।७२ ।।

विमर्शिनी

अङ्गनामान्याह-अङ्गानीति। अथाखिलेषु हृदयशिरःशिखाश्च कवचं च नेत्रमस्त्रमिति प्रायः सामान्येन षडङ्गानि स्युः। हरिमूले तानि सोदरपृष्ठानि उदरपृष्ठयुक्तानि ।।७२ ।।

विवरणम्

अङ्गमन्त्रलक्षणमाह-अङ्गानीति ।।७२ ।।

नेत्रास्त्रक्रमविनिमयवन्ति हरिस्कन्ददुर्गासु ।
स्वोदितबीजार्णान्ते ङेन्ताख्यानानि जातियुक्तानि ।।७३ ।।

विमर्शिनी

हरिस्कन्ददुर्गासु तानि नेत्रास्त्रक्रमविनिमयवन्ति नेत्रास्त्रयोः क्रमस्य व्यत्यासयुक्तानि। अङ्गमन्त्रानाह-स्वोदितेति। स्वोदितबीजार्णान्ते स्वस्वोदितबीजरूपाणां अक्षराणामन्ते ङेन्ताख्यानानि चतुर्थ्यन्तानि नामानि। 'हृदयाय' 'शिरसे' इत्यादीनि जातियुक्तानि 'नमः' 'स्वाहे'त्यादिभिः वक्ष्यमाणाभिर्जातिभिर्युक्तानि ।।७३ ।।

विवरणम्

स्वोदितेति-क्वचिद्बीजानि क्वचिद्वर्णांश्च अङ्गार्थं वक्ष्यन्ते। ङेन्ताख्यानानि 'हृदयाय' 'शिरसे' इत्यादीनि जातयस्तु वक्ष्यमाणाः ।।७३ ।।

लवलसितमूलवर्णैर्हरौ, हरे तैर्विसर्गिवर्णास्त्रैः ।
अङ्गानि मूलवर्णैः पञ्चमवर्णान्वितेक्षणानि गुहे ।।७४ ।।

विमर्शिनी

अङ्गानां बीजान्याह-लवेति। हरौ लवलसितमूलवर्णैः बिन्दुसहितमूलाक्षरैः सहितान्यङ्गानि स्युः। हरे च विसर्गिवर्णास्त्रैः विसर्गसहितषष्ठाक्षरयुक्तास्त्रैः तैर्वर्णैः। गुहे च मूलवर्णैः लवलसितैरित्यवगन्तव्यम्। पञ्चमवर्णान्वितेक्षणानि मूल[1]पञ्चम-वर्णान्वितनेत्रण्यङ्गानीति ।।७४ ।।

---

१. 'लस्य प' ख. पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

तत्र वर्णानङ्गोचितानाह-लवेति। हरावष्टाङ्गानि। विसर्गिबीजास्त्रैरिति। यकारं सविसर्गमुक्त्वा अस्त्रं कुर्यादित्यर्थः। पञ्चमबीजान्वितेक्षणानि गुह इति। वकारादिचतुर्भिर्वर्णैः[1] कवचान्तानि म इत्यस्त्रं नकारो नेत्रमित्यर्थः।।७४।।

अक्लीबसमकलालवयुतवियतेशाच्युतेऽमुनाग्निमता।
व्यत्यस्तान्त्ययुगाचा दुर्गायैवर्णशालिनार्यायाम्।।७५।।

विमर्शिनी

ईशाच्युते अक्लीबसमकलालवयुतवियता क्लीबरहितयुग्मस्वरबिन्दुयुतेन हकारेण 'हां हृदयाय नमः' 'हीं शिरसे स्वाहा' इत्याद्येन। आर्यायाम् अग्निमता रेफयुक्तेन अमुना अक्लीबसमकलालवयुतवियता (व्यत्यस्तान्त्ययुगाचा) दुर्गायैवर्णशालिना प्रत्येकं 'दुर्गायै' इति वर्णयुक्तेन।।७५।।

विवरणम्

अक्लीबाः समाः कला आ ई ऊ ऐ औ अः इत्येते स्वराः। वियदाकाशो हकारः। अमुनेति तत्तत्कलान्वितो हकारो गृह्यते। व्यत्यस्तान्त्ययुगाचेति। विसर्गेणास्त्रं पञ्चममौकारेण नेत्रं षष्ठमित्यर्थः। 'ह्रां दुर्गायै हृदयाय नमः' इत्यादयो मन्त्राः।।७५।।

गामाद्यैराद्यमनौ द्वितीयमन्त्रेऽङ्गकानि तैरेव।
पञ्चदशस्वरनेत्रैर्विघ्ने षण्मन्त्रकैः प्रभानाथे।।७६।।

विमर्शिनी

विघ्ने आद्यमनौ 'गं' इति मन्त्रे गामाद्यैः 'गां' 'गीं' इत्याद्यैः, द्वितीयमन्त्रे 'गौं' इति मन्त्रेऽपि तैरेवाङ्गानि। तत्र पञ्चदशस्वरनेत्रैरिति विशेषः। प्रभानाथे षण्मन्त्रकैः रेवन्तादिभिर्वक्ष्यमाणैः।।७६।।

विवरणम्

आद्यमनुः प्रथमस्वराढ्यो[2] गकारः। गामित्यक्लीबसमकलादिपरामर्शः।।७६।।

---

१. 'तुर्व' क. पाठः। २. 'रा ह्याका' क. पाठः।

Shripuram Publication
www.shripuram.org

उत्कपदैः क्रुद्धमहावीरद्युसहस्रपूर्वठयुगान्तैः।
साख्याजातिभिरजिते पञ्चाङ्गान्यखिलमन्त्रयोग्यानि॥७७॥

विमर्शिनी

पञ्चाङ्गमाह-उत्कपदैरिति। अजिते क्रुद्धमहावीरद्युसहस्रपूर्वठयुगान्तैः 'क्रुद्धमहावीरद्युसहस्र' इति पूर्वतो युक्तैः ठयुगान्तैः 'स्वाहा' इत्यन्ते युक्तैश्च। ठयुगान्तैरित्यनेनोत्कपदस्य[1] चतुर्थ्येकवचनान्तत्वमपि द्रष्टव्यम्। 'क्रुद्धोत्काय स्वाहा' इत्याद्यैरित्यर्थः। साख्याजातिभिः 'हृदयाय नमः' इत्यादियुक्तैः पञ्चाङ्गानि[2] नेत्ररहितान्यखिलमन्त्रयोग्यानि सर्ववैष्णवमन्त्रेषु योग्यानि॥७७॥

विवरणम्

'क्रुद्धोत्काय स्वाहा हृदयाय नमः' इत्यादयो मन्त्राः। अखिलमन्त्रयोग्यानीति षडक्षरादिग्रहणम्॥७७॥

सनभःस्वाहावषडथ हुंवौषट्फट् च जातयः षट् स्युः।
अस्त्रान्तेषु तदूर्ध्वं नम इति पञ्चाङ्गके न नेत्रविधिः॥७८॥

विमर्शिनी

जातीः कथयति। सनम इति। अथ सनमःस्वाहावषट् नमः स्वाहा वषडिति युक्तं हुंवौषट्फडिति अषड् जातयश्चास्त्रान्तेष्वङ्गेषु क्रमेण स्युः। तदूर्ध्वम् उदरादिषु नम इति। पञ्चाङ्गके नेत्रविधिर्न भवति॥७८॥

विवरणम्

इदानीं जातिं दर्शयति-समन इति। तदूर्ध्वं नम इति। उदरपृष्ठयोः बाहूरुजानु-पादेष्वप्येतत्। पञ्चाङ्गके न नेत्रविधिरिति। यत्र पञ्चैवाङ्गानि तत्र नेत्रं विनेत्यर्थः॥७८॥

नारायणाय विद्महे वासुदेवाय धीमहे।
तन्नो विष्णुरिति श्रीशे गायत्री स्यात् प्रचोदयात्॥७९॥

---

१. 'त्यंशेनो' खः घ. ङ. च. पाठः। २. 'नि ता' घ. ङ. च. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

गायत्रीः कथयति-नारायणायेत्यादिभिः। श्रीशे इति गायत्री स्यात्।।७९।।

विवरणम्

गायत्रीरपि दर्शयति-नारायणायेत्यादिना।।७९।।

नारायणादित्रिपदस्थाने शङ्कर इत्यपि।
नारायणश्च पुरुषः संयोज्याः शिवशार्ङ्गिणि।।८०।।

विमर्शिनी

शिवशार्ङ्गिणि नारायणादित्रिपदस्थाने शङ्करः नारायणश्च पुरुष इत्यपि त्रयः शब्दाः संयोज्याः।।८०।।

कात्यायन्यादिदुर्गान्तार्यायां कन्याकुमार्यपि।
गुहेऽत्र शक्तिहस्तादिस्कन्दान्तश्च षडाननः।।८१।।

विमर्शिनी

आर्यायां दुर्गायां कात्यायन्यादिदुर्गान्ता कात्यायन्याद्या दुर्गान्ता च। मध्यगता कन्याकुमारी। गुहे अत्र त्रिपदं शक्तिहस्तादिस्कन्दान्तो मध्यस्थः षडाननश्च।।८१।।

विनायकादिर्विघ्नान्तो[1] गजवक्त्रो गणाधिपे।
भूताधिपादिशास्त्रन्तो भवपुत्रोऽत्र[2] शास्तरि।।८२।।

विमर्शिनी

गणाधिपे विनायकादिः विघ्नान्तः मध्यस्थो गजवक्त्रश्च। शास्तरि अत्र भूताधिपादिशास्त्रन्तः 'भूतनाथाये'त्यादिशास्त्रन्तः। मध्यस्थो भवपुत्रश्च[3]।।८२।।

तन्महेशाय विद्महे वाग्विशुद्धाय धीमहे।
ब्रवीतु शिवगायत्र्यां तन्नः शिवः प्रचोदयात्।।८३।।

---

१. 'वि' ख. पाठः। २. 'थ' घ. पाठः। ३. 'श्च भवति।।' ख. ध. ङ. च. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

शिवगायत्र्याम् एवं ब्रवीत्वित्यर्थः।।८३।।

व्योमव्योमाय विद्महे व्योमेश्वराय धीमहे।
ब्रवीतु व्योमगायत्र्यां तन्नो व्योमः प्रचोदयात्।।८४।।

विमर्शिनी

व्योमगायत्र्यां तद्वदेव व्याख्येयम्।।८४।।

श्रियो बीजं वह्नीलवसहितमस्थ्यस्य च भृगु-
र्निचृच्छ्रीर्ऋष्याद्या गगनमिति शक्तेः पुनरजः।
तथा गायत्री च प्रकृतिरपि मूलाक्षरयुता
द्वयोरङ्गं दीर्घाञ्भिदुरनिजबीजेन गदितम्।।८५।।

विमर्शिनी

श्रीबीजादिकमुद्धरति-श्रिय इति। वह्नीलवसहितं रेफेण ईकारेण बिन्दुना च सहितम् अस्थि शकारः श्रियो बीजम्। अस्य बीजस्य भृगुर्निचृत् श्रीश्च ऋष्याद्याः। शक्तेः[१] पुनः इति एवंभूतं गगनं हकारः बीजम्। तथा अजः गायत्री मूलाक्षरयुता प्रकृतिः मूलप्रकृतिश्च ऋष्याद्याः। द्वयोः श्रीशक्तिबीजयोः दीर्घाञ्भिदुरनिजमूलेन दीर्घाञ्भिः भेदयुक्तेन निजमूलेन 'श्रां' 'श्रीं' इत्यादिना 'ह्रां' 'ह्रीं' इत्यादिना च अङ्गं गदितमित्यर्थः।।८५।।

तारप्रणामौ भगवाक्षराणि तेवासुदेवाय हराविनार्णः।
मन्त्रः प्रजापत्यभिधोऽस्य गायत्र्यृष्यादयो विष्णुरपि क्रमेण।।८६।।

विमर्शिनी

वैष्णवं द्वादशाक्षरमुद्धरति-तारेति। हरौ तारप्रणामौ 'ओं नमः' इति, भगवाक्षराणि, 'भगव' इत्यक्षराणि तेवासुदेवाय इत्यक्षराणि च इनार्णः द्वादशाक्षरो मन्त्रः स्यात्। अस्य प्रजापत्यभिधः प्रजापतिः गायत्री विष्णुश्च ऋष्यादयः।।८६।।

---

१. 'क्तेश्च पु' ग पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

मन्त्रान्तराणि प्रतिदैवतमाह-तारप्रणामावित्यादिना। तेवासुदेवायेति षडक्षराण्युच्चरितानि। इनार्णो द्वादशाक्षरमन्त्रः।।८६।।

मन्त्रार्णैर्द्विषडङ्गकान्युदितवत् तेष्वष्टकं कल्पयेद्
बाहूरुद्वयजानुपादसमभिख्यातानि चत्वार्यथ।
पञ्चाङ्गानि मनोर्मनीषिभिरमुष्योक्तानि वर्णैः क्रमात्
पृथ्वीनेत्रपयोधिसायकमितैः[१] सर्वैश्च मन्त्रोदितैः।।८७।।

विमर्शिनी

अस्य मन्त्रार्णैः द्विषडङ्गकानि द्वादशाङ्गानि। तेष्वङ्गेषु मध्ये अष्टकम् उदितवत् अष्टाक्षरोक्ताष्टाङ्गवत्। अथ बाहूरुद्वयजानुपादसमभिख्यातानि 'सुं बाहुभ्यां नमः' 'दें ऊरुभ्यां नमः' 'वां जानुभ्यां नमः' 'यं पादाभ्यां नमः' इति चत्वारि कल्पयेदित्यर्थः। अस्यैव मन्त्रस्य पञ्चाङ्गान्याह-पञ्चाङ्गानीति। अमुष्य मनोर्मनीषिभिः मन्त्रोदितैः मन्त्रोक्तैः पृथ्वीनेत्रपयोधिसायकमितैः एकद्विचतुष्पञ्चमितैः सर्वैश्च वर्णैः क्रमात् पञ्चाङ्गान्युक्तानि।।८७।।

विवरणम्

द्विषडङ्गकानि द्वादशाङ्गानि यावत्। सर्वैरपीति। समस्तेनेत्यर्थः।।८७।।

विष्णौ षड्वर्णमन्त्रो ध्रुवनतिसहितं विष्णवेर्णं निराख्यै-
र्हूं कं शिं हुं ह इत्येभिरिह नतियुतैः स्युस्तदङ्गानि पञ्च।
तारान्ते हूंसमेतो यदि भवति सबीजोऽणुरङ्गानि तारा-
द्यर्णैर्हामादिमत्स्वाह्वयनतिसहितैर्नेत्रनिष्ठानि षट् स्युः।।८८।।

विमर्शिनी

षडक्षरमाह-विष्णौ षड्वर्णेति। विष्णौ ध्रुवनतिसहितं 'ओं नमः' इति युक्तं 'विष्णवे' इत्यर्णं षड्वर्णमन्त्रः। इह मन्त्रे निराख्यैः हृदयादिनामरहितैः हूं कं शिं हुं हः इत्येभिर्बीजैर्नतियुक्तैः 'हूं नमः' 'कं नमः' 'शिं नमः' 'हुं नमः' 'हः नमः' इति

---

१. 'तैः कुर्वीत सर्वैरपि।।' ख. पाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

तदङ्गानि पञ्च स्युः। तारान्ते हूंसमेतो यदि प्रणवान्ते 'हूं' इति युक्तश्चेत् तर्हि सबीजोऽणुः सबीजः षडक्षरो भवति। हामादिमत्स्वाह्वयनतिसहितैः 'हां' 'हीं' इत्यादियुक्तैः हृदयादिस्वस्वनाम्ना प्रत्येकं नत्या च युक्तैः ताराद्यर्णैः प्रणवादिभिः षड्भिरक्षरैः नेत्रनिष्ठानि षडङ्गानि स्युः। 'ओं हां हृदयाय नमः' 'नं हीं शिरसे नमः' 'मों हूं शिखायै नमः' इत्यादीत्यर्थः।।८८।।

विवरणम्

निराख्यैरिति जातीनामप्युपलक्षणम्। 'हूं नमः' इति हृदयमन्त्रः। एवमन्येऽपि। सबीजो भवतीति सम्बन्धः। हामादिमत्स्वाह्वयनतिसहितैः 'ओं हां हृदयाय नमः'। 'नं हीं शिरसे नमः' इत्यादिभिः।।८८।।

अन्तर्याम्यभिधः स्यादस्य मनो रसलिपेर्ऋषिः प्रोक्तः।
गायत्री च छन्दो विष्णुः स्वयमेव देवता तद्वत्।।८९।।

विमर्शिनी

अस्य रसलिपेः षडार्णस्य सबीजस्याबीजस्यापि मनोरन्तर्यामी इत्यभिधः ऋषिः प्रोक्तः स्यात्। गायत्री च छन्दः। तद्वद् विष्णुः स्वयमेव देवता।।८९।।

प्रोक्तस्तारसहस्रपूर्वमरहुंफट् चक्रमन्त्रोऽहिर-
स्यर्षिर्बुध्न्ययुतः सुदर्शनमहाविष्णुः स्मृता देवता।
छन्दोऽनुष्टुबथाङ्गकानि गदितान्यायाग्निजायान्तिकै-
श्चक्रैराविसुधीसमित्यपि पुनर्ज्वालेति चादौ युतैः।।९०।।

विमर्शिनी

सुदर्शनमन्त्रमुद्धरति-प्रोक्त इति। तारसहस्रपूर्वं प्रणवान्ते सहस्र इति पदपूर्वम् अरहुंफडिति चक्रमन्त्रः प्रोक्तः। अस्य ऋषिः बुध्न्ययुतः अहिः अहिर्बुध्न्यः, स ऋषिरित्यर्थः। सुदर्शनमहाविष्णुर्देवता स्मृता। अनुष्टुप् छन्दः स्मृतम्। अथ आयाग्निजायान्तिकैः 'आय स्वाहा' इत्यन्ते युक्तैः आविसुधीसमिति पुनः ज्वालेति चादौ युतैश्चक्रैः अङ्गानि गदितानि उक्तानि। 'आचक्राय स्वाहा हृदयाय नमः' 'विचक्राय स्वाहा शिरसे स्वाहा' इत्याद्यङ्गानीत्यर्थः।।९०।।

Shripuram Publications
www.shripuram.org

विवरणम्

चक्रमन्त्रस्य 'आचक्राय स्वाहा' इत्यादयोऽङ्गमन्त्राः ।।९० ।।

जितं ते पुण्डरीकाक्ष! नमस्ते विश्वभावन!।
सुब्रह्मण्य! नमस्तेऽस्तु नमः पुरुषपूर्वज!।।९१ ।।

विमर्शिनी

उपचारमनुं वदन् पूर्वं तदेव पठति-जितं त इति।।९१ ।।

उपचारमनुः सोऽयमजिते सम्प्रकीर्तितः।
केवलाद्यद्वितीयोपान्त्यान्त्याच्प्रपुटिताः क्रमात्।।९२ ।।

स्युर्वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धकाः।
नमोभगवतेर्णाद्या ङेन्ताश्च हरिमूर्तयः।।९३ ।।

विमर्शिनी

अजिते स पठितः अयमुपचारमन्त्रः सम्प्रकीर्तितः। मूर्तिमन्त्रानुद्धरति-केवलेत्यादिना। केवलाद्यद्वितीयोपान्त्यान्त्याच्प्रपुटिताः, अत्र केवलशब्दः प्रत्येकं संबध्यते, केवलेन आद्येन केवलेन द्वितीयेन उपान्त्येन अन्त्येन च अचा स्वरेण प्रपुटिताः, नमोभगवतेर्णाद्याः नमो भगवत इत्यक्ष(राणि?रैः) आदौ युक्ताः ङेन्ताः चतुर्थ्येकवचनान्ताः वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धकाः क्रमात् हरिमूर्तयः स्युः। 'अ ओं नमो भगवते वासुदेवाय अ' 'आ ओं नमो भगवते सङ्कर्षणाय आ' इत्याद्या इत्यर्थः।।९२, ९३ ।।

विवरणम्

केवलाद्याद्वितीयोपान्त्याच्प्रपुटिताः इति। 'अ ओं नमो भगवते वासुदेवाय अ' इत्याद्या मूर्तयः।।९२, ९३ ।।

तथैव हादिशान्तार्णैः सप्रतिष्ठैः सबिन्दुभिः।
शान्तिश्च श्रीसरस्वत्यौ रतिस्तन्मूर्तिशक्तयः[1]।।९४ ।।

---

१. 'यः ।। ईशे' इति ख. ग. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

शक्तिमन्त्रानाह-तथैवेति। तथैवेत्यनेन चतुर्थ्येकवचनान्तत्वं गृह्यते। हादिशान्तार्णैः हकारादिशकारान्तैः ह स ष श इत्यक्षरैः सप्रतिष्ठैः प्रतिष्ठया आकारेण युक्तैः सबिन्दुभिः बिन्दुयुक्तैः एवंभूतैर्बीजैर्युक्ताः शान्तिः श्रीसरस्वत्यौ रतिश्च तन्मूर्तिशक्तयः वासुदेवादीनां शक्तयः। 'ओं हां शान्त्यै नमः' इत्याद्या इत्यर्थः।।९४।।

विवरणम्

तथैव हादिशान्तार्णैः[1] सप्रतिष्ठैः सबिन्दुभिरिति। हां सां षां शां इति शान्त्यादिशक्तीनां बीजानीत्यर्थः।।९४।।

किरीटकेयूरहारपदान्याभाष्य मन्त्रवित्।
मकरान्ते कुण्डलं[2] च चक्रशङ्खगदा[3]दिकम्।।९५।।

अब्जहस्त[4]पदं चोक्त्वा पीताम्बरधरेति च।
श्रीवत्साङ्कित[5]माभाष्य वक्षःस्थलमथो वदेत्।।९६।।

श्रीभूमिसहि[6]स्वात्मज्योतिर्द्वयपदं वदेत्।
[7]दीप्त[8]मुक्त्वा करायेति सहस्रादित्यतेजसे।
[9]हृदन्तः प्रणवादिः स्यात् किरीटादिमनुस्त्वयम्।।९७।।

विमर्शिनी

किरीटमन्त्रमुद्धरति-किरीटेति। 'किरीटकेयूरहार' इति पदानि आभाष्य उक्त्वा। मन्त्रविदित्यनेन मकरान्ते 'मकर' इत्यन्ते 'कुण्डलालङ्कृत' इत्यध्याहार्यः। चक्रशङ्खगदादिकं 'चक्रशङ्खगदा' इत्यादिकम् अब्जहस्तपदम् 'अब्जहस्त' इति पदं [10]चोक्त्वा 'पीताम्बरधर' इति च 'श्रीवत्साङ्कित' इति पदमाभाष्य 'वक्षःस्थल' इति पदं

१. 'न्तावर्णैः' च. पाठः। २. 'लार्णं तक्र' ३. 'दान्ततः।।' ४. 'स्तेति पिताम्बरेति चोक्त्वा धरोति च।' ५. 'तशब्दान्ते वक्षस्थलपदं ततः।।' ६. 'तात्मान्ते ज्यो', ७. 'ततो दीप्तिक' घ. पाठः। ८. 'प्ति' इति मूलकोशपाठः। ९. 'नम शत्युच्चरेदेष किरीटाख्यो महामनुः।। ई' घ. पाठः। १०. 'प्रो' इति व्याख्याकोशपाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

वदेत्। 'श्रीभूमिसहित' इति पदं स्वात्मज्योतिर्द्वयपदं 'स्वात्मज्योतिर्द्वय' इति पदं वदेत् 'दीप्ति'[1] इति पदं 'कराय' इति 'सहस्रादित्यतेजसे' इति च उक्त्वा इति किरीटादिमनुः। अयं हृदन्तः नमोऽन्तः अन्ते 'नम' इति युक्तः, प्रणवादिः स्यात्।।९५-९७।।

ईशे मनुस्वरलवोद्भिदुरं विहायः
प्रासादनाममनुरक्तचराः शिवान्ताः।

ऋष्यादिकाः सलवदीर्घकलाविभिन्न-
व्योम्नाङ्गषट्कमिह विश्वकलाक्ष्ण्यभीष्टा।।९८।।

विमर्शिनी

शैवान् मन्त्रानुद्धरति- ईश इति। ईशे मनुस्वरलवाद्भिदुरं चतुर्दशस्वरबिन्दुभ्यां युक्तं विहायः हकारः प्रासादनाममनुः प्रासादमन्त्रः स्यात्। शिवान्ता उक्तचराः षडक्षरे उक्तपूर्वाः ऋष्यादिकाः। सलवदीर्घकलाविभिन्नव्योम्ना बिन्दुयुक्तदीर्घस्वरैः भेदितेन हकारेणाङ्गषट्कं स्यात्। इह प्रासादमन्त्रे अक्ष्णि विश्वकला त्रयोदशस्वरः अभीष्टा उक्ता। 'हों नेत्रत्रयाय वौषट्' इत्यर्थः।।९८।।

विवरणम्

विहायः आकाशो हकारः। उक्तचराः वामदेवपङ्क्तिसदाशिवा इति पूर्वमुक्ताः। विश्वकलाक्ष्ण्यभीष्टा 'हों' इति नेत्रे योज्यम्।।९८।।

ईशानस्तत्पुरुषाघोराख्यौ वामदेवनामाथ।
सद्योजातश्चोक्ता मन्त्रितमैः पञ्च मूर्तयो गिरिशे।।९९।।

विमर्शिनी

मूर्तिमन्त्रानाह-ईशान इति। मन्त्रितमैः गिरिशे ईशान इत्याद्याः पञ्च मूर्तय उक्ताः।।९९।।

नाद्यैः पञ्चार्णविधौ नादविधौ विश्वपूर्वविषमाज्भिः।
विक्लीबैर्बिन्दुयुतैर्भिदुरेण विहायसा युताः[2] प्रोक्ताः।।१००।।

---

१. 'प्ति' घ. ङ. च. पाठः। २ 'ताश्चैताः' इति मूलकोशपाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

पञ्चार्णविधौ एताः नाद्यैः नकारादिपञ्चभिरक्षरैः युताः। नादविधौ प्रासादविधौ विक्लीबैः नपुंसकार्णरहितैः बिन्दुयुतैः विश्वपूर्वविषमाज्भिः त्रयोदशैकादशपञ्चमतृतीय-प्रथमस्वरैः भिदुरेण भेदयुक्तेन विहायसा हकारेण युताः प्रोक्ताः।।१००।।

विवरणम्

नाद्यैर्मूलाक्षरैः। विश्वपूर्वेति। 'हों हें हुं हिं हम्' इत्युक्तानि।।१००।।

पञ्चब्रह्ममहामनुराम्नायाम्नानतोऽत्र विज्ञेयः।
ईशपुरुषाग्निवामादिकदेवहराश्च भूर्यनुष्टुबथ।।१०१।

गायत्र्यनुष्टुभौ कृत्यनुष्टुभावीश्वरस्तथापश्च।
आपो भगो भगश्चेतीशानादिक्रमात् तदृष्याद्याः।।१०२।।

विमर्शिनी

अत्र पञ्चब्रह्मोपदेश[१]ने आम्नायाम्नानतः वेदपाठरीत्या पञ्चब्रह्ममहामनुर्विज्ञेयः। ऋष्यादीनाह-ईशेति। ईशपुरुषाग्निवामदेवहराः ऋषयः। अथ भूर्यनुष्टुप्, गायत्री, अनुष्टुप्, कृतिरनुष्टुप् च छन्दांसि। ईश्वरः आपः आपः भगो भगश्च देवताः। तदृष्याद्याः ईशानादिक्रमाज्ज्ञातव्या इत्यर्थः। ईशानादिक्रमादित्यनेन तथैवात्र मन्त्रपाठ इत्यपि सूचितः।।१०१, १०२।।

विवरणम्

भूर्यनुष्टुबित्येकं छन्दोऽवगन्तव्यम्।।१०१।।

पञ्चध्रुवोपरिष्टात् सर्वज्ञायेति हृन्मनुः प्रोक्तः।
अमृते तेजोमालिनि तृप्तायै ब्रह्मशिरस इति च शिरः।।१०३।।

विमर्शिनी

अङ्गमन्त्रानुद्धरति-पञ्चेति। पञ्चध्रुवोपरिष्टात् पञ्चप्रणवोपरिभागे 'सर्वज्ञाय' इति हृन्मनुः हृदयमन्त्रः प्रोक्तः। 'अमृते' इत्यादि 'शिरसे' इत्यन्तः शिरोमन्त्रः।।१०३।।

---

१. 'शेन आ' ख. पाठः।

Shripuram Publications
www.shripuram.org

ज्वलितशिखिशिखे च शिखा
त्वनादिबोधा समीरिता ङेन्ता।

वर्ममनुर्वज्रिण इति
वज्रधराय द्विठः स्वतन्त्राय।।१०४।।

विमर्शिनी

ज्वलितशिखिशिखे इति ङेन्त अनादिबोधा 'ज्वलितशिखिशिखे अनादिबोधायै' इति शिखा समीरिता इत्यर्थः। वज्रिणे इति, वज्रधरायेति, द्विठः स्वाहा इति, स्वतन्त्राय इति च 'वज्रिणे वज्रधराय स्वाहा स्वतन्त्राय' इति वर्ममनुः कवचमन्त्रः।।१०४।।

सौंचौंहौमितिपूर्वः प्रोक्तोऽत्रालुप्तशक्तयेऽक्षिमनुः।

पाशुपतमन्त्रपूर्वः प्रोक्तश्चानन्तशक्तयेऽस्त्रमनुः।।१०५।।

विमर्शिनी

'सौं चौं हौम्' इति बीजत्रयपूर्वः 'अलुप्ताशक्तये' इत्यक्षिमनुः नेत्रमन्त्रः प्रोक्तः। पाशुपतमन्त्रपूर्वः वक्ष्यमाणपाशुपतास्त्रमन्त्रान्ते 'अनन्तशक्तये' इत्यस्त्रमनुः प्रोक्तः।।१०५।।

ईशानादिकलाः स्युः शशिनी पुनरङ्गदेष्टदा च मरीचिः।
ज्वालिन्यपि च निवृत्तिः प्रतिष्ठया विद्यया च शान्त्यभिधाना।।१०६।।

तामस्याख्या मोहा क्षया च निद्राह्वया पुनर्व्याधिः।
अथ मृत्युरूपिणी च क्षुधा तृषाख्या ततो रजोरूपा।।१०७।।

रक्षा रतिश्च कामा क्षमा च संयमनिका क्रिया सन्ध्या।
स्थिरया च कालरात्रिर्भ्रामण्यपि मोहिनी तथा श्रीश्च।।१०८।।

सिद्धिरथर्द्धिर्द्युतिरपि मेधा कान्त्याह्वया तथा प्रज्ञा।
भूयः प्रभा सुधा चेत्यष्टात्रिंशत् समीरिताः क्रमशः।।१०९।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

अष्टात्रिंशत्कला आह-ईशानादीति। इति ईशानादिकलाः, 'ईशानः सर्वविद्यानमि'त्यादिमन्त्रखण्डानामष्टात्रिंशत्संख्याः कलाः क्रमशः समीरिताः स्युः। शशिनी अङ्गदा इष्टदा मरीचिः ज्वालिनी इति पञ्चेशानकलाः। निवृत्तिः प्रतिष्ठा विद्या शान्तिश्च इति चतस्रस्तत्पुरुषकलाः। तामसी मोहा क्षया निद्रा व्याधिः मृत्युरूपिणी क्षुधा तृषा इत्यष्टावघोरकलाः। रजोरूपा रक्षा रतिः कामा क्षमा संयमनी क्रिया सन्ध्या स्थिरा कालरात्रिः भ्रामणी मोहिनी श्रीः इति त्रयोदश वामदेवकलाः। सिद्धिः ऋद्धिः द्युतिः मेधा कान्तिः प्रज्ञा प्रभा सुधा इत्यष्टौ सद्योजातकला इति।।१०६-१०९।।

मातङ्गोरगविश्वबाणनिगमैरष्टाष्टवेदाब्धिभि-
र्वेदेषुद्व्यृतुभूतवह्निशरबाणैस्तत्कलाः संयुताः।
सप्तेष्विष्विषुदोर्नगेषुदृगगाङ्काशाश्विषड्भिः क्रमा-
दष्टादष्टाश्विगुणेषुवेदनयनाङ्गैश्चाक्षरैर्मन्त्रजैः।।११०।।

विमर्शिनी

ईशानादीनामक्षरसंख्याविभागमाह-मातङ्गेति। तत्कलाः ईशानादीनां कलाः मन्त्रजैः अक्षरैः क्रमात् संयुताः इत्यन्वयः। मातङ्गाः अष्टौ, उरगाश्चाष्टौ, विश्वदेवास्त्रयोदश, बाणः पञ्च, निगमाः चत्वार इतीशानखण्डाः। अष्ट, अष्ट, वेदाश्चत्वारः, अब्धयश्चत्वार इति तत्पुरुषखण्डाः। वेदाश्चत्वारः, इषवः पञ्च, द्वि, ऋतवः षट्, भूतानि पञ्च, वह्नयस्त्रयः, शराः पञ्च, बाणाश्च पञ्च इत्यघोरखण्डाः। सप्त, इषुशब्दास्त्रयोऽपि पञ्चैव, दोरिति द्वे, नागाः सप्त, इषवः पञ्च, दृग् द्वे, अगाः सप्त, अङ्काः नव, आशाः दश, अश्विनौ द्वौ, षडिति वामदेवखण्डाः। अष्टाष्ट, अश्विनौ द्वौ, गुणास्त्रयः, इषवः पञ्च, वेदाश्चत्वारः, नयने द्वे, अङ्गानि षडिति सद्योजातखण्डा इति।।११०।।

विवरणम्

अगाः पर्वताः। अक्षरैरिति 'अथ अघोरेभ्यः अनादिभवे उद्भवाय नमः' इत्येवं विभागो द्रष्टव्यः।।११०।।

Shripuram Publications
www.shripuram.org

तारान्ते बिन्द्वन्वितादित्रिदीर्घान्
ब्रूयाद् व्योमव्यापिनेऽर्णं ध्रुवं च।
सोऽयं व्योममव्यापिमन्त्रो दशार्णो
व्योमाद्यर्णैः स्युस्तदङ्गानि पञ्च।।१११।।

विमर्शिनी

व्योमव्यापिमन्त्रमुद्धरति-तारान्त इति। तारान्ते प्रणवान्ते बिन्द्वन्वितादित्रिदीर्घान् बिन्दुयुक्तानादौ भवांस्त्रिदीर्घान् 'आं' 'ईं' 'ऊं' इति, 'व्योमव्यापिने' इत्यर्णं, ध्रुवं च प्रणवं ब्रूयात्। सोऽयं दशार्णो व्योमव्यापिमन्त्रः स्यात्। व्योमाद्यर्णैः 'व्योमव्यापिने' इति पञ्चभिरक्षरैः पञ्च तदङ्गानि स्युः।।१११।।

विवरणम्

बिन्द्वन्वितादित्रिदीर्घानिति विशेषणसमासः। 'आं' 'ईं' 'ऊं' इत्येतानित्यर्थः। ध्रुवः प्रणवः। व्योमाद्यर्णैः 'व्यों मं व्यां पिं नें' इत्येतैः।।१११।।

तारं व्योमव्यापिने व्योमरूपायार्णं सर्वव्यापिनेर्णं शिवाय।
भूयोऽनन्तायेत्यनाथाय चेति प्रोदीर्याथानाश्रिताय ध्रुवाय।।११२।।

ङेन्तं ब्रूयाच्छाश्वतं योगपीठा-
र्णाद्यं तद्वत् संस्थितायेति वर्णम्।
नित्यार्णाद्यं योगिनेवर्णमुक्त्वा
ध्यानाहारायेति वर्णं ब्रवीतु।।११३।।

विमर्शिनी

महाव्योमव्यापिमन्त्रं पदविभागेन सहोद्धरति-तारमिति। प्रणवमाद्यं पदं, 'व्योमव्यापिने' इति 'व्योमरूपाय' चेत्यर्णम् अक्षराणि, 'सर्वव्यापिने' इत्यर्णं, 'शिवाये'ति। अर्णमिति पदे पदे योज्यम्। भूयः 'अनन्ताये'ति 'अनाथाय' इति च प्रोदीर्य उक्त्वा अथ 'अनाश्रिताये'ति 'ध्रुवाये'ति च, शाश्वतं ङेन्तं 'शाश्वताये'ति ब्रूयात्। योगपीठार्णाद्यं संस्थितायेति वर्णम् अक्षराणि 'योगपीठसंस्थितये'त्यर्थः। नित्यार्णाद्यं योगिनेवर्णं 'नित्ययोगिने' इत्युक्त्वेत्यर्थः। 'ध्यानाहाराय' इति वर्णम् अक्षराणि ब्रवीतु।।११२. ११३।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

तारप्रणामसहितं च शिवायवर्णं
सर्वप्रभुं वदतु ङेसहितं शिवाय।
ईशानपूर्वशरमूर्त्युपरीह ङन्ताः
स्युर्मूर्धवक्त्रहृदयान्यपि गुह्यमूर्ती।।११४।।

विमर्शिनी

तारप्रणामसहितं 'ओं नमः' इति युक्तं शिवायेतिवर्णं 'ओं नमः शिवाये'त्येकं पदमित्यर्थः। ङेसहितं सर्वप्रभुं 'सर्वप्रभवे' इति वदतु, 'शिवाये'ति। इह ईशानपूर्वशरमूर्त्युपरि ईशानादिपञ्चमूर्तीनामूर्ध्वभागे मूर्धवक्त्रहृदयानि गुह्यमूर्ती च ङेन्ता मूर्तयः स्युः। 'ईशान *मूर्धाय' 'तत्पुरुषवक्त्राय' 'अघोरहृदयाय' 'वामदेवगुह्याय' 'सद्योजातमूर्तय' इति मूर्तिप्रधानानि पञ्च पदानि वदत्वित्यर्थः।।११४।।

विवरणम्

'ईशानमूर्ध्ने तत्पुरुषवक्त्राय अघोरहृदयाय वामदेवगुह्याय सद्योजात-मूर्तये'।।११४।।

तारप्रणामद्वितयं च गुह्यातिगुह्यमायार्णयुतं च गोप्त्रे।
ब्रूयात् तदन्तेऽनिधनाय सर्वविद्याधिपायेति पदं च मन्त्री।।११५।।

विमर्शिनी

तारप्रणामद्वितयं 'ओं नमो नमः'[१] इत्येकं पदम्, 'आय' इत्यर्णयुतं गुह्यातिगुह्यं 'गुह्यातिगुह्यये'ति, 'गोप्त्रे' इत्यर्णं ब्रूयात्। तदन्ते 'गोप्त्रे' इति पदमुक्त्वा पुनः 'अनिधनाय' 'सर्वविद्याधिपाये'ति च पदं वदतु ब्रूयात्। मन्त्री पदविभागज्ञः।।११५।।

विवरणम्

आयार्णयुतं गुह्यातिगुह्यमित्यन्वयः। 'गुह्यातिगुह्याय' इति यावत्। अनिधनायेति छेदः। मन्त्रीति पदक्लृप्तिं जानन्नित्यर्थः।।११५।।

अथ वदतु सर्वयोगाधिगताय ज्योतिरादिरूपाय।
परमेश्वरपरपदमथ चैकोनत्रिंशमीरयेन्ङेन्तम्।।११६।।

---

*'मूर्ध्ने' इति केषाञ्चित् पाठः। १. 'मो नमः' घ. ङ. च. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

अथ 'सर्वयोगाधिगताये'ति, ज्योतिरित्यादिरूपाय 'ज्योतीरूपाये'ति च वदतु। अथ ङेन्तं परमेश्वरपरपदं 'परमेश्वरपराये'ति।।११६।।

अचेतनव्योमिपदे तथैव व्यापिन्नरूपिन् प्रथमेति तेजः।

ज्योतिश्च सम्बोध्य वदेदचेतनादीनि संवीप्स्य पदानि सप्त।।११७।।

विमर्शिनी

भूयः 'परमात्मन्' 'अचेतनव्योमि'पदे 'व्यापिन्' 'अरूपिन्' 'प्रथमा' 'तेजः' 'ज्योतिः' इत्यष्टौ पदानि संबोध्य संबोधनविभक्त्या सह, तत्राचेतनादीनि सप्त पदानि संवीप्स्य द्विरुक्त्या च सह वदेत्। 'परमात्मन् अचेतनाचेतन' इत्यादिरूपः।।११७।।

भूयोऽरूपानग्नेऽधूमाभस्माक्षराण्यनादेर्णम्।

नानाना धूधूधू व्याहृतयस्तारपूर्विकास्तिस्रः।।११८।।

विमर्शिनी

भूयः 'अरूप' 'अनग्ने' 'अधूम' 'अभस्म' इत्यक्षराणि, 'अनादे' इत्यर्णं च, 'नानाना' इति, 'धूधूधू' इति च, तारपूर्विकाः प्रणवाद्याः तिस्रो व्याहृतयः 'ओं भूः' 'ओं भुवः' 'ओं स्वः' इति स्युः इति दश पदानि वदेदित्यर्थः।।११८।।

विवरणम्

सर्वाण्येकैकानि प्रायेण पदानि 'ओं नमः शिवाय नानाना धूधूधू ओं नमो नमः शिवाय ओं नमो नमः' इति त्वधिपदानीति। 'अरूप', 'अनग्ने', 'अधूम', 'ओं भूः', 'ओं भुवः', 'ओं स्वः' ब्रह्मविष्णुरुद्रपरः।

भूभूतेषुशराग्निवेदजलधीष्वग्न्यब्धिनागाशुगैः
भूताङ्गेषुहुताशनाक्षमुनिसप्ताश्वाश्वभूतैरपि।
अङ्गाक्षीष्वृषिनागबाणफणिसप्ताब्ध्यब्धिषट्षट्श्रुति-
श्रुत्यग्न्यग्निजगज्जगच्छिखिशिखित्रिद्व्यग्निदृक्सायकैः।।

Shripuram Publications
www.shripuram.org

त्रीषुद्विद्विचतुश्चतुश्चतुरिषुश्रुत्याशुगाब्ध्यूर्मिव-
दाम्नायश्रुतिभोगिसप्तफणिनागेभद्विपाब्ध्यब्धिभिः।
षड्वेदाब्धिपयोधिवेदनयनद्वित्रीषुलोकेषुभिर्वर्णै-
रस्य पदान्यणुः सुषिरकृत्याढ्यत्रिशत्यक्षराः॥११८॥

अनिधननिधने निधनोद्भवशिवशर्वान् क्रमात् ससम्बुद्धीन्।
तद्वन्[1]महेश्वरमहादेवेत्युक्त्वा ततश्च सम्बुद्ध्या॥११९॥

सद्भावेश्वर समहातेजोऽथो योगसंयुताधिपते।
मुञ्चप्रथमद्वितये शर्वयुगं भवयुगं भवोद्भव च॥१२०॥

स्यात् सर्वभूतादिसुखप्रदान्ते
सर्वादिसान्निध्यकरेति वर्णम्।

सब्रह्मविष्ण्वन्तनिविष्टरुद्र-
परेति चानर्चितयुग्मकं च॥१२१॥

भूयोऽसंस्कृतपूर्वस्थितसाक्षिपदानि तुरुपतङ्गौ च।
पिङ्गं ज्ञानं शब्दं सूक्ष्मं ब्रूयान्नव वीप्सया ससम्बुद्धीनि॥१२२॥

शिवशर्वसर्वदेति प्रणवनमोयुगमथो शिवायेति।
प्रणवनमोयुगलमिति व्योमव्यापी मनुः समुद्धार्यः॥१२३॥

विमर्शिनी

अनिधननिधने इति। निधनोद्भवशिवशर्वान् सम्बुद्धियुक्तान् 'अनिधन' 'निधन' 'निधनोद्भव' 'शिव' 'शर्व' इति संबुद्ध्यन्तानि पञ्च पदानीत्यर्थः, 'महेश्वर' इति 'महादेव' इति च तद्वत् संबुद्ध्यन्तमुमुक्त्वा ततः संबुद्ध्या संबोधनविभक्त्या सह 'सद्भावेश्वर' इति, समहातेजः 'महातेज' इत्येकं पदं, योगसंयुताधिपते 'योगाधिपते', मुञ्चप्रथमद्वितये 'मुञ्च मुञ्चे'ति 'प्रथमप्रथमे'ति च, शर्वयुगं 'शर्वशर्वे'ति, भवयुगं 'भवभवे'ति, भवोद्भव च चशब्द एवार्थे, 'भवोद्भव' इति। स्यादिति पदे पदे योज्यम्। सर्वभूतादिसुखप्रद 'सर्वभूतसुखप्रद' इति, सर्वादिसान्निध्यकर इति वर्णं

[1]. 'द्वत् सम्बुद्ध्यन्तौ परमात्ममहेश्वरौ महादेवः॥ सद्भा' ख. पाठः।

Shripuram Publications
www.shripuram.org

'सर्वसान्निध्यकर' रति, सब्रह्मविष्ण्वन्तनिविष्टरुद्रपर ब्रह्मसहितविष्णोरन्ते निवेशितरुद्रपर इति 'ब्रह्मविष्णुरुद्रपर' इत्यर्थः, अनर्चितयुग्मकम् 'अनर्चितानर्चित' इति द्वादश पदानि संबुद्ध्या सह उक्त्वा भूयः 'असंस्कृतपूर्वस्थितसाक्षि'पदानि 'तुरुपतङ्गौ' 'पिङ्गं' 'ज्ञानं' 'शब्दं' 'सूक्ष्मम्' इति नव पदानि ससंबुद्धीनि संबुद्धियुक्तानि वीप्सया द्विरुक्त्या सह 'असंस्कृतासंस्कृत' 'पूर्वस्थितपूर्वस्थित' 'साक्षिन्साक्षिन्' 'तुरुतुरु' 'पतङ्गपतङ्ग' 'पिङ्गपिङ्ग' 'ज्ञानज्ञान' 'शब्दशब्द' 'सूक्ष्मसूक्ष्म' इति ब्रूयात्। 'शिव' इति 'शर्व' इति 'सर्वदे'ति पदानि, अथो प्रणवनमोयुगम् 'ओं नमो नम' इति पदम्, 'शिवाय' इति, पुनरपि प्रणवनमोयुगलम् 'ओं नमो नम' इति पदमिति व्योमव्यापि मनुः समुद्धार्यः सम्यगुद्धरणीयः।।११९-१२३।।

प्रोक्तो[१]ऽयं मनुराट् चतुश्शतलिपिः पञ्चादिनादादिम-
दीर्घत्रय्युदितं यदादिमपदं स्यात् सर्वदान्ते ततः।

षड्वर्णं स्वयमेव शक्तिसुसमेतं शक्तिनादान्वितं
चास्य त्रीणि तदा पदान्यथ लिखाभ्यङ्गानि चास्य क्रमात्[२]।।१२४।।

'ओं मनः सर्वात्मने पराय परमेश्वरपराय योगाय योगसम्भवाय तुरुतुरु भवभव! भवोद्भव! वामदेव! सर्वकार्यप्रशमन! सदाशिव! नमोऽस्तु ते स्वाहा हृदयाय नमः। ओं सुं शिवशिव! नमो ब्रह्मशिरसे शिरसे स्वाहा। ओं शिवहृदये! ज्वालिनि! स्वाहा ज्वालिन्यै शिखायै वषट्। ओं,

विमर्शिनी

अत्र यदा पञ्चादिनादादिमद्दीर्घत्रय्युदितं पञ्चभिरादिभिः प्रणवैः नादेन प्रासादेन आदिना प्रणवेन च सहितेन दीर्घत्रयेण च उक्तं भवति 'ओं ओं ओं ओं ओं हौं ओं आं ईं ऊं' इत्यादिमपदं स्यात्, तदा सर्वदान्ते सर्वदेतिपदावसाने षड्वर्णं स्वयमेव, ततः शक्तिसुसमेतं भुवनेश्वरीयुक्तं षड्वर्णं, शक्तिनादान्वितं भुवनेश्वरीप्रासादाभ्यां युक्तं षड्वर्णं चास्य मन्त्रस्य त्रीणि पदानि स्युः। एतस्मिन् पक्षे अयं मनुराट् चतुःशतलिपिः प्रोक्तः। अथास्य मन्त्रस्याङ्गानि क्रमाल्लिखामि।।१२४।।

---

१. 'क्तश्चाणुरयं च' ख. २. 'त्।। न' ग. पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

व्योमव्यापिमन्त्र एवागमभेदेन भेदमाह-प्रोक्तश्चेति। पञ्चादयः पञ्च प्रणवाः। नादः प्रासादः आदिः प्रणवः तैर्युक्ता दीर्घत्रयी। ओं ओं ओं ओं ओं आं ईं ऊं इत्येवंविधं प्रथमपदम्। अन्ततः मन्त्रान्ते यत् सर्वद पदमुक्तं ततोऽप्यनन्तरम्। स्वयमेव शुद्धमेवेति यावत्। शक्तिसुसमेतषड्वर्णं द्वितीयं शक्तिनादान्वितं षड्वर्णं तृतीयम्।।१२४।।

शिवात्मकं महादेवं सर्वज्ञं प्रभुमव्ययम्।

आवर्तये महाघोरं कवचं पिङ्गलं शुभम्।।१२५.।

विमर्शिनी

अङ्गमन्त्रान् लिखति-'ओं नमः सर्वात्मने पराये'त्यादि।।१२५।।

आयाहि पिङ्गल! महाकवच! शिवाज्ञया हृदयं बन्धबन्धज्वलज्वल घूर्णघूर्ण किरिकिरि सूक्ष्मसूक्ष्म वज्रधर वज्रपाश वज्रशरीर मम शरीरमनुप्रविश्य सर्वदुष्टान् स्तम्भयस्तम्भय हुंफट् स्वाहा पिङ्गलाय कवचाय हुं। ओं[1] ह्रीं जुं[2] सः ज्योतीरूपाय नेत्रत्रयाय वौषट्। ओं ह्रीं स्फुरस्फुरेत्याद्यघोरास्त्रान्तेऽस्त्राय फट्।।

वसिष्ठोऽनन्तगायत्री चर्ष्याद्याः परमेश्वरः।

अमोघत्रिष्टुभौ व्योमव्यापिरुद्रः परैः समृताः।।१२६।।

विमर्शिनी

अस्य मन्त्रस्य ऋष्यादीनाह-वसिष्ठ इति। वसिष्ठः अनन्तगायत्री परमेश्वरश्च ऋष्याद्याः। पक्षान्तरमाह-अमोघ इति। परैः अमोघः ऋषिः, त्रिष्टुप् छन्दः, व्योमव्यापिरुद्रो देवता इति स्मृताः।।१२६।।

तारं स्पर्शाष्टममपि सबिन्दुश्रवोऽर्णं ससर्गं
सार्णं मृत्युञ्जयमृषिमुखानस्य चाहुः कहोलम्।

गायत्रीं दैव्युपपदसमेतां च मृत्युञ्जयाद्यं
रुद्रं चाङ्गान्यपि सलवदीर्घेण शुक्लाक्षरेण।।१२७।।

---

१. 'ओं जुं' ख. पाठः। २. 'जूं' ग. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

मृत्युञ्जयमन्त्रमुद्धरति-तारमिति। तारं प्रणवं, सबिन्दुश्रवः बिन्दुना दक्षिणश्रोत्रेण उकारेण च युक्तं स्पर्शाष्टममर्णं, ससर्गं विसर्गसहितं सार्णं 'स' इत्यक्षरं 'ओं जुं सः' इति मृत्युञ्जयमन्त्रमाहुः बुधाः। अस्य मन्त्रस्य कहोलं, दैव्युपपदसमेतां 'दैवी' इत्युपपदयुक्तां गायत्रीं, मृत्युञ्जयाद्यं रुद्रं च ऋषिमुखान् ऋषिच्छन्दोदेवताः आहुः। सलवदीर्घेण बिन्दुदीर्घाभ्यां सहितेन शुक्लाक्षरेण सकारेण, 'सां सीं' इत्यादि, अङ्गानि चाहुः।।१२७।।

विवरणम्

श्रवोर्णं कर्णस्थानगतो लिपिवर्णः ससर्गं सार्णं सः इत्येतत्। शुक्लाक्षरं सकारः।।१२७।

तारं श्लीं पशु हुंफट् पाशुपतास्त्रं तदङ्गकान्यर्णैः।
ऋष्याद्याः स्युरघोरो गायत्री चास्य पाशुपतरुद्रः।।१२८।।

विमर्शिनी

पाशुपतमुद्धरति-तारमिति। तारं ओं, 'श्लीं पशु हुंफट्' इति पाशुपतास्त्रम्। तस्यार्णैः तदङ्गकानि स्युः। अस्य अघोरः गायत्री पाशुपतरुद्रश्च ऋष्याद्याः स्युः।।१२८।।

तारान्ते शक्तिमुक्त्वा स्फुरपदयुगलं प्रस्फुरद्वन्द्वघोर-
द्वन्द्वे भूयस्तरार्णं तनुपदयुतरूपं चटद्वन्द्वकं च।
प्रार्णप्रोद्यच्चटद्वन्द्वकमथ कहयुग्मं वमद्वन्द्वबन्ध-
द्वान्द्वान्ते घातयद्वन्द्वमपि वदतु हुंफट् तदाघोरमस्त्रम्।।१२९।।

विमर्शिनी

अघोरास्त्रमुद्धरति-तारान्त इति। तारान्ते शक्तिमुक्त्वा 'ओं ह्रीं' इत्युक्त्वा स्फुरपदयुगलं 'स्फुरस्फुर' इति, प्रस्फुरद्वन्द्वघोरद्वन्द्वे 'प्रस्फुरप्रस्फुर' 'घोरघोर' इति, भूयः तरार्णं 'तर' इति, तनुपदयुतरूपं 'तनुरूप', चटद्वन्द्वकं 'चटचट' इति, प्रार्णप्रोद्यच्चटद्वन्द्वकं 'प्रचटप्रचट' इति, कहयुग्मं 'कहकह' इति, वमद्वन्द्वबन्धद्वन्द्वान्ते

Shripuram Publications
www.shripuram.org

'वमवम' 'बन्धबन्ध' इत्युक्त्वा तदन्ते घातयद्वन्द्वमपि 'घातयघातय' इति, हुंफडिति च वदतु। तद् अघोरमस्त्रं स्यात्।।१२९।।

विवरणम्

तनुपदयुतरूपं 'तनुरूपे'ति यावत्। प्राणोंपेतं चटद्वन्द्वकं 'प्रचट प्रचटे'त्येतत्।।१२९।।

ऋष्याद्याः स्युरघोरत्रिष्टुबघोरादिरुद्रकाश्चास्य।
पञ्चषडाशादशवसुमिहिरार्णैर्मन्त्रजैस्तदङ्गानि।।१३०।।

विमर्शिनी

अस्य अघोरत्रिष्टुबघोरादिरुद्रकाः अघोर ऋषिः, त्रिष्टुप् छन्दः, अघोररुद्रो देवता इति ऋष्याद्याः स्युः। अस्याङ्गान्याह-पञ्चेति। मन्त्रजैः मन्त्राज्जातैः पञ्चषडाशाद-शवसुमिहिरार्णैः पञ्चभिः 'ह्रीं स्फुरस्फुर' इत्यक्षरैः, षड्भिः 'प्रस्फुरप्रस्फुर' इत्यक्षरैः, दशभिः 'घोरघोरतर तनुरूप', इत्यक्षरैः, दशभिः 'चटचट प्रचटप्रचट' इति, अष्टभिः 'कह्कह वमवम' इति, द्वादशभिः 'बन्धबन्ध घातयघातय हुंफट्' इत्यक्षरैः तदङ्गानि स्युः।।१३०।।

स्पर्शान्त्याष्टमवर्णावन्त्यार्णं च त्रयं कृशानुस्थम्।
षष्ठस्वरलवयुक्तं त्रिवर्णकं बीजभुख्यमनुमाहुः।।१३१।।

विमर्शिनी

बीजामुख्यमन्त्रमुद्धरति - स्पर्शेति। स्पर्शान्त्याष्टमवर्णौ मकारजकारौ, अन्त्यार्णं क्षकारश्च, एतत्त्रयं कृशानुस्थं रेफोपेतं षष्ठस्वरलवयुक्तम् ऊकारेण बिन्दुना च युक्तम् 'म्रूं ज्रूं क्ष्रुं इति त्रिवर्णकं बीजमुख्यमनुम् आहुः गुरवः।।१३१।।

विवरणम्

स्पर्शान्त्यो मकारः। अष्टमो जकारः। अन्त्यार्णं क्षकारः।।१३१।।

स्याच्चिच्छिखेछिदिक्षिकृदिति ताराद्यष्टवर्णका क्षुरिका।
तारयुगमध्यसंस्थो हुंफट्कारः स्मृतश्च वज्रमनुः।।१३२।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

तारादि चिच्छिखेछिदिक्षिकृदिति क्षुरिका अष्टवर्णका स्यात्। तार युगमध्यसंस्थः हुंफट्कारः 'ओं हुंफट् ओं' इति वज्रमनुः स्मृतः।।१३२।।

तारः सशक्तिवाग्भवमन्मथबीजो विहायसा सौः स्यात्।
प्रारूढतारको हंसोऽष्टार्णो वर्णितोऽणुरौमेयः।।२३३।।

विमर्शिनी

औमेयमष्टाक्षरमुद्धरति - तार इति। तारः सशक्तिवाग्भवमन्मथबीजः शक्तिः भुवनेश्वरी, वाग्भवः ऐंकारः, मन्मथः क्लींकारः, विहायसा हकारेण सह सौः इति 'हुसौः' इत्यर्थः, प्रारूढतारकः प्र इत्यस्मिन्नारूढस्तारः 'प्रों' इति, 'हं स' इति स्वरूपम् 'ओं हिं ऐं क्लीं ह्सौः प्रों हं सः' इति औमेयः अष्टाक्षरो मन्त्रः वर्णित उक्तः।।२३३।।

विवरणम्

विहायसा सौः स्यादिति। 'ह्सौः' इत्येतत्।।२३३।।

नमोऽस्तु स्थाणुभूताय ज्योतिर्लिङ्गावृं[१]तात्मने।
चतुर्मूर्तिवपुश्छायाभासिताङ्गाय शम्भवे।।१३४।।

विमर्शिनी

स्थाणुमन्त्रसप्तकं वदन् अत्रान्त्यस्योपचारत्वेन प्रसिद्धत्वात् तं मनुं पठति - नमोऽस्त्विति।।१३४।।

एष स्थाणुमनुः स्याज्जोतिःस्थानेऽत्र बाणलिङ्गाद्यम्।
तत्तत्पदं सुयोज्यं मन्त्रितमैः शेषषण्मनूद्धारे।।२३५।।

विमर्शिनी

एष स्थाणुमनुः स्यात्। अत्र मन्त्रे ज्योतिःस्थाने शेषषण्मनुद्धारे मन्त्रितमैर्बाणा-लिङ्गाद्यं 'बाणलिङ्गावृतात्मने' इत्याद्यं तत्तत्पदं सुयोज्यम्। [२]कथं, बाणलिङ्गावृतात्म, तथा शम्भुलिङ्ग, स्वयम्भुलिङ्ग, परलिङ्गा, परात्परलिङ्ग।

---

१. 'मृ' ग. २. 'तथा बा' ङ. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

नमोऽस्तु सकलाधारशक्त्याधाराया शम्भवे।
निराधाराय नित्याय ज्योतिर्लिङ्गावृतात्मने।।

इति। एतेषां पुष्पाञ्चल्यादौ विनियोगः। शङ्करनारायणे 'जितं ते' इत्येष एवोपचारमन्त्रः।।१३५।।

अथ दुर्गार्या देवी भगवत्यपि कन्यका चतुर्थ्यन्ताः स्युः।
दुर्गार्णवो नमोन्ताः पञ्चैताः सेदवेतजार्णैः सलवैः।।१३६।।

विमर्शिनी

दौर्गान् मन्त्रानुद्धरति - अथेति। सलवैः बिन्दुसहितैः सेदवेतजार्णैः 'सेदवेतजा' इत्यक्षरैरुपलक्षिताश्चतुर्थ्यन्ता नमोन्ताश्च दुर्गा आर्या देवी भगवती कन्यकापि एताः पञ्च दुर्गाणवः। 'ओं सें दुर्गायै नमः', 'ओं दं आर्यायै नमः', 'ओं वें देव्यै नमः' 'ओं तं भगवत्यै नमः' 'ओं जां कन्यकायै नमः' एता इत्यर्थः।।१३६।।

उपचारमनुः शक्तिः प्रणवद्वयमध्यगा।
तारं नमो भगवति! दुर्गे! दुर्गतितारिणि![1]।।१३७।।

माये!महादिमायेऽथ प्रोदीर्य च फणावले।
महिषासुरशब्दान्ते विनाशिनिपदं वदेत्।।१३८।।

दुष्टाद् भयङ्करीत्युक्त्वा विन्ध्यादिनिलयेपदम्।
जहीति च सुमर्दिन्यप्यथ देवासुरेत्यपि।।२३१।।

दैत्यपूजित इत्युक्त्वा वरदे नादिरायणि।
दामोदिप्रिये हीं हीं हूं हूं भुतग्रहेति च।।२४०।।

वेतालदुष्टराक्षसपिशाचांस्त्रासयद्वयम्।
बन्धद्वयं मारययुक् तथा भक्तादिवत्सले।।१४१।।

भक्तप्रिये परबलमथिनीत्यथ शत्रिविति।
निकृन्तनीति सौभाग्यप्रदे भूयो जयप्रदे।।१४२।।

१. 'रि' क. ग. पाठः।

Shripuram Publications
www.shripuram.org

वित्तप्रदे यशोवत्यायुष्यप्रद इति क्रमात्।
कीर्तिप्रदे श्रीप्रदे सर्वप्रदे शान्त्यपि प्रदे।।१४३।।

महाभूते महाबलेऽथाम्बरं बिन्दुना सह।
आद्येन च द्वितीयेन तृतीयेन स्वरेण च।।१४४।।

चतुर्थेन च संयुक्तं शक्तिबीजं त्रिधोद्धरेत्।
महामायेति नत्यन्तं विद्यामन्त्र उदाहृतः।।१४५।।

विमर्शिनी

तत्र प्रणवद्वयमध्यगा शक्तिः भुवनेश्वरी 'ओं ह्रीं ओं' इत्युपचारमनुः स्यात्। विद्यामन्त्रमुद्धरति - तारमिति। तारम् 'ओं', 'नमो भगवति! दुर्गे! दुर्गतितारणि![1] माये[2]!' इति प्रोदीर्य, अथ महा इत्यादिमाये 'महामाये' इति, 'फणावले' इति च प्रोदीर्य, 'महिषासुर' इति शब्दान्ते 'विनाशिनी'ति पदं वदेत्। दुष्टाद् दुष्टशब्दाद् भयंकरीति 'दुष्टभयंकरी'त्युक्त्वा, विन्ध्यादिनिलये 'विन्ध्यानिलये' इति पदं, 'जही'ति पदं, 'सुमर्दिनी'त्यपि पदम्, अथ देवासुरेति दैत्यपूजित इति 'देवासुरदैत्यपूजिते' इत्युक्त्वेत्यर्थः, वरदे ना इत्यादि रायणि 'वरदे नारायणी'त्यर्थः। 'दामोदरप्रिये ह्रीं ह्रीं हूं हूं भूतग्रहे' इति च वर्णानुक्त्व, 'वेतालदुष्टराक्षसपिशाचान्' इत्युक्त्वा, त्रासयद्वयं 'त्रासयत्रासये'ति, बन्धद्वयं 'बन्धबन्धे'ति, मारययुक् 'मारयमारये'ति, तथाच भक्तादिवत्सले 'भक्तवत्सले' इत्यर्थः, 'भक्तप्रिये परबलमथिनी'त्युक्त्वा, अथ शत्र्विति निकृन्तनीति 'शत्रुनिकृन्तनी'त्यर्थः, 'सौभाग्यप्रदे' इति, 'जयप्रदे' इति, 'वित्तप्रदे' इति यशोवती'ति, आयुष्यप्रदे इति कीर्तिप्रदे इति श्रीप्रदे इति, 'सर्वप्रदे' इति पदानि क्रमादुक्त्वा, शान्त्यपि प्रदे 'शान्तिप्रदे' इत्यर्थः, 'महाभूते' 'महाबले' इति पदद्वयमुक्त्वा, अथ अम्बरं हकारं प्रत्येकं बिन्दुना आद्येन द्वितीयेन तृतीयेन चतुर्थेन च स्वरेण संयुक्तं 'हं हां हिं हीं' इति चत्वारि बीजान्युक्त्वेत्यर्थः, त्रिधा त्रिकृत्वः शक्तिबीजं 'ह्रीं ह्रीं ह्रीं' इत्युद्धरेत्। 'महामाये' इति पदं नत्यन्तं 'नमः' इत्यन्ते युतं विद्यामन्त्र उदाहृतः। अस्य मन्त्रस्य पुष्पावरणादौ विनियोगः।।१३७-२४५।।

---

१. 'रि' ख. ग. घ. च. पाठः। २. 'ये माये इ' घ. ङ. च. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

ओङ्काराद्यं दुर्गारूपिणि च कुमार्युपेतरूपिणि च।
आर्यावर्तिनि मायारुपिण्यपि चोत्सवादिवासिनि च॥१४६॥

अथ यागभक्तकारिणि सर्वादिकमन्त्रपूर्वकव्यापिनि च।
सर्वादिकर्मफलदायिनि सर्वादिक्रियादिवर्तिनिपदं च॥१४७॥

सर्वादिदोषमर्दिन्यथ सर्ववरादिदायिनीति वदेच्च।
भगवति ततः प्रसादं पुनरापादयतु चेति यागमनुः स्यात्॥१४८॥

विमर्शिनी

शान्तिहोमे प्रोक्तं यागमन्त्रमुद्धरति - ओङ्काराद्यमिति। ओङ्कारमाद्यं यथा भवति तथा 'दुर्गारूपिणी'ति पदं, कुमार्युपेतरूपिणीति 'कुमरीरूपिणी'त्यर्थः, 'आर्यावर्तिनि' 'मायारूपिणी'ति द्वे पदे, उत्सवादिवासिनीति 'उत्सववासिनी'त्यर्थः, अथ 'यागभक्तकारिणी'ति पदं, सर्वादिकमन्त्रपूर्वव्यापिनीति 'सर्वमन्त्रव्यापिनी'त्यर्थः, सर्वादिकर्मफलदायिनि 'सर्वकर्मफलदायिनी'त्यर्थः, सर्वादिक्रियादिवर्तिनिपदं चेति 'सर्वक्रियावर्तिनी'त्यर्थः, सर्वादिदोषमर्दिनीति 'सर्वदोषमर्दिनी'त्यर्थः, सर्ववरादिदायिनीति 'सर्ववरदायिनी'त्यर्थः, 'भगवती'ति च वदेत्। ततः 'प्रसादमि'ति, पुनः 'आपादयतु' चेति च वदेदिति यागमनुः स्यात्॥१४६-१४८॥

विवरणम्

सर्वादिकमन्त्रपूर्वकव्यापिनि चेति। 'सर्वमन्त्रव्यापिनि'ति यावत्॥१४७॥

भूतिः श्रीः पिङ्गलो बभ्रुर्भूतिर्विष्णुः सनातनः।
[1]अग्निमारुतयोर्भूतिर्भूतिः सेन्द्रश्च देवताः॥१४९॥

विमर्शिनी

पुनः कलशाभिषेके प्रस्तुतं भूतिश्रीमन्त्रं पठति - भूतिः श्रीरिति॥१४९॥

प्रणवनतिषण्मुखायेत्यपरो मनुरौपचारिकः स्कन्दे।
प्राग्वदिहाप्यृष्याद्यं मन्त्रार्णैः सलवकैः षडङ्[2]गविधिः॥१५०॥

---

१. 'आ' २. 'ङ्ग वि' ख. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

अथ स्कान्दान् मन्त्रानुद्धरति - प्रणवेति। स्कन्दे प्रणवनतिषण्मुखायेति 'ओं नमः षण्मुखाये'ति अपरः अन्यः (मनुः) मूलमन्त्रः औपचारिकः उपचारसंज्ञश्च। इह ऋष्याद्यं प्राग्वत् पूर्वमन्त्रोक्तवत्। सलवकैः मन्त्रार्णैः 'नमः षण्मुखाये'ति षड्भिरक्षरैः षडङ्गविधिः स्यात्।।१५०।।

सनत्कुमारस्कन्देन्द्रविशाखाः षष्टिषण्मुखौ।
षण्मन्त्राः षण्मुखे प्रोक्ताश्चतुर्थ्यन्ता नमोन्विताः।।१५१।।

विमर्शिनी

षण्मन्त्रान् कथयति - सनत्कुमारेति। षण्मुखे नमोन्विताः 'नमः' इति युक्ताश्चतुर्थ्यन्ताः सनत्कुमाराद्याः षण्मन्त्राः प्रोक्ताः। अत्र चतुर्थीनमोयुक्तत्वं द्वादशनाममन्त्राणामप्युपलक्षणम्।।१५१।।

स्कन्दो बाणो हेमचुडो भद्रसेनो भवस्तथा।
भवपुत्रोऽन्नाद्यशीलः कुक्कुटध्वज एव च।।१५२।।

मयुरवाहनगुहौ कुमारः सनदादिकः।
महासेनश्च सेनान्यां नामद्वादशकं स्मृतम्।।१५३।।

विमर्शिनी

द्वादशनामानि कथयति - स्कन्दो बाण इति। 'अन्नाद्यशीलाय नमः', सनदादिकः कुमारः 'सनत्कुमाराय नमः इतिः। इति नामाद्वादशकं नाम्नां द्वादशकं स्मृतम् उक्तमित्यर्थः।।१५२-१५३।।

आद्यं दीर्घयुगं सबिन्दु सकलाणुर्गृं गुहायेत्यणु-
र्नत्यन्तो महदाह्वयोऽब्धिनवनागैकोनविंशाः स्पृशः।

साद्यच्यद्रीन्दुकरस्वरा विषयुतो यान्तोऽन्त्यवर्गे तुरी-
यार्णं तत्प्रथमौयुतं सलवषट्कं बीजमन्त्रो गुहे।।१५४।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

सकलमन्त्रादिकमुद्धरति - आद्यमिति। सबिन्दु बिन्दुसहितम् आद्यं दीर्घयुगम् 'आं ईं' इति सकलाणुः। नत्यन्तः 'गृं गुहाये'ति महदाह्वयः अणुः महन्मन्त्रः। अब्धिनवनागैकोनविंशाः अब्धिश्चतुर्थः घकारः नव नवमः झकारः नागोऽष्टमो जकारः एकोनविंशो घकारः एते स्पृशः स्पर्शाक्षराः क्रमेण साद्र्यद्रीन्दुकरस्वराः अद्रि सप्तमः ऋकारः पुनरप्यद्रि ऋकारः इन्दुः अकारः कर आकारः एतैः स्वरैर्युक्ताः विषयुतो यान्तः विषं मकारः यान्तो रेफः, अन्त्यवर्गे यादिवर्गे तुरीयार्णं वकारः तत्प्रथमस्तस्य वर्गस्य प्रथमः यकारः, ओयुतम् ओकारयुतं, सलवषट्कं प्रत्येकं बिन्दुसहितमेतत् षट्कं 'घृं झृं जं धां म्रं व्यों' इति गुहे बीजमन्त्रः।। १५४।।

विवरणम्

सकलाणुः सकनसंज्ञको मन्त्रः स्पृशः स्पर्शवर्णाः। साद्र्यद्रीन्दुकरस्वरा इत्येषां क्रमेण संयोजनमुक्तम्। विषयुतो यान्तः, मकारयुक्तो रेफः अन्त्यवर्गे तुरीयार्णं वकारः। तत्प्रथमौयुतमिति तत्प्रथमो यकारः। ओकारश्च योज्यः। सलवषट्कमिति एषां षण्णां बिन्दुरपि स्यादित्यर्थः।।१५४।।

विघ्नविनायकविराः शूरो वरदश्च हस्तिमुखनामा।
षण्मन्त्रा गणपे स्युः सम्प्रोक्त ङेनमोन्विताः क्रमशः।।१५५।।

विमार्शिनी

वैघ्नान् मन्त्रानाह - विघ्नेति। गणपे ङेनमोन्विताः एते विघ्नाद्याः षण्मन्त्राः प्रोक्ताः स्युः।।२५५।।

वज्रदन्तो गजास्यश्च भीमश्च महिषास्यकः।
विघ्नो विनायको वीरः शूराख्यः सर्पमेखलः।।२४६।।

शूर्पकर्णो नागदन्ती ततो रुद्रास्यसम्भवः।
नामानि द्वादशैतानि कीर्तितानि गणेशितुः।।१५७।।

Shripuram Publications
www.shripuram.org

विमर्शिनी

द्वादशमन्त्रानाह- वज्रदन्त इति। गणेशितुः एतानि द्वादश नामानि कीर्तितानि उक्तानि।।१५६, १५७।।

रे[१]वन्ताय महाशास्त्रे गोप्त्रे च प्रभवे तथा।
दीप्त्रे प्रशास्त्रे चार्ये स्युः षण्मन्त्राः न[२]मसा युताः।।१५८।।

विमर्शिनी

अथ शास्तृमन्त्रानाह - रेवन्तायेति। आर्ये(स?) नमसा युताः 'रेवन्ताय' इत्याद्या षण्मन्त्राः स्युः।।१५८।।

विवरणम्

दीप्तेत्यृकारान्तः शब्दोऽभिप्रेतः।।१५८।।

गोप्ता च पिङ्गलाक्षश्च वीरसेनश्च शा[३]म्भवः।
आर्यः शास्ता च गोपालो गुहोऽथ भवपुत्रकः।।१५९।।
ना[४]मानि शान्तभूतेशभूतिदा द्वातशार्यके।

विमर्शिनी

द्वादशनामान्याह - गोप्तेति।।१५९$^{1}/_{2}$।।

आर्यः शास्ता गुहासन्नः सेनानीर्भूतवल्लभः।
रुद्रजो रूपवान् कामी वरदो लोकपूजितः।।१६०।।

नीलाश्व श्वेतामातङ्ग श्यामी पीतानुलेपनः।
रक्तमालाधरः शूरो मायो मातृगणप्रियः।।१६१।।

कालवासा गणाध्यक्षः खड्गहस्तो धनुर्धरः।
सहजायो जनावेशः साधुः संसाररक्षकः।।१६२।।

---

१. 'रेवन्तश्च तथा शास्ता गोप्ता च प्रभुरेव च। दीप्ता चैव प्रशास्ता च षण्मन्त्राः शास्तरीरिताः।।' ख. पाठः। २. 'नामसंयु' ग. पाठः। ३. 'स' क. पाठः। ४. 'शास्तुर्द्वादशनामानि शान्तभूतेशभूतेशभूतिदाः। आ' ख. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

षड्विंशतिरिमे मन्त्रा ङेनमोन्ताश्च तेऽखिलाः[1]।
'ओं श्रीं ह्रीं क्ष्मीं[2] हूं[3] घ्रूं शम्बरकुमाराय षद्मिने स्वाहा।
बीजमन्त्रः[4] समुद्दिष्टः[5] सम्यक् सप्तदशाक्षरः[6]।।१६३।।

विमर्शिनी

षड्विंशतिनामान्याह- अर्य इति। इमे षड्विंशतिर्मन्त्राः। ते अखिलाः द्वदशमन्त्राः षड्विंशतिमन्त्राश्च ङेनमोन्ताः स्युः। बीजमन्त्रः[7] सप्तदशाक्षर[8] इति वदन् पूर्वं तमेव[9] लिखति - ओं श्रीमित्यादि। अस्य बीजमन्त्रस्य कौतुकबन्धने विनियोगः।।१६०-१६३।।

प्राणापानव्यानोदानसमानाः समीरिताः ङेन्ताः।
स्वाहान्ताः सकलेषु प्राणाद्यनिलाणवो निवेद्यविधौ।।१६४।।

विमर्शिनी

अथ सामान्यमन्त्रानुद्धरति - प्राणेति। सकलेषु निवेद्यविधौ ङेन्ताः चतुर्थ्येकवचनान्ताः स्वाहान्ताश्च प्राणापानव्यानोदानसमानाः 'प्राणाय स्वाहा' इत्याद्याः प्राणाद्यनिलाणवः प्राणाहुतिमन्त्राः समीरिताः।।१६४।।

टान्तामृतौलवनमस्सहितं पराया-
थाबात्मनार्णमपि टान्ततुरीयमूर्तिम्।
उक्त्वा निवेद्यमिति वक्तु सकल्पयामि-
वर्णं निवेद्यगरसार्पणमन्त्र एषः।।१६५।।

विमर्शिनी

निवेद्यार्पणमन्त्रमुद्धरति - टान्तेति। टान्तामृतौलवनमः सहितं टान्तः ठकारः अमृतं वकारः, औकारः स्वयमेव लवो बिन्दुः नम इति एभिर्युक्तं (वौ? ठ्वौं) नम इति, 'पराय' इति स्वरूपम्। अथ 'अबात्मना' इत्यर्णमपि, टान्ततुरीयमूर्तिं टान्तां तृतीयैकवचनान्तां तुरीयमूर्तिं अनिरुद्धादिकां मूर्तिम् उक्त्वा कल्पयामीति वर्णैः सहितं निवेद्यमिति स्वरूपं वक्तु ब्रवीतु (वौं ? ठ्वौं) नमः परायावात्मनानिरुद्धेन निवेद्यं कल्पयामि' इत्यादिः। एषः निवेद्यगरसार्पणमन्त्रः निवेद्यगतस्य रसस्यार्पणे मन्त्रः।।१६५।।

---

१. 'लाः ।। प्राणा' ख. पाठः। २. 'क्ष्म्रीं' घ. पाठः। ३. 'हुं ग्रं श' ग. पाठः। ४. 'न्त्रं' ५. 'ष्टं' ६. 'रम्' क. पाठः। ७. 'न्त्रं' ८. 'मि' ९. 'दे' क. घ. ङ. च. पाठः।

Shripuram Publications www.shripuram.org

तत्तद्भूतनिदानबीजहृदयोपेतं परायाक्षरं
चाबाद्यर्णयुतात्मनार्णसहितं टान्तस्वमूर्त्याह्वयम्।
प्रब्रूयाज्जलपूर्वतत्तदुपहाराख्यां तथा कल्पया-
म्यन्तां चेत्युदिता जलादिरसदत्त्यै पञ्च मन्त्राः परे।।१६६।।

विमर्शिनी

जलादिरससमर्पणार्थं पञ्च मन्त्रानुद्धरति - तत्तद्भूतेति। तत्तद्भूतनिदानबीजहृदयोपेतं तस्य तस्य भूतस्याबादेः निदानपादिकारणं वं इत्यादिकेवलबीजं, हृदयं नम इति, ताभ्यां युक्तं परायेत्यक्षरम्, अबाद्यर्णयुतात्मनार्णसहितम् अप्पृथिव्यादिवर्णैः सहितात्मनाक्षरैः युक्तं, टान्तस्वमूर्त्याह्वयं तृतीयैकवचनान्तस्वस्वमूर्तिनामयुक्तं, जलपूर्वतत्तदुपहाराख्यां जलं गन्धं पुष्पं धूपं दीपम् इति तत्तत्पूजासाधनाभिधां तथा कल्पयामित्यन्तां च तामाख्यां प्रब्रूयात्। 'वं नमः परायाबात्मनानिरुद्धेन जलं कल्पयामि', 'लं नमः पराय पृथिव्यात्मना नारायणेन गन्धं कल्पयामि', 'हं नमः परायाकाशात्मना वासुदेवेन पुष्पं कल्पयामि' 'यं नमः पराय वाय्वात्मना सङ्कर्षणेन धूपं कल्पयामि', 'रं नामः परायाग्न्यात्मना प्रद्युम्नेन दीपं कल्पयामि' इति विष्णौ। शिवादिषु वामदेवादयो मूर्तिमन्त्राः। एते जलादिरसदत्त्यै जलादीनां रसदानाया परे निवेद्यादन्ये पञ्च मन्त्रा उदिता उक्ताः।।१६६।।

विवरणम्

तत्तद्भूतनिदानबीजेति। निदानशब्दः कारणपर्यायः। वलहयराक्षराणिं हृदयं नमश्शब्दः। टान्तस्वमूर्त्याह्वयमिति। स्वां स्वामनिरुद्धवामदेवादिमूर्तिं तृतीयैकवचन-सहितामुच्चरेदित्यर्थः। जलादिरसदत्तिर्द्दानं समर्पणमिति यावत्।।१६६।।

गुह्यातिगुह्यगोप्तस्त्वं गुहाणास्मत्कृतं जपम्।
सिद्धिर्[1]भवतु मे देव! त्वत्प्रसादाद्धृदि स्थिता[2]।।१६७।।

प्रीणातु भगवान् विष्णुः कर्मणानेन शाश्वतः।
आद्योऽर्पणे जपस्याणुः प्रीणात्वाद्यश्च कर्मणः।।१६८।।

---

१. 'भक्तिर्भ' क. पाठः। २. 'तः' ख. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

जपसमर्पणमन्त्रं कर्मसमर्पणमन्त्रं च पठति- गुह्यातीति। तयोर्विभागमाह- आद्य इति। जपस्यार्पणे आद्यः अणुः, कर्मणः अर्पणे प्रीणात्वाद्यः अणुः स्यात्।।१६७, १६८।।

इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः।
जाग्रत्स्वप्नसुषुप्त्यन्तेऽवस्थासु मनसेत्यपि।।१६९।।

वाचेति कर्मणेत्युक्त्वा हस्ताभ्यामिति कीर्तयेत्।
पद्भ्यामित्युदरेणेति शिश्नेत्यपि च यत् स्मृतम्।।१७०।।

यदुक्तं यत् कृतमिति तत्सर्वब्रह्मवर्णकान्।
अर्पणं भवतु स्वाहेत्यपि ब्रह्मार्पणे मनुः[1]।।१७१।।

विमर्शिनी

ब्रह्मार्पणमन्त्रमुद्धरति - इतः पूर्वमित्यादि। 'इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः जाग्रत्स्वप्नसुषुप्ति' इत्यन्ते 'अवस्थासु' 'मनसा' इति 'वाचा' इति 'कर्मणा' इत्युक्त्वा 'हस्ताभ्यां' 'पद्भ्याम्' 'उदरेणे'ति 'शिश्ना' इत्यपि 'यत् स्मृतं' 'यदुक्तं' 'युत् कृतम्' इति 'तत्सर्वं ब्रह्म' इति वर्णकान् 'अर्पणं भवतु स्वाहा' इत्यपि कीर्तयेदिति ब्रह्मार्पणे मनुः स्यात्[2]।।१६९-१७०।।

सर्वाद्यादिषु तत्त्वकेषु निजमूर्त्यन्तेषु गन्धादित-
त्तन्मात्रोल्लसितस्वरूपपदमायान्तं[3] तदन्ते पुनः।
ङेन्तात्मान्तसमानपूर्वकनिजप्राणान् नमोन्तान् वदे-
देवं संहृतिपञ्चतत्त्वमनवः प्रोक्ता विशेषान्विताः।।१७२।।

विमर्शिनी

निष्कामणविधिमधिकृत्य 'विशेषान्वितैः स्वैर्हुनेच्चेषुतत्त्वैः' इत्युक्तं पञ्चतत्वानां विशेषवत्त्वमाह - सर्वाद्यादिष्विति। सर्वाद्यादिषु 'लां नमः पराय सर्वात्मने' इत्यादिविष्ण्वादिषुक्तेषु पञ्चसु तत्त्वेषु निजमूर्त्यन्तेषु नारायणादिस्वस्वमूर्तिशब्दात्तेषु,

---

१. 'अन्योन्य' ख. पाठः। २. 'त् रहस्यभूतानां।।' घ. ङ. च. पाठः।
३. 'न्मन्त्रोल्ल' क. पाठः।

Shripuram Publications
www.shripuram.org

मूर्तीनां चतुर्थ्येकवचनान्तत्वमपि ग्राह्यं, 'लां नमः पराय सर्वात्मने नारायणाय' इत्याद्यन्तेषु गन्धादितत्तन्मात्रोल्लसितस्वरूपपदं गन्धादिशब्दैः तन्मात्रशब्देन च युक्तं स्वरूप इति पदम् आयान्तं च 'गन्धतन्मात्रस्वरूपाये'त्यादि सिद्धं भवति। पुनस्तदन्ते ङेन्तात्मान्तसमान-पूर्वकनिजप्राणान् समानादीन् निजान् निजान् प्राणानात्मान्तान् ङेन्तांश्च 'समानात्मने' इत्यादीनित्यर्थः, तान् नमोन्तांश्च वदेत्। एवं सर्वदेवेषु विशेषान्विताः संहृतिपञ्चतत्त्वमनवः प्रोक्ताः। सूत्रच्छेदे तेषां हुंफडन्तत्वमपि ग्राह्यम्।।१७२।।

तारं शक्तिसनादयादिमनुवर्णं कादितत्त्वाक्षरं
नत्यन्तेऽथ शिवाय चेति गिरिशे ब्रह्मादि ङेसंयुतम्।
ङेन्तोर्व्याद्यधिपत्युपर्यभिवदेद् ध्लामादिराजन्निवृ-
त्त्याद्युद्भिन्नकलात्मनेहुमिति चास्त्रान्तं विशिष्टोद्घृतौ।।१७३।।

विमर्शिनी

शिवे विशेषेण विशेषपञ्चतत्त्वान्युद्धरति- तारमिति। गिरिशे विशिष्टोद्घृतौ विशेषवत्त्वेनोद्धारे तारं, शक्तिसनादयादिमनुवर्णं शक्तिः भुवनेश्वरी सनादं नादसहितं नादः प्रासादः यादिमनुवर्णं यकारादिपञ्चाक्षरस्य प्रतिलोमवर्णेष्वेकैकं, कादितत्त्वाक्षरं कवर्गस्य[1] स्वस्वपञ्चभूतसम्बन्ध्यक्षरम् 'ओं ह्रीं ह्रौं यं कं' इत्यादि पञ्च पञ्च बीजानि सिद्धानि, नत्यन्तेऽथ शिवायेति 'नमः शिवाये'त्यर्थः, ब्रह्मादि ङेसंयुतं चतुर्थ्येकवचनान्तानि 'ब्रह्मणे' इत्याद्यधिदैवतनामानि, ङेन्तोर्व्याद्यधिपत्युपरि चतुर्थ्येकवचनान्तपृथिव्यादि(भिः?) सहिताधिपतिशब्दस्योपरि 'पृथिव्यधिपतये' इत्यादीनामुपरीत्यर्थः ह्लामादिराजन्निवृत्त्या-द्युद्भिन्नकलात्मनेहुमिति 'ह्लां' इत्यादीबीजैः सह 'निवृत्त्या'दिभिर्युक्तं 'कलात्मने हुं' इति वर्णान् अस्त्रान्तं फडन्तं यथा भवति तथाभिवदेत्। अत्रापि हुंफडन्तत्वं सूत्रत्छेद एव ग्राह्यम्।।१७३।।

स्थूलात्मतोन्मेषविधायिका चि-
दावाहनासुन्यसनादि कृत्वा।
क्रिया स्वनिद्राघटयुक्तितोऽत्र
कार्या कुमारार्यकयोः स्मृतं तत्।।१७४।।

---

१. 'स्य पञ्चस्वस्वभू' ख. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

एवं रहस्यभूतानि विशेषपञ्चतत्त्वान्यभिधाय गुरूपदेशादेवावगम्यमतिगुह्यं जीवावाहनस्वरूपमपि किञ्चिदुन्मीलयति - स्थूलात्मतेति। चिदावाहनासुन्यसनादि कृत्वा चिदावाहना जीवावाहना असुन्यसनं प्राणादीनां न्यासः, आदिशब्देन पुर्यष्टकादिकं गृह्यते। एतानि कृत्वैव स्थूलात्मतोन्मेषविधायिका क्रिया कार्येत्यन्वयः। स्थुलात्मताया उन्मेष इति स्थूनावाहनं गृह्यते। तस्य विधायिका क्रिया तत्करणमित्यर्थः। इति स्थूलावाहनायाः पूर्वमेव जीवावाहनस्य काल इति द्योतितं भवति। अत्र जीवावाहने कुमार्थर्यकयोः स्वनिद्राघटयुक्तितः कुमारस्य [1]स्वकौमारकलशयोगेन आर्यके स्वनिद्राकलशयोगेन च तद् जीवावाहनं स्मृतम्।।१७४।।

अस्वायमोद्बुद्धहृदब्जयुक् स्वे
निध्याय निर्याप्य निजेडयास्य।
सुषुम्नयावेश्य दशासुचित्ता-
दीद्धं चितिं हृत्कमले निदध्याद् ।।१७५।।

विमर्शिनी

अस्वायमोद्बुद्धहृदब्जयुक् प्राणायामेन विकसितं हृदयकमलयुग्मं स्वस्य देवस्य च येन स आचार्यस्तथोक्तः, स तु स्वे हृदयकमले निध्याय स्वगुरूक्तक्रमेणावलोक्य निजेडया नाड्या निर्याप्य निर्गमय्य अस्य देवस्य सुषुम्नया नाड्यावेश्य प्रवेश्य दशासुचितादी(डां? द्धां) दशभिः प्राणैश्चित्तादिभिः मनोबुद्ध्यादिभिर्दीप्तां चितिं चैतन्यमस्य हृत्कमले निदध्यात् स्थापयेत्। एतदावाहनस्य मन्त्रादिकं स्वगुरुमुखादेव ग्राह्यमिति नोक्तम्।।१७५।।

त्रिस्त्र्यात्मना व्याप्य सुजप्य पञ्च-
तत्त्वानि हृद्येभिरथाखिलाङ्गे।
संव्याप्य संसूत्र्य तदासुजात-
न्यासादिना प्राणितमादधीत।।१७६।।

---

१. 'स्वस्य कौ' ख. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

अथ आवाहनानन्तरं (त्र्यात्मना) प्रणवेन त्रिर्व्याप्य हृदि स्पृशान् पञ्चतत्त्वानि सुजप्याथ एभिरेवाखिलाङ्गे संव्याप्य संसूत्र्य सूत्रस्थाने न्यस्य तदा पुनः असुजातन्यासादिना प्राणन्यासादिना प्राणितं संजातप्राणमादधीत।।१७६।।

प्राणं पादतलादि नोवधि ततः पृष्ठेऽन्यथापानकं
व्यानं व्याप्तमुदानमादृगुदरान्नाभेः समानं हृदि।
वाच्यक्ष्णोर्न्नसि नागकूर्मकृकलाख्यान् देवदत्तं बहि-
र्व्याप्यान्तश्च धनञ्चयं न्यसतु मन्त्री स्वाङ्गुलीबीजवित्।।१७७।।

विमर्शिनी

प्राणन्यासमपि किञ्चित् प्रकाशयति - प्राणमिति। स्वाङ्गुलीबीजवित् प्राणादीनामङ्गुलीबीजानि च जानन् मन्त्री मन्त्रांश्च जानन् प्राणं पादतलादि पदतलमारभ्य नोवधि नासिकान्तं न्यसतु। ततो नासिकाया आरभ्य पृष्ठे पृष्ठभागे अन्यथा पादतलपर्यन्तमपानकं च, व्यानं देहे व्याप्तम्, उदानमुदरादारभ्य आदृक् नेत्रपर्यन्तं, समानं नाभेरारभ्य हृदि हृत्पर्यन्तं, नागकूर्मकृकलाख्यान् क्रमेण वाच्यास्ये* ।।१७७।।

न्यस्येत् पुरोऽव्यक्तपुरोगगन्ध-
मात्रान्तिका[1]स्त्वष्ट हृदम्बुजस्य।
दलेष्ववाचीनमुखेषु मध्ये
शक्तिं च पुर्यष्टकसन्निविष्टाम्।।१७८।।

विमर्शिनी

अव्यक्तपुरोगगन्धमात्रान्तिकाः अव्यक्तं प्रकृतितत्त्वं तदादिगन्धतन्मात्रान्तिकाः प्राणबुद्ध्यहङ्कारतत्त्वानि शब्दादितन्मात्रतत्त्वानि चाष्ट पुरः पुरीः न्यस्येत्, मध्ये कर्णिकायां पुर्यष्टकसन्निविष्टां पुर्यष्टकस्याश्रयभूतां स्वां शक्तिं च। अत्र तुशब्दः पक्षान्तरद्योतकः। तत्पक्षे अव्यक्तपुरोगगन्धमात्रन्तिका इति अव्यक्तं पुरोगतं यस्य

---

१. 'म' घ पाठः। *अक्ष्णोरित्याद्यंशव्याख्यानमादर्शेषु नोपलभ्यते।

Shripuram Publications
www.shripuram.org

बुद्धितत्त्वस्य तत् तथोक्तं, तत्र बुद्ध्यहङ्कारमनःशब्दतन्मात्रादीनि अष्टतत्त्वानि दलेषु, मध्ये शक्त्यात्मकमव्यक्तं च न्यस्येदिति।।१७८।।

तन्मध्ये चिद्धनं जीवं मूलमन्त्रात्मकं न्यसेत्।
तत्त्वान्यपि यथास्थानं मूलवर्णा[1]ङ्गकान्यपि।।१७९।।

विमर्शिनी

तन्मध्ये शक्तेर्मध्ये चिद्घनं चैतन्यसारं जीवं जीवतत्त्वं मूलमन्त्रात्मकं मूलमन्त्ररूपदेवस्वरूपं च न्यसेत्। पुनस्तत्त्वान्यपि यथास्थानं न्यसेत्। पुनर्मूलवर्णाङ्कान्यपि न्यसेत्।।१७९।।

अन्योन्यसम्पुटदृढा घटिताग्रहस्ता
मुद्राञ्जलिर्मुकुलिताम्बुरुहानुरूपा।
ब्रह्माञ्चलिर्विधिमदारचिता स्वमूर्ध्नि
सा वन्दनी स्वहृदि दक्षिणपार्श्वनम्रा।।१८०।।

विमर्शिनी

रहस्यभूतानां मन्त्राणामुद्धारानन्तरं तथाविधानां मुद्राणां लक्षणमाह- अन्योन्येति। अन्योन्यसंपुटदृढा परस्पराभिमुख्येन दृढबद्धा, घटिताग्रहस्ता संस्पृष्टहस्ताग्रा, मुकुलिताम्बुरुहानुरूपा मुकुलितपद्मसमाना या सा अञ्जलिर्नाम मुद्रा। स्वमूर्ध्नि विधिवत् पद्मासनस्थेन साधकेनारचिता सैव ब्रह्माञ्जलिर्नाम मुद्रा। स्वहृदि दक्षिणपार्श्वनम्रा दक्षिणपार्श्वे नम्रा सैव वन्दनी नाम मुद्रा।।१८०।।

विवरणम्

पूजाशेषमन्त्रानुक्त्वा मुद्रां लक्षयति - अन्योन्येत्यादिना। अन्येन्यसम्पुटौ दृ(ढा?ढौ) घटिताग्रौ च हस्तौ यस्यामिति समासः, हस्तस्पर्शाभिमुखौ श्लिष्टौ तदङ्गुलीश्च श्लिष्टाः कुर्यात्। साञ्जलिमुद्रेत्यर्थः। मुकुलिताम्बुरुहानुरूपेति तस्यां हस्तोदरकुम्भीकरणमुक्तम्। स्तमूर्घ्नि विधिवदारचिता अञ्जलिर्ब्रह्माञ्जलिर्नाम मुद्रा स्वहृदीत्यारचितेत्य-नुषङ्गः।।१८०।।

१. 'मन्त्राङ्ग' क. पाठः।

Shripuram Publications
www.shripuram.org

या वाममुष्ट्युच्छ्रितपूर्वशाखाग्रहान्यमुष्टिर्लसितप्रधाना।
सा तूर्ध्वमुद्रा शिवलिङ्गमुद्रोद्गताग्रजा दक्षिणहस्तमुष्टिः।।१८१।।

विमर्शिनी

वाममुष्ट्युच्छ्रितपूर्वशाखाग्रहा वामकरं मुष्टीकृत्य तस्य करस्य पूर्वशाखामङ्गुष्ठशाखां गृह्णाति अन्यमुष्टिर्दक्षिणमुष्टिः लसितप्रधाना उच्छ्रिताङ्गुष्ठा या सा तूर्ध्वमुद्रा ऊर्ध्वाख्या मुद्रा स्यात्। उद्गताग्रजा ऊर्ध्वगताग्रया ज्येष्ठया युक्ता दक्षिणहस्तमूष्टिः शिवलिङ्गमुद्रास्यात्।।१८१।।

आकुञ्चिताग्रङ्गुलि हस्तयुग्ममायोज्य तर्जायुगलं प्रकल्प्य।
स्वमध्यमापृष्ठगमग्रजाभ्यामन्तर्लिखेत् स्यादिति योनिमुद्राः।।१८२।।

विमर्शिनी

योनिमुद्रामाह- आकुञ्चितेति। आकुञ्चिताग्राङ्गुलि ईषत्कुञ्चिताङ्गूल्यग्रं हस्तयुग्ममायोज्य परस्परं योजयित्वा तर्जायुगलं तर्जनीद्वयं स्वमध्यमापृष्ठगं स्वस्वमध्यमायाः पृष्ठगतं प्रकल्प्य अर्थात् मध्यमाद्वयमृजूकृत्य अग्रजाभ्याम् अङ्गुष्ठाभ्याम् अन्तर्लिखेदिति योनिमुद्रा स्यात्।।१८२।।

मध्यानामान्तराङ्गुष्ठो निर्गतो मध्यमानता।
दक्षिणस्य तु मुष्टौ स्यान्मुद्र वैनायकी त्वियम्।।१८३।।

विमर्शिनी

गणपतेर्मुद्रामाह- मध्येति। मध्यानामान्तरा मध्यमानामिकयोरन्तरा मध्ये अङगुष्ठो निर्गतो दक्षिणस्य तु मुष्टौ भवेत्। तत्र मध्यमानता च भवेत्। इयं वैनायकी मुद्रा स्यात्।।१८३।।

अनामिकामध्यमिकान्तरालप्रसारिताङ्गुष्ठविशिष्टमुष्टिः।
मुद्रा हृदि स्यात् प्रथमाग्रलग्न[1]तर्जाग्रमुष्टिः शिरसि प्रदिष्टा।।१८४।।

---

१. 'ग्रा' इति मूलकोशपाठः।

Shripuram Publications
www.shripuram.org
www.shripuram.org

विमर्शिनी

अङ्गमूद्राः क्रमेणाह- अनामिकेति। अनामिकामध्यमिकान्तरालप्रसा-रिताङ्गुष्ठ-विशिष्टमुष्टिः अनामिकामध्यमयोरन्तराले प्रसारितेनाङ्गुष्ठेन विशिष्टा मुष्टिः हृदि हृदयमुद्रा स्यात्। प्रथमाग्रलग्नतर्जाग्रमुष्टिः अङ्गुष्ठाग्रे लग्नं तर्जाग्रं यस्या मुष्टेः सा शिरसि मुद्रा प्रदिष्टा स्यात्।।१८४।।

विवरणम्

अथाङ्गमुद्रां दर्शयति- अनामिकेति। प्रथमाग्रलग्नतर्जाग्रमुष्टिरिति समासः, मुष्टिं कृत्वा तस्य तर्जनीं ज्येष्ठाग्रेणोन्नमयेदित्यर्थः।। १८४।।

उत्थापिताङ्गुष्ठविशिष्टमुष्टि-[1]
र्मुद्रा शिखायां कवचेऽग्रदोर्भ्याम्।
गूढाग्रिमाभ्यामभिवेष्ट्य गात्रं
समाहरेत् तर्जनिके स्तनान्ते।।१८५।।

विमर्शिनी

उत्थापिताङ्गुष्ठविशिष्ठमुष्टिः ऊर्ध्वीकृतेनाङ्गुष्ठेन विशिष्टा मुष्टिः शिखायां स्यात्। गूढग्रिमाभ्याम् अन्तर्गताङ्गुष्ठाभ्याम् अग्रदोर्भ्यां कराग्राभ्यां गात्रं शरीरमभिवेष्टय स्तना(न्तरे?न्ते) स्तनमध्ये तर्जनिके तर्जनीद्वयं समाहरेत् योजयेत्। इयं कवचे भवेत्।।१८५।।

विवरणम्

गूढाग्रिमाभ्यां ज्येष्ठां मध्ये निधायेत्यर्थः।।१८५।।

नाराचमुष्टी परिवर्त्य तिर्यगायम्य मुञ्चदियमस्त्रमुद्रा।
भ्रूमध्यबद्धव्यवलम्बमानज्येष्ठाग्रमुष्टिः खलु नेत्रमुद्रा।।१८६।।

---

१. 'त्तानिता' ख. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

नाराचमुष्टी शरग्रह[1]णमुष्टिद्वयं परिवर्त्य बहिर्मुखं कृत्वा तिर्यगायम्य तिर्यक् प्रसार्य मुञ्चेत्। इयमस्त्रमुद्रा स्यात्। भ्रूमध्यबद्धव्यवलम्बमानज्येष्ठाग्रमुष्टिः भ्रूमध्ये बद्धा अधोमु[2]खज्येष्ठाग्रयुक्ता मुष्टिः खलु आगमप्रसिद्धा नेत्रमुद्रा।।१८६।।

प्रदेशिनीमध्यमिकाग्रकाभ्यां
सानामिकाभ्यामपि वाभिमर्शः।
स्यान्नेत्रमुद्रेति षडङ्गके तु
स्वस्वास्पदस्पर्शनमात्रमूर्ध्वम्।।१८७।।

विमर्शिनी

तत्र पक्षान्तरमाह - प्रदेशिनीति। प्रदेशिनीमध्यमिकाग्रकाभ्यां नेत्रद्व[3]यं चेत्, नेत्रत्रयं चेत् सानामिकाभ्याम् अनामिकासहिताभ्यां वा अभिमर्शः स्पर्शो नेत्रमुद्रा स्यात्। इति षडङ्के मुद्राः स्युः। ऊर्ध्व त्वष्टाङ्[4]गादिषु स्वस्वास्पदस्पर्शनमात्रं स्वस्वस्थानस्पर्शनमात्रमेव।।१८७।।

विवरणम्

सानामिकाभ्यामिति नेत्रत्रयविषयमेतत्। तत्र च मध्यमया ललाटनेत्रस्पर्शः कार्यः। अत ऊर्ध्वमिति।।१८७।।

हस्तौ परावृत्य कनिष्ठिकाद्वयं
तर्जाद्वयं च प्रकलय्य गारुडिम्।
बध्नातु मूद्रामवलम्बिताग्रजां
चलत्तदन्याङ्गुलिक्लृप्रपत्रिकाम्।।१८८।।

विमर्शीनी

गरुडमुद्रामाह- हस्ताविति। हस्तौ परावृत्य विमुखौ कृत्वा कनिष्ठिकाद्वयं तर्जाद्वयं चान्योन्यं प्रकलय्य बद्ध्वा अवलम्बिताग्रजाम् अधोमुखीकृताङ्गुष्ठद्वयां चलत्तदन्याङ्गुलि-

---

१. 'हमु' घ. च. पाठः। २. 'गतेन ज्ये' ग. ङ. पाठः। ३. 'द्वन्दं चेन्नेत्रद्वयं चेत् सा' ४. 'ङ्गकादि' ख. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

क्लृप्तपत्रिकां चलद्भ्यामितराङ्गुलिद्वयाभ्यां क्लृप्ताभ्यां पक्षाभ्यां युक्तां च गारुडीं मुद्रां बध्नातु ।।१८८।।

अन्योन्यमाबध्य कनिष्ठिकाद्वयं
ज्येष्ठाद्वयं चाप्यथ शेषिताङ्गुलीः।
अधोमुखीकृत्य निकुञ्चिताग्रकाः[1]
परिभ्रमय्य प्रकरोतु गालिनीम्।।१८९।।

विमर्शिनी

गालिनीमुद्रामाह[2]- अन्योन्यमिति। करद्वयं परावृत्य कनिष्ठिकाद्वयं ज्येष्ठाद्वयं चान्योन्यमाबध्य अथ शेषिताङ्गुलीः इतराङ्गुलीः निकुञ्चिता(ग्राः? ग्रका) वक्रीकृताग्राः अधोमुखीकृत्य परिभ्रमय्य गालिनीं[3] मुद्रां प्रकरोतु।।१८९।।

कनिष्ठिकानामिकयोः करद्वये
प्रदेशिनीमध्यमयोर्युगं मिथः।
व्यत्यस्तबद्धाग्रमधोमुखीकृतं
प्रकल्प्य मुद्रां प्रकरोतु सौरभीम्।।१९०।।

विमर्शिनी

सुरभिमुद्रामाह- कनिष्ठिकेति। करद्वये कनिष्ठिकानामिकयोः प्रदेशिनीमध्यमयोश्च युगं युग्मं मिथः अन्योन्यं व्यत्यस्तबद्धाग्रं व्यत्यासेन बद्धाग्रमधोमुखीकृतं प्रकल्प्य सौरभीं धेनुमुद्रां प्रकरोतु।।१९०।।

उत्तानिताञ्जल्युदरद्व्यनामिका-
मूलोल्लिखत्खप्रथमाभिवाहनी[4]।
अवाङ्मुखी स्थापनिका नताञ्जलिः
श्लिष्टोत्थिताङ्गुष्ठयुगा स्थिराकृतिः।।१९१।।

---

१. 'ग्रि' ख. पाठः। २. 'ल' ख. ग. ङ. पाठः। ३. .... ४. 'लि'

Shripuram Publications
www.shripuram.org

विमर्शिनी

आवाहन्यादिमुद्राः कथयति- उत्तानितेति। उत्तानिताञ्जल्युदरद्व्यनामिका-मूलोल्लिखत्स्वप्रथमा उत्तानिताया अञ्जल्या अन्तर्भागे द्वयोरनामिकयोर्मूले उल्लिखद्भ्यां स्वास्वाङ्गुष्ठाभ्यां युक्ताभिवाहनी मुद्रा स्यात्। अवाङ्मुखी अधोमुखी श्लिष्टोत्थिता-ङ्गुष्ठयुगा परस्परं श्लिष्टाभ्यामुत्थिताभ्यां अङ्गुष्ठाभ्यां युक्ता स्थिराकृतिः निश्चलाकारा नताञ्जलिः नमिताञ्जलिः स्थापनिका मुद्रा स्यात्।।१९१।।

विवरणम्

उत्तानितस्याञ्जलेरुदरे ये द्वे अनामिके तयोर्मूलमुल्लिखन्त्यौ स्वे प्रथमे अङ्गु-लित्र(त्र?द्व) यसाभिवाहनि अवाङ्मुखीत्यभिवाहनीमेवावाङ्मुखीं कृत्वेत्यर्थः। श्लिष्टोत्थिताङ्गुष्ठयुगेति। तस्मादञ्जलिपृष्ठादूर्ध्वमुन्नतञ्च कार्यमित्यर्थः। स्थापनिकेति नामनिर्देशः।।१९१।।

सा सन्निधापन्युदिता नताङ्गुली[१]-
श्लिष्टोभयाङ्गुष्ठपरिभ्रमोज्ज्वला।
अवाङ्मुखाङ्गुष्ठनताङ्गुलीगणा
मुष्टिद्वयी स्यादिह सन्निरोधनी।।१९२।।

विमर्शिनी

नताङ्गुलि[२]श्लिष्टोभयाङ्गुष्ठपरिभ्रमोज्ज्वला नतास्वङ्गुलीषु श्लिष्टाभ्यामुभयाङ्गु-ष्ठाभ्यां युक्तेन परिभ्रमणेनोज्ज्वला या सा सन्निधापन्युदिता। इह अवाङ्मुखाङ्गुष्ठनताङ्गुली-गणा अधोमुखयोरङ्गुष्ठयोः नतेनाङ्गुलीसमूहेन युक्ता मुष्टिद्वयी सन्निरोधनी मुद्रा स्यात्।।१९२।।

विवरणम्

श्लिष्टोभयाङ्गुष्ठपरिभ्रमोज्ज्वलेति। परितो भ्रमणमात्रमस्या विशेषः। मुष्टिद्वयीति श्लिष्टतोपलक्षणं द्रष्टव्यम्।।१९२।।

---

१. 'न्तर्गताङ्गुष्ठ' ख. पाठः। २. 'लि' ख. ङ. च. पाठः।

Shripuram Publications
www.shripuram.org

यावाहनी सार्पितपुष्पमूर्ध्वतो
ह्यवाङ्मुखीव्यापितयावकुण्ठनी।
संयोजिता मूर्धनि धेनुमुद्रिका
मुद्रामृतीकृत्यभिधा समिरिता।।१९३।।

विमर्शिनी

या आवाहनी मुद्रा सैव अर्पितपुष्पं देवमूर्ध्न्यर्पितेन पुष्पेण युक्तं यथा भवति तथा ऊर्ध्वतः शिरस आरभ्य अवाङ्मुखीव्यापितया स्थिता हि अवकुण्ठनी मुद्रा स्यात्। मूर्धनि संयोजिता धेनुमुद्रिका अमृतीकृत्यभिधा मुद्रा समीरिता।।१९३।।

विवरणम्

आवाहन्या पुष्पं देवस्य मूर्धनि निधाय ततः प्रभृति पदपर्यन्तमवाङ्मुखी सती देवतनुं व्यापयेदितीयमवकुण्ठनी स्यात्। धेनुमुद्रिकेति।।१९३।।

उत्तानमुष्टि त्वनुमोदनक्रमात्
प्रसारिते तिर्यगथ प्रसादनी।
सप्तेति मुद्रा अभिवाहनादिषु
क्रमेण कार्याः कथिताः समासतः।।१९४।।

विमर्शिनी

उत्तानमुष्टी उत्तानिते मुष्टी तु अनुमोदनक्रमात् प्रीणनरीत्या तिर्यक्प्रसारिते भवतः। इयं प्रसादनी मुद्रा। इति समासतः कथिताः सप्त मुद्राः अभिवाहनादिषु क्रमेण कार्याः।।१९४।।

विवरणम्

तिर्यक् प्रसारिते इत्यन्वयः। ननु पञ्चैव हि क्रियाः प्रागावहनसमये प्रतिपादिताः। शिष्टयोः किं विधो विनियोग इत्यत आह- सप्तेति।।१९४।।

www.shripuram.org
Shripuram Publications
www.shripuram.org

व्यत्यस्य तूपाद्ययुगं करोतु वा
निरुध्य संस्थापनमातनोतु वा।
मुक्तामृतीकृत्यवकुण्ठनाह्वयाः
पञ्चैव मुद्राः समुशन्ति केचन।।१९५।।

विमर्शिनी

उपाद्ययुगं द्वितीयां तृतीयां च व्यात्यस्य विनिमय्य करोतु वा। निरुध्य निरोधनीं दर्शयित्वा संस्थापनमातनोतु संस्थापनीं दर्शयेद् वा। केचन मुक्तामृतीकृत्यवकुण्ठनाह्वयाः अमृतीकृतिमवकुण्ठनीं च त्यक्त्वा पञ्चैव मूद्राः समुशन्ति।।१९५।।

कृत्वाग्रहस्तौ मणिबन्धसक्तशाखौ मिथःश्लिष्टतलद्वयौ च।
परिभ्रमय्य प्रकरोतु चक्रमुद्रां परीताङ्गुलिदर्शितारम्।।१९६।।

विमर्शिनी

आयुधमुद्राः कथयति- कृत्वेति। अग्रहस्तौ मणिबन्धसक्तशाखौ मणिवन्धस्थानयोः सक्ताभिः शाखाभिरुपलक्षितौ मिथःश्लिष्टतलद्वयौ अन्योन्यं श्लिष्टेन तलद्वयेन युक्तौ च कृत्वा परिभ्रमय्य परिभ्रमणं कारयित्वा परीताङ्गुलिदर्शितारां परिवर्तिताभिरङ्गुलीभिः दर्शितैररैर्युक्तां चक्रमुद्रां प्रकरोतु।।१९६।।

विवरणम्

उदरपृष्ठादिष्वष्टाङ्गद्वादशाङ्गविषये मिथो मणिबन्धसक्तशाखावित्यन्वयः। परीताङ्गुलिदर्शितारामिति चक्रारणामङ्गुलिभिरभिव्यञ्जनमुक्तम्।।१९६।।

प्रसारिताङ्गुष्ठकतर्जनीकशिष्टा[1]त्तमुष्ट्युज्ज्वलदक्षदोष्णा।
निगीर्णवामप्रथमा तु शङ्खमुद्रान्यशाखामुकुलीकृताग्रा।।१९७।।

प्रसारिताङ्गुष्ठकतर्जनीकशिष्टात्तमुष्ट्युज्ज्वलदक्षदोष्णा प्रसारिताभ्यां दीर्घीकृताभ्याम् अङ्गुष्ठतर्जनीभ्यामवशिष्टाभिः अङ्गुलीभिः कृतया मुष्ट्या उज्ज्वलेन दक्षिणकरेण निगीर्णवामप्रथमा कबलीकृतेन वामाङ्गुष्ठेन युक्ता अन्यशाखामुकुलीकृताग्रा वामहस्तस्यान्याभिः शाखाभिः मुकुलीकृतेनाग्रभागेन युक्ता शङ्खमुद्रा स्यात्।।१९७।।

---

१. 'श्लि' क. ख. पाठः।

Shripuram Publications
www.shripuram.org

विवरणम्

अन्यशाखामुकुलीकृताग्रेति। ये दक्षिणमुष्टेः प्रसारिते अङ्गुली या वामस्य शिष्टा अङ्गुलयश्चतस्रः ताभिष्षड्भिः सहाग्रं मुकुलीकृतं स्यादित्यर्थः।।१९७।।

स्याद् वाममुष्टिकबलीकृतदक्षिणाङ्गु-
ष्ठाग्रावसक्तपरिशेषितदक्षशाखा।
तत्तर्जनीसमसमुच्छ्रितवामबाहु-
ज्येष्ठाग्रका निर्[1]गदितेत्यपि शङ्खमुद्रा।।१९८।।

विमर्शिनी

शङ्खमुद्रायाः पक्षान्तरं दर्शयति - स्यादिति। वाममुष्टिकबलीकृतदक्षिणाङ्गुष्ठाग्रा-वसक्तपरिशेषितदक्षशाखा वाममुष्ट्या कबलीकृतस्य दक्षिणाङ्गुष्ठस्या[2]ग्रे अवसक्ताः प्रसक्ताः परिशेषिताः दक्षिणस्य शाखा यस्याः सा तथोक्ता, तत्तर्जनीसमसमुच्छ्रितवामबाहुज्येष्ठाग्रका दक्षिणतर्जन्या समं समुच्छ्रितं वामकराङ्गुष्ठाग्रं यस्याः सापि तथोक्ता। इत्यपि शङ्खमुद्रा गुरुभिर्निगदिता स्यात्।।१९८।।

विवरणम्

वाममुष्टिना दक्षिणाङ्गुष्ठं कृत्स्नं गृहीत्वा तस्य मुष्ट्युपरि दृष्टाग्रस्याङ्गुष्ठस्याग्रे दक्षिणतर्जनीव्यतिरिक्तास्तिस्रोऽङ्गुलीर्योजयित्वा तां तां तर्जनीं वामाङ्गुष्ठञ्च सहोन्नते श्लिष्टे कुर्यादिति शङ्खमुद्रायाः प्रकारान्तरमुक्तम्।।१९८।।

साधोग्रकाङ्गुष्ठकसम्मुखीनश्लिष्यद्द्विमुष्टिप्रसृतानताग्रम्।
तन्मध्यमायुग्मकमाकलय्य प्रद[3]र्शयेदत्र गदाख्यमुद्राम्।।१९९।।

विमर्शिनी

गदामुद्रामाह- साधोग्रकेति। साधोग्रकाङ्गुष्ठकसम्मुखीनश्लिष्यद्द्विमुष्टि-प्रसृतानताग्रम् अधोग्राभ्यामङ्गुष्ठाभ्यां सहितायाः सम्मुखीनायाः श्लिष्यन्त्याश्च द्विमुष्टेः प्रसृतमानताग्रं च तन्मध्यमायग्मकं तस्य मुष्टिद्वयस्य मध्यमायुगलम् आकलय्य बद्ध्वा अत्र एतन्मुद्राबन्धनकाले गदाख्यमुद्रां प्रदर्शयेत्।।१९९।।

---

१. 'भवतु वेत्यथ श' ख. पाठः। २. 'ग्रे प्र' ख. ङ. च. पाठः। ३. 'द्रा परि' ख. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

मणिबन्धविषक्तपाणियुग्मप्रसृताष्टाङ्गुलिकल्पिताष्टपत्रा।
प्रथमायुगक्लृप्तकर्णिकाढ्या परिदर्श्या पयसीरुहात्ममुद्रा।।२००।।

विमर्शिनी

पद्ममुद्रामाह- मणिबन्धेति। मणिबन्धविषक्तपाणियुग्मप्रसृताष्टाङ्गुलिकल्पिताष्टपत्रा मणिबन्धे विशेषेण सक्तात् पाणियुग्मात् प्रसृताभिरष्टभिरङ्गुलिभिः कल्पितैरष्टभिः पत्रैः उपेता, प्रथमायुगक्लृप्तकर्णिकाढ्या अङ्गुष्ठयुग्मेन क्लृप्तया कर्णिकया च युक्ता पयसिरुहात्ममुद्रा पद्ममुद्र परिदर्श्या स्यात्।।२००।।

तिर्यङ्[1] निकुञ्च्य प्रहिताब्धिशाखा
परश्वधस्योन्नमितप्रधाना।
प्रसारिताङ्गुष्ठशिरःस्थमध्या-
नामाग्रका स्याद्धरिणस्य मुद्रा।।२०१।।

विमर्शिनी

परशुमुद्रामाहा- तिर्यगिति। निकुञ्च्य वक्रिकृत्य तिर्यक् प्रहिताब्धिशाखा तिर्यग्गच्छन्तीभिः अङ्गुष्ठवर्जिताभिश्चतसृभिरङ्गुलीभिरुपेता, उन्नमितप्रधाना ऊर्ध्वीकृताङ्गुष्ठा च परश्वघस्य मुद्रा स्यात्। मृगमुद्रामाह- प्रसारितेति। प्रसारिताङ्गुष्ठशिरःस्थमध्यानामाग्रका प्रसारितस्याङ्गुष्ठस्य शिरस्थं शिरसि स्थिंतं मध्यानामिगयोरग्रं यस्याः सा हरिणस्य मृगस्य मुद्रा स्यात्।।२०१।।

विवरणम्

अब्धिशाखाः चतस्रोऽङ्गुलयः। मृगमुद्रायां तर्जनिकनीष्ठयोरुन्नमनमर्थसिद्धमवगन्तव्यम्।।२०१।।

बहिर्मुखोत्तम्भितपाणिशाखा मनाक्प्रकम्पाभयरूपमुद्रा।
उत्तानपाणिप्रसृताग्रशाखा निम्नोदरा स्याद् वरदानमुद्रा।।२०२।।

---

१. 'निकुञ्च्य तिर्यक्प्र' इति मूलकोशपाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

अभयमुद्रामाह- बहिरिति। बहिर्मुखोत्तम्भितपाणिशाखा बहिर्मुखाभिः उत्तम्भिताभिरूर्ध्वगताभिः पाणिशाखाभिर्युता, मनाक्प्रकम्पा ईषत्कम्पयुक्ता चाभयरूपमुद्र अभयमुद्रा स्यात्। वरदमुद्रामाह - उत्तनेति। उत्तानेति। उत्तानपाणिप्रसृताग्रशाखा ऊर्ध्वमुखपाणौ प्रसृतैः शाखाग्रैर्युता, निम्नोदरा निम्नान्तर्भागयुता वरदानमुद्रा स्यात्।।२०२।।

शूलस्य संस्तम्भितमध्यमा मनाक्-
प्रभुग्नतर्जोपकनिष्ठिका सती।
मुद्रा कपालस्य कपालसङ्ग्रहा-
भिनीतिरुत्तानितपाणिनाकृता।।२०३।।

विमर्शिनी

शूलमुद्रामाह- शूलस्येति। संस्तम्भितमध्यमा ऋज्वीकृतमध्यमा, मनाक्प्रभुग्नतर्जोपकनिष्ठिका ईषद्वक्रीकृतयोः तर्जन्यनामिकयोर्युक्ता सती शूलस्य मुद्रा स्यात्। कपालमुद्रामाह- मुद्रेति। उत्तानितपाणिना कृता कपालसंग्रहाभिनीतिः कपालग्रहणाय कृतोऽभिनयः कपालस्य मुद्रा स्यात्।।२०३।।

विवरणम्

कपालसङ्ग्रहाभिनीतिः कपालस्य करेण धारिततामभिनयेदित्यर्थः।।२०३।।

मुष्टी निजे चापपृषत्कमुद्रिके
कृत्वा करौ द्वौ मुकुलीकृताग्रकौ।
निबध्य गाढं मणिवन्धयोर्द्विधा
भ्रमेण कार्ये पविशक्तिमुद्रिके।।२०४।।

विमर्शिनी

निजे मुष्टि धनुर्मुष्टिः शरमुष्टिश्च चापपृषत्कमुद्रिके धनुर्मुद्रा शरमुद्रा स्याताम्। मुकुलीकृताग्रकौ द्वौ करौ कृत्वा गाढं मणिवन्धयोर्निबध्य द्विधा भ्रमेण पविशक्तिमुद्रिके वज्रमुद्रा शक्तिमुद्रा च कार्ये।।२०४।।

Shripuram Publications
www.shripuram.org

विवरणम्

द्विधा भ्रमेणेति। दक्षिणपार्श्वे दक्षिणहस्ताग्रं दक्षिणतो भ्रमयेत्। वामपार्श्वे वामहस्तं दक्षिणतो भ्रमयेदित्यर्थः(?)॥२०४॥

कनिष्ठिकाद्याः क्रमशः प्रधानया
चतस्र एनां निजतर्जया स्पृशन्।
प्राणादिमुद्राः क्रमशः प्रदर्शयेत्
स्याद् ग्रासमुद्रा स्फुरदुत्पलाकृतिः॥२०५॥

विमर्शिनी

प्राणादिमुद्राः कथयति- कनिष्ठिकाद्या इति। कनिष्ठिकाद्याश्चतस्रोऽङ्गुलीः क्रमशः प्रधानाया, एनां प्रधानां निजतर्जया च स्पृशन् क्रमशः प्राणादिमुद्राः प्रदर्शयेत्। स्फुरदुत्पलाकृतिः विकसदुत्पलाकारा ग्रासमुद्रा स्यात्॥२०५॥

www.shripuram.org

विवरणम्

एनां निजतर्जयेति प्रधानमित्यर्थः॥२०५॥

क्रमात् कनिष्टोपकनिष्ठिके स्पृशन्
प्रदेशिनीमध्यमिके च मुख्यया।
अनामिकामध्यमिके च तर्जनी-
युते च ते ताश्च करोतु वाखिलाः॥२०६॥

विमर्शिनी

मुख्यया ज्येष्ठया क्रमात् कनिष्ठोपकनिष्ठिके, प्रदेशिनीमध्यमिके च, अनामिका-मध्यमिके च, तर्जनीयुते ते च तर्जनीमध्यमानामिकाश्च, ताः चतस्रोऽङ्गुलीश्च स्पृशन् ताः अखिलाः प्राणादिमुद्राः करोतु वा॥२०६॥

विवरणम्

तर्जनीयुते चतुर्थीमुद्रोक्ता ता अखिलाश्चेति पञ्चमी। मुख्यया स्पृशन्निति सर्वत्र सम्बध्यते*॥२०६॥

---

* इत उपरि घ. पाठो नास्ति।

Shripuram Publications
www.shripuram.org

अनामिकामग्रजया कनीयसी-
मपि स्पृशन्नग्रभवां स्वतर्जया।
प्रधानया तर्जनिकादिकं त्रयं
करोतु तोयाद्युपहारमुद्रिकाः।।२०७।।

विमर्शिनी

षडुपहारमुद्राः कथयति- अग्रजया अनामिकां कनीयसीमपि, स्वतर्जया अग्रभवां, पुनः प्रधानया तर्जनिकादिकं त्रयं तर्जनीमध्यमानामिकाः स्पृशन् क्रमात् तोयाद्युपहारमुद्रिकाः जलगन्धपुष्पधूपदीपनिवेद्यमुद्राः करोतु।।२०७।।

अनामिकामूललसत्प्रधानां निवेद्यमुद्रां प्रतनोतु दोर्भ्याम्।
हृद्बद्धमुष्टिर्बलिमुद्रिकाग्रस्थास्नुप्रधानोपकनिष्ठिका स्यात्।।२०८।।

विमर्शिनी

निवेद्यकालस्थां निवेद्यमुद्रामाह- अनामिकेति। दोर्भ्याम् अनामिकामूललसत्प्रधानाम् अनामिकयोर्मूले शोभमानां प्रधानां निवेद्यमुद्रां प्रतनोतु। बलिमुद्रामाह- हृट्बद्धेति। अग्रस्थास्नुप्रधानोपकनिष्ठिका मुष्टेरग्रभागस्थाभ्यां प्रधानोपकनिष्ठिकाभ्यां युक्त हृद्बमुष्टिः हृदये बद्धा दक्षिणमुष्टिः बलिमुद्रिका स्यात्।।२०८।।

भूषायुधान्तेऽञ्जलिवन्दनीभ्या-
मूर्ध्वा हरौ शूलिनि लिङ्गसंज्ञा।
योन्याह्वया सुम्भजिति द्विपास्ये
वध्न्यञ्जलिर्वा कथितैषु मुद्रा।।२०९।।

विमर्शिनी

अञ्जल्यादिप्रधानमुद्राणां दर्शनकालमाह- भूषायुधान्त इति। भूषायुधान्ते भुषणायुधन्यासानामन्ते अञ्जलिवन्दनीभ्यां सह हरौ ऊर्ध्वा मुद्रा स्यात्। शूलिनि लिङ्गसंज्ञा, सुम्भजिति योन्याह्वया, द्विपास्ये वैध्नी, एषु सर्वेष्वप्यञ्जलिर्वा मुद्रा स्यात्।।२०९।।

Shripuram Publications
www.shripuram.org

रात्वावाहनतः परं समधुपर्कादावृतिस्फूर्तित-
श्चाचामावधिकं पुरः स्नपनतोऽन्ते वस्त्रभूषाविधेः।
प्राङ् नैवेद्यविधेः परं त्रयमिदं गण्डूषतोऽर्घ्यं प्रसा-
दान्ते प्राक् च विसर्जनात् प्रतिसपर्यं वारि चाद्यन्तयोः।।२१०।।

विमर्शिनी

अर्घ्यादिक्लृप्त्या वा पाद्यादिक्लृप्त्या वोपहारदानस्य कालनियममाह- रात्विति। आवाहनतः परम् आवाह्य सकलीकरणान्ते आचामावधिकम् अर्घ्यपाद्याचमनीयक्रमेण वा पाद्यार्घ्याचमनीयक्रमेण वा इदं त्रयं रातु ददातु। समधुपर्कात् मधुपर्कद्रव्ययुक्तादुपहार-दानात् परम्, आवृतिस्फूर्तितः आवरणस्फुरणात् परं, स्नपनतः स्नपनकर्मणः पुरः पूर्वं, वस्त्रभूषाविधेः वस्त्रविधेर्भूषणविधेरन्ते, नैवेद्यविधेः प्राक्, गण्डूषतः परं च इदं त्रयं रातु। प्रसादान्ते प्रसन्नपूजानन्तरं विसर्जनात् उद्वासनात् प्राक् चार्घ्यं रातु। प्रतिसपर्यम् उपहारसमर्पणे[1] आद्यन्तयोः वारि जलं च रातु।।२१०।।

स्नानानि पञ्चामृतपञ्चगव्य-
मृत्क्काथकोष्णोदकगन्धवार्भिः।
तीर्थाद्भिरष्टौ कलशाम्बुभिश्च
कुर्वीत सावान्तरशुद्धतोयैः।।२११।।

विमर्शिनी

स्नानक्लृप्तिमाह- स्नानानीति। पञ्चामृतपञ्चगव्यमृत्क्काथकोष्णोदकगन्धवर्भिः तीर्थाद्भिः कलशाम्बुभिश्च पञ्चामृतादिकलशजलान्तैः अष्टौ स्नानानि सावान्तरशुद्धतोयैः मध्ये मध्ये शुद्धजलसहितैः कुर्वीत।।२११।।

गुरुभ्य इदमेवमादिपदपूवकेणाणुना
करोतु कुसुमाञ्जलिं गुरुपितृस्वमात्रात्मनः।

सहोदरकुटुम्बिनीतनयवंश्यसाध्यांस्तथा
महीतलसमाश्रितांस्त्रिभुवनाश्रितांश्चोद्दिशन्।।२१२।।

---

१. 'णाद्य' ख. ङ. च. पाठः।

Shripuram Publications
www.shripuram.org

विमर्शिनी

प्रसन्नपूजाकाले साध्यपुष्पाञ्जलिक्रममाह - गुरुभ्य इति। गुरुभ्य इदमेवमादिपदपूर्वकेणाणुना 'गुरुभ्य इदं ओं नमो नारायणाय' इत्यादिना मन्त्रेण कुसुमाञ्जलिं पूर्णपुष्पाञ्जलिं त्रिशस्त्रिशः करोतु। गुरुपितृस्वमात्रात्मनः उद्दीशन् गुर्वादीनां तत्फलप्राप्तिं स्मरन् 'गुरुभ्य इदं' 'पितृभ्य इदं' 'मातृभ्य इदम्' 'अस्मभ्यमिदं', सहोदरकुटुम्बिनीतनयवंश्यसाध्यान् 'भ्रातृभ्य इदं' 'पत्नीभ्य इदं' 'पुत्रेभ्य इदम्' 'अस्मद्वंशभूतेभ्य इदं' 'साध्येभ्य इदं', महीतलसमाश्रितान् 'पृथिवीवासिभ्य इदं', त्रिभुवनाश्रितांश्च 'त्रिभुवनवासिभ्य इदम् ओं नमो नारायणाय' इत्यादिमन्त्रैरित्यर्थः।।२१२।।

आवाह्याग्रगते स्वमूलमनुबिम्बात् कर्मबिम्बे निजै-
रभ्यर्च्यावरणैर्युतं विधिवदत्रोद्वासयेच्चान्ततः।

एवं स्याद् बहुबेरनित्यवरिवस्यावाहनोद्वासना-
हीनोऽर्चाविधिरेकबेरविषये न्यूनावृतिश्च क्वचित्।।२१३।।

विमर्शिनी

बहुबेर एकबेरे च पूजाक्लृप्तिमाह- आवाह्येति। बहुबेरविषये अर्चितपीठे कल्पितमूर्तावग्रगते[1] कर्मबिम्बे स्वमूलमनुबिम्बाते यथोक्तप्रकारेणावाह्य निजैरावरणैर्युतं विधिवदभ्यर्च्यान्ततोऽत्र मूलबिम्ब उद्वासयेत्। एवं बहुबेरनित्यवरिवस्या बहुबेरविषये नित्यपूजा स्यात्। एकबेरविषये अर्चाविधिः पूजाविधिः आवाहनोद्वासनाहीनः स्याते। क्वचित्पक्षे न्यूनावृतिश्च आवरणैर्विनैव स्यात्।।२१३।।

भक्त्यैतद्विधिनाजितं यजतु चाक्षीणश्रियै मुक्तये
तत्तन्त्रप्रवराप्तयेह[2] जगदीशं कृत्स्नविच्चर्चया।
शर्वं सद्वितयश्रियं गजमुखं वातश्च भूयस्तरा-
राध्यां[3] सुम्भरिपुं तथार्यशरजं येन क्रियार्थोत्तरा[4]।।२१४।।

---

१. 'र्घा' ङ. पाठः। २. 'त्रि' ख. पाठः। ३.'ध्यं' ख. ग. पाठः। ४.'रा।। इति विधिमधिगम्य क्षेत्रसंस्कारपूर्वं परमपि सुविशुद्धं हृद्यमापाद्य तत्स्थाम्। परमपुरुषमेकं श्रद्धयाराध्नुयाद् यः हि पुरुषधुरीणः स्यात् समग्रोन्मिषच्छ्रीः।।' क. ख. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

अभिहितमेतत्तन्त्रसमुच्चयमुपसंहरति- भक्त्येति। इह पूजायोग्ये काले पूजायोग्ये बिम्बादिविषये च कृत्स्नवित् तन्त्रागमानां कात्स्न्येन तात्पर्यज्ञः पूजकः एतद्विधिना अत्रोक्तविधानेन तत्तन्त्रप्रवराप्तया तस्य तस्य देवस्य तन्त्रागमेभ्यो गृहीतया चर्चया पूजया जगदीशम् अजितं विष्णुं वा, शर्वं शिवं वा, सद्वितयश्रियं वैष्णव्या शैव्या च श्रिया सहितं शिवनागयणं वा, गजमुखं गणपतिं वा, अतोऽन्यां भूयस्तराराध्यां पूनः पुनराराधनार्हां सुम्भरिपुं दुर्गां वा, तथा आर्यशरजं तद्वदेव शास्तारं वा स्कन्दं वा, भक्त्या सह यजतु। भक्तिरेव पूजायां प्रधानं साधनम्। तदुक्तमुपहारप्रकाशिकायां-

'स्नेहविश्वाससम्मानभक्तिज्ञानजलादिना"

इति। भगवद्गीतायां च-

'पत्त्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।।"

इति। किमर्थमिज्यत इत्यत्राह- अक्षीणश्रियै इति। प्रभूताय ऐहिकफलाय, मुक्तये मोक्षाय च। येन विधिना क्रिया पूजा अर्थोत्तरा सफला भवति तेन विधिनेति पूर्वत्र संबन्धः। अयं श्लोको ग्रन्थकृता चक्ररूपतया लेखनीयत्वेन विवक्षितः। तत्र समे स्थले वृत्तं विलिख्य तदन्तरेकैकाक्षरलेखनप्रदेशमात्रं व्यतीत्यापि वृत्तं विलिख्य, तत्र वृत्तद्वयवति स्थले समान्तरालानि त्रीणि पुटानि द्विद्विसूत्रास्फालनाद् बाह्यवृत्तादारभ्य तदन्तानि अन्योन्यं मध्यतः संसक्तानि कृत्वाक्षराणि लिखेत्। तत्र दण्डाकारेषु पुटत्रयेषु प्रादक्षिण्यक्रमेण श्लोकस्य पादत्रय[१]मूलत आरभ्याग्रपर्यन्तं लेखने तत्र दशममक्षरं जकारः पुटत्रयेऽपि समानं मध्ये यथा भवति तथा 'भक्त्यैतदि'त्यारभ्य एकोनविंशत्यक्षरान् त्रीन् पादान् विलिख्य चतुर्थं पादं 'राध्यां' सुम्भरिपुमित्यादिकं तृतीयपदान्त्यगतमेवाक्षरं पुनरप्यारभ्य षट्सु पुटान्तरालेषु द्विद्व्यक्षराणि च विलिख्य वाचयेत्। तत्र पुटान्तरालस्थैः द्वादशभिरक्षरैः पुटस्थैः षट्भिरक्षरैः सहाष्टादशाक्षरावसानेऽन्त्यगतं 'रा' इत्यक्षरमपि वाचयित्वा पादं पूरयेत्। तत्र पुटषट्केऽपि तृतीयतृतीयाक्षरवाचने 'तन्त्रसमुच्चय' [२]इति ग्रन्थस्य नामोक्तं भवति। षष्ठषष्ठाक्षरवाचने 'नारायणकृत' [३]इति ग्रन्थकर्तुः स्वस्य नामाप्युक्तं भवतीति।।२१४।।

---

१. 'यं' घ. ङ. च. पाठः।, २, ३. 'मि' ख. ङ. च. पाठः।

Shripuram Publications
www.shripuram.org

कल्यब्देष्वतियत्सु नन्दनयनेष्वम्भोधिसङ्ख्येषु यः
सम्भूतो भृगुवीतहव्यमनियुङ्मूले सवेदोन्वये।
प्राहुर्यस्य जयन्तमङ्गलपदे[१]द्धं धाम नारायणः
सोऽयं तन्त्रमिदं व्यधाद् बहुविधादुद्धृत्य तन्त्रार्णवात्॥२१५॥

विमर्शिनी

ग्रन्थकृते स्वस्य लोकप्रसिद्ध्यर्थं गृहगोत्रनामान्यपि अस्मिन् ग्रन्थे निबध्नाति-कल्यब्देष्विति। नन्दा नव, नयने द्वे, इषवः पञ्च, अम्भोधयश्चत्वारः[२]। एकस्थानदश-स्थानशतस्थानसहस्रस्थानेषु क्रमेण स्थिता नन्दाद्याः संख्या येषु कल्यब्देषु, कल्यब्दाः कलेरब्दाः संवत्सराः तेषु सवत्सरेषु, अतियत्सु अतिक्रम्य गच्छत्सु कालावयवेषु यः पुमान् भृगुवीतहव्यमुनियुङ्मूले भृगुर्वीतहव्य इत्यृषिद्वयमूलभूते सवेदोन्वये सवेदा इति कश्चिदृषिः तस्यान्वये वंशे। भृगोः पुत्रो वीतहव्यः, तस्य पुत्रः सवेदाः, तस्यान्वये इति स्वस्य प्रवरोऽप्युक्तो भवति। तस्मिन् वंशे यः सम्भूतः, यस्य पुनः जयन्तमङ्गलपदेद्धं 'जयन्तमङ्लम्' इति पदेन प्रकाशितं धाम गृहं भवति, सोऽयं नारायणः 'नारायण' इति लोके प्रसिद्धः इदं तन्त्रं बहुविधात् तन्त्रार्णवात्। तन्त्राणां बाहुल्यात् समुद्रकल्पत्वं द्योत्यते। तस्मादमृतमिवोद्धृत्य तन्त्रसमुच्चयाख्यं ग्रन्थं व्यधात् कृतवानित्यर्थः॥२१५॥

विवरणम्

स्वाध्याययोगयुक्तस्य प्रसीदतीति। तस्य गुणसामग्रीपरिग्रहेण हृदयपुटे विभाव्यमानस्य सकलगुणविलापनात् स्वरूपप्रतिपत्तिर्भवति। सैव चाभ्यासप्रबन्धात् परिपाकमासादयन्ति साक्षादनुग्रहायावकल्पते॥

अध ग्रन्थकारो ग्रन्थावसाने स्वैः कालदेशवंशैस्सहात्मानं ग्रन्थे निदधान आनुषङ्गिकं श्रेयोविशेषं सम्पादयति - कल्यब्देष्विति। अतियत्सु वृत्तेषु सवेदोन्वये सम्भूत इति सम्बन्धः। सवेदा नाम कश्चित् प्रवरनिमित्तमृषिः। तस्यान्वयो वंशः। भृगुवीतहव्यमुनियुङ्मूल इति तद्विशेषणम्। भृगुर्वीत हव्य इतीमौ ऋषी। तस्यान्वयस्य मूलभूतौ स्त इत्यर्थः। व्यधात् निबद्धवान्॥२१५॥

१, 'दाब्यं धा' ख. ग. पाठः। २. 'रः षट्भिरक्षरैरेक' ख. ग. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

सेयं कृतिस्तन्त्ररहस्यदृब्धा
रक्ष्या मुहुर्मूर्खमुखप्रपातात्।
आचार्यवर्यैरियमेव शश्वद्
विश्वेश्वरेज्यास्मदनु[१]ष्ठितास्तु।।२१६।।

विमर्शिनी

एतद्ग्रन्थकरणमपि विश्वेश्वरपूजा भवत्विति प्रार्थयन् ग्रन्थं समापयति- सेयमिति। सेयं कृतिः ममेयं ग्रन्थकरणक्रिया तन्त्ररहस्यदृब्धा तन्त्ररहस्यभूतैरर्थैः परिपूर्णा, अत एवाचार्यवर्यैः मूर्खमुखप्रपातान्मुहुः पुनः पुनरपि रक्ष्या। मूर्खास्तु यत्किञ्चिदेव ज्ञात्वा यत्किञ्चिदेव कुर्वन्ति। तस्मात् परमपुरुषवरिवस्याया हानिर्भवति। अतः सर्वप्रयत्नेन तेभ्यो रक्ष्णीयेत्यर्थः। (इयमेव) शश्वदनवरतम् अस्मदनुष्ठिता अस्माभिरनुष्ठिता विश्वेश्वरेज्या विश्वेश्वरस्य परमपरुषस्य पूजास्तु भवतु। 'तं देवं नित्यं समाराध्नुयामि'त्युपक्रमे देवस्य नित्यपूजाप्रार्थनाद्, अन्ते 'विश्वेश्वरपूजास्त्वि'ति उपसंहाराच्च, मध्ये पुनर्दैवस्य नित्यपुजाप्रतिबिम्बप्रतिष्ठाकर्माङ्गतया गुरुवरणादिप्रतिष्ठापर्यन्तैः कर्मभिस्तत्साधन-प्रकाशनात्, तदन्ते पूजाविधानात्, तच्छेषतया कलशादेः प्रकटनाच्च अस्मिन् ग्रन्थे सर्वोऽप्यर्थो विश्वेश्वरपूजातत्परतयैव प्रतिपादितः। अवसाने विशेषेण ग्रन्थकरणप्रयत्नोऽपि तस्य पूजास्त्वित्याचार्यस्याभिमतमिति जानन्तु विद्वांसः।।२१६।।

विवरणम्

समस्तोपप्लपरिहारायाह - सेयमिति। आचार्यवर्यै रक्ष्येति सम्बन्धः।।२१६।।

इति तन्त्रसमुच्चयविवरणे द्वादशः पटलः।

इति तन्त्रसमुच्चयविवरणं समाप्तम्।।

इति तन्त्रसमुच्चये श्रु[२]ताचार्या-
क्रमगुप्त्यै रविजन्मसम्प्रणीते।
पटलः परिशिष्टकर्मवादी
दशमोऽभुद् द्विपुरस्सरः समाप्तः।।२१७।।

---

१. 'दुपार्जिता' ख. ग पाठः। २. 'सलस्तागमसारैकनिधौ सुधीसुगाहे। पटलः परिशेषकर्मरम्यो द' ख. पाठः।

www.shripuram.org
Shripuram Publications
www.shripuram.org

विमर्शिनी

पटलमुपसंहरति- इतीति। इति तन्त्रसमुच्चये ग्रन्थे द्विपुरस्सरोद्विति पदपुरोगतो दशमः द्वादशः पटलः समाप्तोऽभूत्। कथंभूते, श्रुतार्चाक्रमगुप्त्यै श्रुतस्य पुजाक्रमस्य रक्षायै रविजन्मसंप्रणीते रविपुत्रेण नारायणेन कृते। परिशिष्टकर्मवादी सर्वपटलेष्वपि परिशिष्टानां कर्मणां वदनस्वभावः पटलः समाप्त इत्यर्थः।।२१७।।

यस्य हि तन्त्रसमुच्चयरचनाल्लोके समुत्थिता कीर्तिः।
तत्पुत्रेण कृतेयं शङ्करनाम्ना विमर्शिनी व्याख्या।।

इति तन्त्रसमुच्चयिमर्शिन्यां
द्वादशः पटलः

समाप्तोऽयं ग्रन्थः।
शुभं भूयात्।

www.shripuram.org
Shripuram Publications
www.shripuram.org